मन्त्रियशःपालविरचितं

मोहराजपराजयम्

MOHARÂJAPARÂJAYA

OF

YAŚAHPÂLA

EDITED

BY

MUNI CHATURAVIJAYAJI

WITH INTROUDCTION AND APPENDICES

BY

C. D. DALAL, M. A.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA GAEKWAD OF BARODA.

CENTRAL LIBRARY
BARODA.
1918.

Published by Janardan Sakharam Kudalkar, M. A., LL. B., Curator of State Libraries, Baroda, for the Baroda Government, and Printed by Manilal Itcharam Desai, at

The Gujarati Printing Press, No. 8, Sassoon Buildings, Circle, Fort, Bombay.

Price Rs. 2-0-0

मोहपराजयरूपकवस्तुसङ्क्षेपः

अथान्यदा कृतप्राभातिककृत्यः पट्टगजाधिरूढः श्रीराजर्षिः श्रीगुरुवन्दनार्थमायातः शालाद्वारे काञ्चन कनीं देवकन्यामिव लीलाविलासिनीं दृष्टवान् चिन्तितवांश्चेति—

निस्सीमनवनवोल्लासिलावण्यामृतसारणी ।
प्रीणयन्ती ममात्मानं, कस्यैषा कन्यकाऽद्भुता ? ॥

ततो वन्दिताः श्रीगुरुपादाः । मीलितेषु सकलसभ्येषु पप्रच्छ सूरीन् "भगवन् ! द्वारि दृष्टपूर्वा हृतमन्मनाः कस्येयं कन्या ? किं नाम्नी ?"। ततः सूरिरपि राजकुञ्जरं रागातिशयोल्लासिनं ज्ञात्वा तन्मनोविलोभनाय तस्याः कुलशीलादि प्राह, "हे चौलुक्यचन्द्र ! दत्तावधानः शृणु । विमलचित्ताह्वं पुरं विनयसालमर्यादापरिखोल्बणम् । तत्रार्हद्धर्मनामा नृपः, यन्महिमैवम्—

"सुकुलजन्मविभूतिरनेकधा, प्रियसमागम इष्टपरम्परा ।
नृपकुले गुरुता विमलं यशो, भवति धर्मनरेश्वरसेवया ॥"

असौ सेव्यमानस्त्याजयत्यवस्तुप्रतिबन्धम्, प्रवर्तते सत्क्रियासु, पालयत्यात्मवत्स्वाश्रितमित्यादिगुणयोगात्सुराजेति प्रसिद्धः । तस्यास्ति विरतिः पत्नी देवेन्द्रैरपि अलभ्यदर्शना समग्रैहिकामुत्रिकसौख्यप्राप्तिहेतुः । तयोश्च शमदमादयस्तनूजाः । अथैकदा तयोः पुत्रीजन्म । तेन खिन्नमनोवृत्ती वीक्ष्य सुतापितामहो विश्ववेदी जिनः प्राहः, "सुता जाता इति किं खेदं वहथ ? इयं सुतादप्यधिका भवित्री युवयोः स्वभर्तुश्च लोकोत्तरप्रतिष्ठाप्रापकत्वेन । ततो हृष्टाः सर्वे । कृतो जन्मोत्सवः । कृपासुन्दरीति नाम दत्तम् । जाता सम्प्रति यौवनस्था । तादृङ्मनोमतवराऽप्राप्तेर्वृद्धकुमारीति लोके प्रसिद्धा । अथ राजा प्राह "भगवन्तः ! अत्रागमनकारणं निवेदयन्तु । सूरयः प्रोचुः सावधानैः श्रोतव्यम् । राजन् ! राजसचित्तपुरे मोहनामा नृपाऽपसदो राज्यं भुनक्ति । स च मोहचरटो लीलयाऽपि राजानं रङ्कयति । शक्रादीनपि स्वाज्ञाकारिणः करोति । महतोऽपि दासीकुरुते । प्रवर्तयति महापापक्रियासु । किं बहुना—

त्रैधे जगति कोऽप्यस्ति, न देवो, नापि मानवः ।
यस्तदाज्ञां विना स्थातुं, शक्नोति क्षणमप्यहो ! ॥ १ ॥

तस्याऽविरतिजाया जगत्त्रयवल्लभदर्शना सुखासेव्या च । तयोः सुताः कोपाद्याः । पुत्री हिंसानाम्नीति । एवमनयोर्धर्ममोहनृपयोरनादिसिद्धो वैरिभावः कटकबन्धश्च प्रवर्तते । द्वयोरप्यनिशं युद्धोत्सवः । परं कदाचित् कस्यचिज्जयः, अपरस्य तु पराजयः । गतश्च भूयाननेहा । अत्रान्तरे श्रीचौलुक्यो युद्धवीरतयोच्छ्वासितमनोवृत्तिः प्रोचे, भगवन् ! सम्यगवगम्यमानोऽयं प्रबन्धः प्रीणयति मम सभ्यानां चान्तरात्मानम् । परं द्वयोर्नृपयोरेकदा सैन्यादिस्वरूपं श्रोतुमुत्सुका मनोवृत्तिः, तत्प्रसद्य प्रभवो

निवेदयन्तु इत्युक्ते राज्ञा सूरयः हे परमार्हत ! विचारचतुर्मुख ! श्रीकुमारपाल ! सूक्ष्माभोगेन परिभावनीयमेतन्निरूप्यमाणम् । तथाहि–धर्मनरेन्द्रस्य सदागमो मन्त्री सदासद्बुद्धिदानदक्षोऽपरावर्त्यश्चापरैर्नृपान्तरैः । विवेकचन्द्रः सेनाध्यक्षो विपक्षक्षोददीक्षितः । शुभाध्यवसायः परिचारकः । सम्यक्त्वयमनियमाद्याः भटाः । किमुच्यते बहु, राजन् ! धीरशान्तः श्रीधर्मभूमीन्द्रः । अथ मोहनृपतेः कदागमो मन्त्री सर्वदुर्बुद्धिमूलमन्दिरम् । अज्ञानराशिः सेनानीः । मिथ्यात्वदुरध्यवसाया भटाः । धीरोद्धतश्चायं मोहः । एवं सति संप्रति प्रोच्छलत्प्रबलदुष्टेष्टविघातककलिकालसहायिकरालविलसितैः समजनि समुज्जीवितो मोहराजः । प्रवर्तितं सर्वत्र स्वाज्ञैश्वर्यम् । पराभूय निर्वासितः श्रीधर्मनृपतिः सपरिकरः । राजा–किमग्रतः ? । सूरिः–भ्रामं भ्रामं सर्वत्र श्रान्तः क्वापि स्थितिमलभमानः साम्प्रतं श्रीगुर्जरनाथधरित्रीशिरोमणीयिते श्रीमति पत्तनमहास्थानेऽस्मदाश्रममाश्रित्य मनाक् स्वस्थीभवन् समयाकरोति श्रीधर्मभूभुग् । श्रीचौलुक्य ! तव सौराज्याभ्युदयेन तु संजातबलोत्सर्पणः स्वं प्रौढिमानमासादयिष्यत्येवेति मन्यामहे त्वामेव शरणागतवज्रपञ्जरं राजानं, इति सूरीन्दुवचोऽमृतैः पुनर्नवीभवन् कृपासुन्दरीप्रौढिं श्रुत्वा संजातसहस्रगुणदृढानुरागः कदा मयेयं परिणेतव्या इति चिन्तावशितात्मा गुरून्नत्वा स्वभवनमलङ्कृतवान् । तदनु—

सा वाचि सा च हृदि सा पथि सा च धाम्नि,
सा व्योम्नि सा पयसि सा भुवि सा च दिक्षु ।
स्वप्नेऽपि सा शशिमुखी परिवर्तते मे,
किं वाऽपरैरजनि तन्मयमेव विश्वम् ॥

इति पठन् कृपासुन्दरीविरहपरवशोऽयं भूप इति ज्ञातः श्रीउदयनादिमन्त्रिमण्डलेन । ज्ञापितश्चायं वृत्तान्तः श्रीगुरुभ्यः । आकारितः शालायां भूपालः परिवारश्च मं० उदयनादिः । कथितं गुरुणा राजन् ! प्रेष्यते कश्चिदाप्तः प्रधानपूरुषः श्रीधर्मनरेन्द्रपार्श्वे । मार्ग्यते धर्मनन्दिनी । सत्कार्य महादरेण काऽपि सुस्थाने निवास्यते महोत्सवपूर्वमानीय श्रीधर्मः । महान्तो हि स्वपदभ्रष्टा निमज्जन्ति लज्जामहाम्बुधौ नापि कुर्वन्ति महद्भिः सह संबन्धादि, यदेतैः किमपि गृहीतं भावीति चकिता दुर्जनवचोनिचयेषु । तत एवं कृते प्रीतो दास्यति कृपासुन्दरीं भवते श्रीधर्मनृपः इत्यादि । स्वपरिवारेण सह पर्यालोच्य तेन प्रहितो मतिप्रकर्षः प्रधानाप्तपूरुषः । गतोऽसौ श्रीहेमाचार्याश्रमनिवासिनः श्रीधर्मभूपस्य पार्श्वे । निवेदितश्च कृपासुन्दरीदर्शनादिवृत्तान्तः । तदनु मार्गिता धर्मसुता । ज्ञापिताः श्रीचौलुक्यगुणा एवम् । यथा—

सम्यक्त्वधारी करुणैकसिन्धुर्बन्धुर्जनानां परमार्हतश्च ।
चातुर्यगाम्भीर्यमुखैर्गुणौघैरगाधदेहो भुवनाधिवीरः ॥ १ ॥

इति मतिप्रकर्षेणोक्ते श्रीधर्मभूपः प्राह, सत्यमेतद् भो मतिप्रकर्ष ! किमुच्यते श्रीचौलुक्यचन्द्रस्य लोकोत्तरगुणसंपदभिरामस्य योग्यता । परमेषा पुरुषद्वेषिणी स्वभावतो दुष्पूरपणबन्धप्रतिज्ञातपाणिग्रहा, तेन मनाग् मनो दोलायते ।

मतिप्रकर्षः—कः पणबन्धः ? इति श्रोतुमिच्छामि ।

धर्मः—

इह भरहनिवाओ जं न केणावि चत्तं
मुयइ मयघणं जो तंपि पाविक्कमूलं ।
नियजणवयसीमं मोयए जो य जूय-
प्पमुहवसणचक्कं सो वरो मुज्झ होउ ॥

मतिप्रकर्षः—प्रतिज्ञातमेव श्रीहेमपादाम्बुजसमक्षं निर्वीराधनमोक्षणं सप्तव्यसननिर्वासनं च देवेन इति संपूर्ण एव पणबन्धः ॥

किञ्चाऽभक्ष्यमयं त्यक्त्वा, परनारीपराङ्मुखः ।
स्वदेशे परदेशे च, हिंसादिकमवारयत् ॥

इति श्रुत्वा मुदितो धर्मभूपः । निवेदितं विरतिपत्न्याः । पृष्टाः सदागमशमादिमहत्तराः । श्रीधर्मासन्नस्थाभिरेतत् श्रुत्वा मुदितामैत्रीसमतासखीभिर्ज्ञापितं कृपासुन्दर्याः । इति सिद्धप्रायं प्रयोजनमिति निश्चित्य धर्मविसृष्टः प्राप्तः श्रीकुमारनृपाभ्यर्णं मतिप्रकर्षः । विज्ञप्तः समग्रोऽपि पुरुषद्वेषपणबंधादिव्यतिरेकः । निष्पन्नप्रायमिदमित्याद्यक्षरैरमृतायमानैः पुनः कथ्यतां पुनः कथ्यतामिति इत्यादि वदन् परममुदम्भोधिमग्नः समजनि भूजानिः । ततो महता महेन प्रवेशितश्च श्रीधर्मभूपालः सपरिकरः स्वराजधानीमण्डपे । अथ सम्प्राप्ते शुभलग्ने निर्मलभाववारिभिः कृतमङ्गलमज्जनः सत्कीर्तिचन्दनावलिप्तदेहो नैकाभिग्रहोल्लसद्भूषणालङ्कृतो दानकङ्कणरोचिष्णुदक्षिणपाणिः संवेगरङ्गद्गजाधिरूढः सदाचारछत्रोपशोभितः श्रद्धासहोदरया क्रियमाणलवणोत्तारणविधिः त्रयोदशशतकोटीव्रतभङ्गसुभगजन्यलोकपरिवृतः श्रीदेवगुरुभक्तिदेशविरतिजाननीभिर्गीयमानधवलमङ्गलः क्रमेण प्राप्तः पौषधागारद्वारतोरणे। पञ्चविधस्वाध्यायवाद्यमानातोद्यध्वनिपूरे प्रसर्पति विरतिश्वश्र्वा कृतप्रोङ्खणाचारः शमदमादिशालकदर्शितसरणिः मातृगृहमध्यस्थितायाः शीलधवलचीवरध्यानद्वयकुण्डलनवपदीहारतपोभेदमुद्रिकाद्यलङ्कृतायाः कृपासुन्दर्याः संवत् १२१६ मार्गशुदिद्वितीयादिने पाणिं जग्राह श्रीकुमारपालमहीपालः श्रीमदर्हद्देवतासमक्षम् । ततः श्री आगमोक्तश्राद्धगुणप्रगुणितद्वादशव्रतकलशावलिं विचारचारुतोरणां नवतत्त्वनवाङ्गवेदीं कृत्वा प्रबोधाग्निं प्रदीप्य भावनासर्पिस्तर्पितं श्रीहेमाचार्यो भूदेवः सवधूकं नृपं प्रदक्षिणयामास "चत्वारि मङ्गलम्" इति वेदोच्चारपूर्वम् । ततः—

जामात्रे ददिवान् धर्मः, पाणिमोचनपर्वणि ।
सौभाग्यारोग्यदीर्घायुर्बलसौख्याननेकशः ॥ १ ॥
एवं महेन संपूर्णे, पाणिग्रहणमङ्गले ।
प्रणेमिवांसं राजर्षिं, सूरिराजोऽन्वशादिति ॥ २ ॥
या प्रापे न पुरा निरीक्षितुमपि श्रीश्रेणिकाद्यैर्नृपैः,
कन्यां तां परिणायितोऽसि नृपते ! त्वं धर्मभूमीशितुः
अस्यां प्रेम महद्विधेयमनिशं खण्ड्यं च नैतद्वचो,
यस्मादेतदुरुप्रसङ्गवशतो भावी भृशं निर्वृतः ॥ ३ ॥

ततः श्रीकुमारभूपः स्वसदनं प्राप्य विधिना कृपासुन्दरीदेव्याः पट्टबन्धं व्यधात् । तां च सर्वप्रकारैः प्रीतिकारिणीं पश्यन् स्वात्मानं द्वारवन्तं तयैव मेने कृतज्ञशिरोमणिः राजर्षिः । अथैकदा प्रियमतिप्रीतं प्रेमपरवशं च ज्ञात्वोवाच धर्मनन्दिनी, हे प्रियतम ! स्थापय पुनः स्वस्थाने मे जनकं, मोहं जित्वा पूरयास्मन्मनोरथांश्च । सतां हि प्रतिपन्नं मेरुचूलासहोदरम् । यतः—

जं जस्स कथं जं जस्स जंपियं जं च जस्स पडिवन्नम् ।
तं पालन्ति तह च्चिय, पत्थररेह व सुयणजणा ॥

तथा—

प्रारभ्यते न खलु विघ्नभयेन नीचैः,
प्रारभ्य विघ्नभयतो विरमन्ति मध्याः ।
विघ्नैः सहस्रगुणितैः प्रतिहन्यमानाः,
प्रारब्धमुत्तमजना न परित्यजन्ति ॥

प्रियाप्रणयवाणीश्रवणप्रोत्साहितः श्रीचौलुक्यो युद्धवीरतामात्मन्याविर्भावयन् श्रीधर्मभूपेन समं विमृश्य प्रारब्धवान् मोहं प्रत्यभिषेणनोद्योगम् । आकारितः सद्ध्यानसेनाध्यक्षः । सज्जीकारितान्तरङ्गचतुरङ्गसेना । वादिता जैनेश्वरवाणीसंग्रामभेरी । भिलन्ति स्म सर्वतो यमनियमादिभटाः । प्रक्षरिताः पवनवेगाः शुभाध्यवसायतुरगाः । गर्जन्ति स्म स्थैर्यधैर्यास्तिक्यानेकपाः । प्रस्थितः शुभवेलायां विजययात्रोचितवेषभृद् जिनाज्ञावज्रशीर्षको नवगुप्तिगुप्ताङ्गः सत्वखड्गब्रह्मास्त्रमूलोत्तरगुणबाणप्रगुणितार्जवार्जितधनुरादिषट्त्रिंशत्प्रहरणदुर्लक्ष्यः श्रीहेमाचार्यकृतरक्षाविधिः विंशतिवीतरागस्तवान्तर्द्धानकारिगुटिकार्पणजातमोहजयनिश्चयः श्रीधर्मशमदमविवेकादिमहासुभटविकटमूर्तिर्जगदजेयमनोजयगजाधिरूढः श्रीचौलुक्यः प्राप्तः क्वापि मोहराजासन्ने प्रदेशे । निवेशितः स्कन्धावारः । प्रेषितश्च ज्ञानदर्पणनामा दूतः । अज्ञानराशिप्रतिहारेण नीतोऽसौ मोहराजपर्षदि । दृष्टो मोहराजकुञ्जरः । स चैवम्—

" क्रूराचारचतुष्कषायचरणो मिथ्यात्वकायस्थिती
रौद्रार्ताध्यवसायलोचनधरो मीनध्वजोद्यत्करः ।
रागद्वेषरदाङ्कुरो भववनक्रोडे परिक्रीडताम्,
केषां मोहमतङ्गजो न तनुते वैधुर्यधुर्यं मनः ॥ "

भाषितः पार्श्वस्थेन मोहनृपमन्त्रिणा कदागमेन, भो दूत ! कस्त्वं ? केन च प्रहितः ? किमर्थम् ? चेत्युक्ते ज्ञानदर्पणः प्राह, हंहो मोहमन्त्रिन् ! ज्ञानदर्पणाह्वयः श्रीचौलुक्यचक्रवर्तिनाऽभ्यमित्रीणनृपश्रेणिशिरोमणिना प्रहितोऽस्मि । ज्ञापितं च श्रीचौलुक्यसिंहेन, यदुत भो मोह ! त्वयाऽद्य दुष्कलिबलावष्टम्भेन पराभूय निर्वासितः श्रीधर्मनृपतिः, स च न्यायनिष्ठः समाश्रितः साम्प्रतमस्माद्राजधानीम् । बहूपकृतश्च श्रीगुरुगिरा । तुष्टेन च श्रीधर्मभूभुजा गुरूपरोधप्रेरितेन दत्ता कृपासुन्दरी निजसुता श्रीकुमारभूमीभुजे । जातः संबन्धबन्धः । सम्प्रति तु शरणागतवज्रपञ्जर आश्रितवत्सलश्च समीहते श्वशुरं स्वराज्येऽभिषेक्तुं कृतज्ञचूडामणिः श्रीचौलुक्यकुलपर्वतः ।

सम्प्राप्त एव त्वामभिषेणयितुं ससैन्यश्रीधर्मसहायः श्रीचौलुक्यस्त्वत्पुरासन्ने । तस्मात्तत्रागत्य तदाज्ञामाल्यसुरभितं कुरु स्वशिरः । तदनु श्रुत्वैतन्मोहमहाराजो मुखमोटिकापूर्वं प्राह, रे दूत ! वाचाट किमेवं प्रलपसि ? कोऽयं पुंष्टिट्टिभः कुमारपालः ? यदेवं निर्वासितवराकधर्मनृपाधमप्रेरितो मां त्रिभुवनागञ्जेयपराक्रममभिभवितुमभिवाञ्छति । न खलु सकलत्रिभुवनाभोगाक्रमणालङ्कर्मीणप्रतापवैभवः श्रीमोहभूमीपालः परोलक्षैरपीदृशैर्नृपकीटकैर्भापयितव्यः । रे दूताधम ! याहि ज्ञापय स्वराज्ञे समागत एव मोहः ।

ज्ञानदर्पणः प्रोचे—रे मोहनृपपाश ! किमेवं गर्जसि ? शृणु—

" यस्त्वां प्राक् सपरिग्रहं निहतवान् ध्यानाग्निशस्त्रत्विषा,
तत्पादाम्बुजषट्पदो विजयते चौलुक्यचन्द्रो नृपः ।
येनेदं तव वल्लभं निजपुराद्देशाच्च निर्वासितम्,
द्यूताद्यं विटपेटकं शितिमुखं तत्किं मुधा गर्जसि ? ॥

मोहराजः पुनरूचे—रे दूत !—

असौ धर्मः परं केन, मुखेन प्राप्तवानिह ।
यो मया क्लीबवच्चक्रे, स्थानभ्रष्टो निर्जौजसा ॥ १ ॥
वर्षीयस्त्वात्पुरो जीवन्मुक्तोऽयं साम्प्रतं मया ।
करिष्यते रणमुखे, निश्चितं प्रथमाहुतिः ॥ २ ॥
युक्तं धर्मोऽतिवृद्धत्वाज्जज्ञे मरणसम्मुखः ।
परं परार्थे त्वद्भूपः, किं मुमूर्षति मूर्खवत् ? ॥ ३ ॥
हुं ज्ञातं धर्मनन्दिन्या प्रेरितस्तातसम्पदे ।
म्रियतेऽयं हहा ! योषिद्वश्यानां कियती हि धीः ॥ ४ ॥

मत्करेण मर्तव्यमेभिरिति विधिलिपिसत्यीकरणायायात एवाहं त्वत्पृष्ठ एव । त्वमपि स्वस्वामिनं धर्मं च रणोत्सङ्गे दर्शयेः इत्यादिनिर्भर्त्सितः समायातो ज्ञानादर्शो नृपपार्श्वे । मोहोऽपि दुर्ध्यानसेनान्यादिवृतो मात्सर्याभेद्यकवचधारी दुष्कृत्यप्रमादास्त्रपरंपराभासुरो नास्तिक्यद्विपारूढः कुशास्त्रवादित्रध्वनित्रासितानेकलोकः क्रोधादिकोटिभटरक्षितः समायातः श्रीचौलुक्यसेनासन्ने । निवेशितं सैन्यम् । आहूय प्रोत्साहिता रागकेशरिप्रमुखा एवं वदन्ति स्म । तथाहि—

रागः—अहो ! जाग्रति मयि को धर्मः ? कः कुमारपालः ? यतः—

अहल्यायां जारः सुरपतिरभूदात्मतनयां
प्रजानाथोऽयासीदभजत गुरोरिंदुरबलाम् ।
इति प्रायः को वा न पदमपदे कार्यत मया,
श्रमो मद्बाणानां क इव भुवनोन्मादिविधिषु ॥ इत्युक्ते

क्रोधः—

अन्धीकरोमि भुवनं बधिरीकरोमि,
धीरं सचेतनमचेतनतां नयामि ।

कृत्यं न पश्यति न येन हितं शृणोति,
धीमानधीतमपि न प्रतिसंदधाति ॥

अत्रान्तरे लोभदम्भाभिमानादयो भुजास्फोटाटोपं कोलाहलाकुलमिलामण्डलं कुर्वाणा गर्जन्ति स्म । श्रीचौलुक्यसिंहोऽपि ज्ञानदर्पणादवगतसमग्रवैरिबलप्रोत्साहोत्तेजितात्मा तृणमात्रं मोहभूपं गणयन् निजसैन्यं विनाऽपि मोहं जिगीषुः श्रीगुरुप्रसादित(योगशास्त्र)वज्रकवचं परिधायान्तर्धानकारिविंशतिवीतरागस्तवरूपदिव्यगुटिकाश्चोपयुज्य सहजान्तर्द्धानपाटवपटुश्रीमदार्यधर्मराजामात्य-पुण्यकेतुज्ञानदर्पणादिस्वल्पसहायः सैन्यप्रच्छन्नवृत्त्या प्रतस्थे । प्राप्तश्च क्षणादेव प्रत्यर्थिस्कन्धावारम् ।

राजा—भो ज्ञानदर्पण ! दर्शय मोहभूमीशाश्रयम् , येन करोमि तं हतप्रतापं हेलया ।

ज्ञानदर्पणः—देव ! पुरस्तादालोकमात्रादपि कातरनरकृतज्वरमिदं मोहराजसौधम् । इह प्रविश्यते ।

ततः प्रविष्टाः सर्वेऽपि । स्थिताः प्रच्छन्नवृत्त्या । कियद्वेलं दृष्टो मोहराजः, परितः परिवारश्च। श्रुतास्तदुल्लापा एवम् । तथाहि—

मोहः—

" पुंस्कीटः किल कोऽपि तिष्ठति स च श्रीमोहभूमिपतेः
प्राप्तो वैरिपदं रणाय हतको निःशङ्कमुत्तिष्ठते ।
दोर्दण्डात्त्रिजगद्विलुण्ठनकलाशौण्डास्तदेत्चिरा—
दुर्बुद्धेरसमञ्जसं व्यवसितं दैवस्य रे ! पश्यत ॥ "

अत्र **पापकेत्वमात्यः**—हे देव ! मनुष्यमात्रमिति माऽवमंस्था जगदेकवीरं श्रीचौलुक्यनृपतिम् । पश्य पश्य—

" अवातरद्धरापीठे, जनस्य सुकृतोदयात् ।
भावितीर्थङ्करः कोऽपि, रूपेणास्य महीपतेः ॥ "

मोहः (सक्रोधम्)—" वज्राग्निनेव क्षपिताः यत्प्रतापेन भूभृतः ।
मोहः सोऽहमहो ! कष्टं शृणोम्यरिपराक्रमान् ॥ "

इति वदन् कोपवशान्मोहः समादाय खड्गमासनादुत्थाय च अरे ! काऽसौ दुरात्मा मद्वैरिपोषकः ? । अत्रान्तरे

रागसूनुः—तात ! किमिदमस्थानक्लेशवैशसम् ? । मयैव ननु विद्धि सिद्धमरिवधकार्यम् । यतः—

गर्जद्गजेन्द्रभ्रमतः पयोदवृन्देऽपि यः सज्जयति क्रमं स्वम् ।
दृग्गोचरं तस्य गता मृगारेः, किमक्षता याति कुरङ्गजातिः ॥

द्वेषः—देव ! मर्त्यमात्रतपस्विनि कथं महान् सम्भ्रमः ? । किं न विदितमात्मसूनोर्विक्रमललितम् ? । यतः—

दन्ताग्रपातैर्महतो महीध्रान् समूलकाषं कषति क्षितौ यः ।

क्षुद्रद्रुमोन्मूलनमात्रमस्य, न पूरयेत्केलिमपि द्विपस्य ॥ इत्यादिना परेष्वपि निवारयत्सु

मोहराजः प्रोचे—किं बहुना

क्षुद्रक्ष्मापतिकोटिकीटपटलीकुट्टाकदोर्विक्रमा-
ऽऽध्मातस्वान्तममुं चुलुक्यनृपतिं हत्वा रणप्राङ्गणे ।
स्वर्गस्त्रीगणगीतविक्रमगुणः कर्ताऽस्मि निष्कण्टकम्,
साम्राज्यं भुवनत्रयेऽपि नितमामेकातपत्रं पुनः ॥

धर्मः—दुरात्मन्! विफलमनोरथो भूयाः ।

पुण्यकेतुः—प्रतिहतममङ्गलम् ।

ज्ञानदर्पणः—सर्वथा शासनदेवताः कुर्वन्तु रक्षां राजर्षेः ।

राजा—अवसरप्राप्तोपसर्पणोऽयं कलितशस्त्रः सम्प्रति मोहभूपः । अप्रहरणं ह्यशस्त्रे कुलव्रतं खलु चौलुक्यानामिति विचिन्त्य मुखाद्गुटिका आकृष्य प्रकटीभूय च जगाद, रे रे दुरात्मन्! कश्मलाचार! मोहाधम! स एष गूर्जरनरेश्वरोऽहं यमात्तशस्त्रस्त्वमन्विष्यसि । शृणु—

एषोऽहं भुवनोपकारकरणव्यापारबद्धादरो,
हारस्फारमरीचिसोदरयशस्कामो रिपोर्निग्रहात् ।
सोऽहं मोहममुं कृतान्तनगरं नेष्यामि वः पश्यताम्,
रे रे पञ्चशरादयः! कृतदयास्त्रायध्वमात्मप्रभुम् ॥

राजानमुदायुधं दृष्ट्वा पलायिता रागादयः ।

मोहः (सक्रोधम्)—अरे रे! मनुष्यकीट! चिरादन्विष्यता प्राप्तोऽसि तदेष न भविष्यसि ।

श्रीचौलुक्यः (साक्षेपं)—अपसर रे दुरात्मन्! परिवारवन्नश्यन्न निवार्यसे । नो चेदमुना ब्रह्मास्त्रेण यमातिथीकार्य एव ।

मोहः—

रागद्वेषमनोभवप्रभृतयस्तिष्ठन्तु वा यान्तु वा,
किं तैर्नाम न मे कचित् परमुखप्रेक्षी जयाडम्बरः ।
एकोऽप्येष तवाहमाहवतले त्रैलोक्यजिष्णुर्व्ययम्
शस्त्रैर्निस्त्रप! नश्यतोऽपि निशितैर्नेष्ये व्रतप्राणितम् ॥

चौलुक्यः—

अस्त्रं शीघ्रमरे! विमुञ्च समरे त्वं याहि चेज्जीवितुम्
वाञ्छस्यत्र तवैव नश्यति जने शस्त्रं न मे वल्गति ।
नो चेदेतदकाल एव भविता सङ्ग्रामसीमाङ्गणम्
प्रत्यग्रैः प्रतिपक्षपक्ष्मलदृशां नेत्राम्बुभिः पङ्किलम् ॥

मोहः—

दृष्टः पूर्वमहं त्वया न कथमप्युच्चैरभाग्योदयात्,

तत्किं न प्रसभं श्रुतोऽप्यरिवधूवैधव्यदीक्षागुरुः ।
येनैवं पुरगोपुरैकसुहृदा वक्रेण वल्गन्नलम्
धत्से सुप्तमृगारिजागरविधिं स्वं हन्तुमेव स्वयम् ॥

चौलुक्यः—अरे मोह ! किमेवंविधवाग्डम्बरमात्रमातनोषि, मुञ्च मुञ्च प्रथमं प्रहारं दत्तोऽयं तवावकाशः । अप्रहरत्सु प्रहरणकलाकुशला न खलु चौलुक्याः ।

शृणु किञ्च प्रतिज्ञां मे, जित्वा त्वां प्रधनेऽधुना ।
धर्मं चेत्स्थापये राज्ये, तदाऽहं वीरकुञ्जरः ॥ १ ॥
तन्निशम्य भृशं क्रुद्धो, मोहो वीरधुरन्धरः ।
अस्त्राणि वर्षितुं लग्नो जलानीव पयोधरः ॥ २ ॥

राजाऽपि प्रत्यस्त्रैस्तानि निराकृतवान् । एवं रणोत्सवे श्रीराजर्षिर्ब्रह्मास्त्रमादाय यावन्मोहं निपातयति तावत्—

तैस्तैः शस्त्रैरमोघैः स्वजनधनवधूसङ्गसाम्राज्यमुख्यैः,
कुण्ठीभूतैर्नृभर्तुः पविमयकवचं बिभ्रतो योगमङ्गे ।
मुक्त्वा लज्जां रणं च द्विप इव सहसा सिंहनादेन दैन्याद्,
गीर्वाणैर्दृश्यमानः सदयमयमपक्रान्तवान् मोहराजः ॥

सर्वे (सहर्षं)—प्रियं नः प्रियं नः (सहसोपसृत्य) जयतु जयतु राजर्षिः ।

सम्यग्दृष्टिदेवाः पुष्पवृष्टिं व्यधुः । सर्वत्र जयजयारवः । श्रीपरमार्हतो धर्मराजं प्रणम्योवाच, हे श्रीधर्मभूमीन्द्र ! त्वदनुग्रहान्निस्तीर्णप्रतिज्ञोऽस्मि तदलङ्कुरु स्वराजधानीं निर्मलमनोवृत्तिमिति विज्ञप्तः परमां मुदमधिगतः सन् श्रीधर्मोऽपि स्वराज्यपदवीमारोपितः प्राह श्रीकुमारभूपम्, राजन् ! भूयः किं ते प्रियं करोमि ? ।

श्रीचौलुक्यः—

निर्वीराधनमुज्झितं विदलितं द्यूतादिलीलायितम्,
देवानामपि दुर्लभा प्रियतमा प्राप्ता कृपासुन्दरी ।
ध्वस्तो मोहरिपुः कृता जिनमयी पृथ्वी भवत्संगमात्,
तीर्णः सङ्गरसागरः किमपरं तत्स्याद्यदाशास्महे ॥

तथाऽपीदमस्तु—

श्रीश्वेताम्बरहेमचन्द्रवचसां पात्रे मम श्रोतसी,
श्रीसर्वज्ञपदारविन्दयुगले भृङ्गायितं चेतसः ।
त्वत्पुत्र्या कृपया समं परिचयो योगस्त्वया सर्वदा,
भूयान्मे भुवने यशः शशिसखं मोहान्धकारच्छिदे ॥

एवं श्रीधर्मभूपं स्वराज्ये निवेश्य धर्मशालायामागत्य वन्दिताः श्रीगुरुपादाः । विज्ञप्तः सर्वोऽपि मोहविजयश्रीधर्मस्थापनादिवृत्तान्तः । श्लाघितश्चैतथम् । यथा—

सत्पात्रं परिचिन्त्य धर्मनृपतिस्तुभ्यं स्वपुत्रीं ददौ
तद्योगात्त्वमजायथास्त्रिभुवने श्लाघ्यप्रियासङ्गमः ।
स्मृत्वास्योपकृतिं निहत्य च रिपुं मोहाख्यमत्युत्कटं
राज्येऽप्येनमधाः कृतज्ञ ! सुचिरं चौलुक्य ! नन्द्यास्ततः ॥

इति श्रीगुरुदत्ताशीर्वादमुदितमनाः स्वसौधमलङ्कृतवान् । तदनु स्वजनकराज्यस्थापनवैरिमोह-मारितिरस्कारसततात्माज्ञाकारितादिगुणसंपत्तोषितया प्रतिदिनप्रवर्धमानप्रेमप्रकर्षातिशयया कृपासु-न्दरीदेव्या सह निस्सीमसौख्याम्बुधिमग्नो धर्मसाम्राज्याद्वैतमयं विश्वं चकार ।

II

निष्पुत्रो म्रियते यो यस्तस्य तस्य हताशयाः ।
पुत्रतां प्रतिपद्यन्ते नृपाः कष्टं धनाशया ॥

तदद्यप्रभृति मुक्तमेव मया मृतसर्वस्वम्, भवतु मे तृतीयव्रताङ्गीकारः संसारतारणायेति प्रति-पद्य राजपर्षदि सर्वसामन्तादिसमक्षं पञ्चकुलमाकार्य पृष्ट्वा च प्रतिवर्षं द्वासप्ततिलक्षद्रव्यायपदं ज्ञात्वा सन्तोषपोषितात्मा रुदतीवित्तं मुक्तवान्, पाटितं च पट्टकपत्रम् । तथा—

निःशूकैः शकितं न यन्नृपतिभिस्त्यक्तुं कचित् प्राक्तनैः,
पत्न्याः क्षार इव क्षते पतिमृतौ यस्यापहारः किल ।
आपाथोधि कुमारपालनृपतिर्देवो रुदत्या धनं,
बिभ्राणः सदयं प्रजासु हृदयं मुञ्चत्ययं तत्स्वयम् ॥

इति मृतस्वपरिहारपटहो दापितोऽष्टादशदेशेषु । अथान्यदा सर्वावसरसभामुपेयुषि श्रीचौलु-क्यदेवे

प्रतीहारः प्राह—देव ! महाजनो द्वारे तिष्ठति देवदर्शनार्थी ।

राजा—प्रवेशय सद्यः ।

ततः प्रतीहाराहूताश्चत्वारो महत्तरा आगत्य राजानं प्रणम्य लब्धासना वैलक्ष्योपलक्षिता उपविष्टाः ।

राजा—को हेतुरद्य राजसभाऽऽगमे ? । किमिदं वैलक्ष्यमिति किं कोऽपि पराभवोऽ-समाधिर्वोपद्रवो वा कोऽपि ? । तदनु

महाजनाः—

कुतः प्रजानां राजेन्द्र ! त्वयि शासति मेदिनीम् ।
पराभवोऽसमाधिर्वा जायते जनवत्सल ! ॥ १ ॥
कदाचिदन्धकारः स्याद्विश्वे भास्वति भास्वति ।
परं त्वदुदये स्वामिन् ! न किञ्चिदसमञ्जसम् ॥ २ ॥

परमत्रत्यो गूर्जरनगरवणिग्मूर्द्धन्यः कुबेरश्रेष्ठी देवपादविदितो बहुस्वर्णकोटिध्वजः समुद्रे समा-गच्छन् कथाशेषतया स्वामिपादानामसेवकतामगादिति तत्परिच्छदो निष्पुत्र आक्रन्दन्नस्ति । तद्गृह-

द्रव्यं राजा यद्यात्मसात् कुरुते तदा तस्यौर्ध्वदेहिकं क्रियते । कियत्तद्धनम् ? इति पृष्टेऽतिपुष्कलमित्याहुस्ते महत्तराः । ततः कृपापरिणीतो राजा स्वचेतसि चिन्तितवानेवम्—

आशाबन्धादहह ! सुचिरं सञ्चितं क्लेशलक्षैः
केयं नीतिर्नृपतिहतका यन्मृतस्वं हरन्ति ।
क्रन्दन्नारीजघनवसनक्षेपपापोत्कटाना-
माः किं तेषां हृदि यदि कृपा नास्ति तत्किं त्रपाऽपि ॥

ततो भो महत्तराः ! मया मृतस्वग्रहणं तृतीयव्रतप्रतिपत्त्यवसरे श्रीगुरुपादपार्श्वे प्रत्याख्यातम्, परं कौतुकात्तस्य व्यवहारिणो गृहं गृहसारं च विलोकयामः, इत्युक्त्वा महत्तरादिपरिवृतः सुखासनाधिरूढस्तद्गृहमाजगाम राजकुञ्जरः । तदनु सौवर्णकलशपरम्पराक्वणत्किङ्किणीक्वाणवाचालितव्योममण्डलं कोटिध्वजावलिहस्तिशालातुरगशालादिविराजितं तं कुबेरगृहं विलोक्य प्राह

नृपः—

पर्यायस्तुहिनाचलस्य यमकं पीयूषकुण्डस्य च
क्षीराब्धेरभिधान्तरं प्रतिकृतिः शीतांशुलोकस्य च ।
वीप्सा चन्दनकाननोदरभुवोऽभ्यासश्च धारागृह-
स्यार्हच्चैत्यमिदं प्रपञ्चयति नः शैत्यं वपुश्चेतसोः ॥

तत्र चैत्ये मरकतमणिमयीं श्रीनेमिजिनप्रतिमां नमस्कृतवान् । रात्नसौवर्णकलशस्थालारात्रिकमङ्गलप्रदीपादिदेवपूजोपकरणादि विलोक्य कुबेरपुस्तिकास्थं परिग्रहपरिमाणपत्रं वाचितवान् । यथा—

गुरुपादकमलमूले गृहमेधिजनोचितानिमान्नियमान् ।
प्रतिपद्यते कुबेरो वैराग्यतरङ्गितस्वान्तः ॥ १ ॥
जन्तून् हन्मि न वच्मि नानृतमहं स्तेयं न कुर्वे परस्त्री-
र्नो यामि तथा त्यजामि मदिरां मांसं मधु म्रक्षणम् ।
नक्तं नाद्मि परिग्रहे मम पुनः स्वर्णस्य षट्कोट्य-
स्तारस्याष्ट तुलाशतानि च महार्हाणां मणीनां दश ॥ २ ॥
कुम्भखारीसहस्रे द्वे, प्रत्येकं स्नेहधान्ययोः ।
पञ्चायुतानि वाहानां सहस्रमपि हस्तिनाम् ॥ ३ ॥
अयुतानि गवामष्टौ ८०००० पञ्च पञ्च शतानि च ।
हलाट्टसद्मनां यानपात्राणामनसामपि ॥ ४ ॥
पूर्वजोपार्जिता लक्ष्मीरियत्यस्तु गृहे मम ।
इतो निजभुजोपात्तां करिष्ये पात्रसात्पुनः ॥ ५ ॥

एवं कुबेरव्यवहारिऋद्धिपत्रवाचनेन हृतहृदयो राजा गृहाङ्गणे यावदागच्छति तावता कुबेरमाता गुणश्रीः—

पुत्तकुबेर ! गुणायर ! गओसि तं कत्थ देहि पडिवयणम् ।

हा वच्छ ! पिच्छ लच्छी तए विणा जाइ रायहरं ॥

एतत् श्रुत्वा राजा चिन्तितवानेवम्—

नरकान्तं भवेद्राज्यमित्यार्यैं यदुदीर्यते ।
तन्नूनं रुदतीवित्तसमाकर्षणपाप्मना ॥

पृष्टवांश्च के एते स्त्रियौ ? ।

महाजनः— देव ! कुबेरमाता गुणश्रीरेषा, अपरा तु कमलश्रीस्तज्जाया । अत्रान्तरे—

वीक्ष्य तत्र कुबेरस्य जायामाक्रन्दकारिणीम् ।
मातरं च हहा वत्स ! क्व गतोऽसीति वादिनीम् ॥

तत्रासन्ने च सिंहासनाधिरूढः प्राह—हे मातः ! किमेवं शोकविक्लवाऽसि ? यतः—

आकीटाद्यावदिन्द्रं मरणमसुमतां निश्चितं बान्धवानाम्,
सम्बन्धश्चैकवृक्षोषितबहुविहगव्यूहसाङ्गत्यतुल्यः ।
प्रत्यावृत्तिर्मृतस्योपलतलनिहितप्लुष्टबीजप्ररोह-
प्राया प्राप्येत शोकात्तदयमकुशलैः क्लेशमात्मा मुधैव ॥

इत्युपदिश्य पृष्टा, कः समायातः ? । गुणश्रीराह वामदेवनामा मित्रम् । आकारितश्च स राज्ञा पृष्टश्च समुद्रगमनादि वृत्तम् । वामदेवोऽपि नत्वा विज्ञपयति स्म । देव ! श्रीचौलुक्यचन्द्र ! इतः कुबेरव्यवहारी चतुर्षु महत्तरेषु गृहसारं न्यासीकृत्य भृगुपुरात् पञ्चपञ्चशतमनुष्योपेतपञ्चशतप्रवहणैः प्राप्तः परकूलम् । तत्र चतुर्दशकोटिस्वर्णलाभः । ततः प्रतिनिवृत्तानां प्रतिकूलवायुना पञ्चशतप्रवहणानि पातितानि विषमगिरिवलयसङ्कटे । पूर्वमपि तत्र कस्यचित् पञ्चशतप्रवहणानि पतितानि सन्ति । पोतानामनिर्गमेन बाढं विषण्णः सपरिवारः कुबेरस्वामी । अत्रान्तरे समागतः कश्चिन्नौवित्तो नावारूढः । भणितं च तेन, भो लोकाः ! दर्शयामि निर्गमोपायम् । भणितश्च कुबेरेण, भो बान्धव ! कुतः समायातः ? किं नाम च ? इति । ततस्तेनोक्तम्, अस्त्यत्रासन्ने पञ्चशृङ्गो द्वीपः । तत्र सत्यसागरो राजा । तेन चैकदा मृगयागतेन हता सगर्भा मृगी । मृगोऽपि तन्मरणं दृष्ट्वा स्वयं मृतः । तेन वैराग्येण सत्यसागरनृपेण स्वदेशेऽमारिपटहो दापितः । अद्य पूर्वप्रेषितकीरमुखाद्युष्मदापदं ज्ञात्वाऽहं नौतासो नाविको निर्गमोपायदर्शनाय प्रहितोऽस्मि राज्ञा । कुमारभूपः—अहो ! महात्मनो महती कृपा सर्वसत्त्वसाधारिणी । ततः किम् ? । वामदेवः—देव कुबेरस्वामिना निर्गमोपायं पृष्टः । प्राह नाविकः, एतस्य गिरेः कटके द्वारमस्ति । तेन प्रविश्य गिरेः परत्रपार्श्वे गम्यते । तत्र पुरमुद्वसमस्ति । तत्र च जिनचैत्ये गत्वा पटहा वाद्यन्ते । तेषां महता निस्वनेन गिरिशृङ्गसुप्ता रात्रौ भारुण्डपक्षिणः समुड्डीयन्ते । तेषां पक्षवातेन प्रवहणानि मार्गे पतिष्यन्तीति । तदनु कुबेरस्वामिना तत्र गमनाय पृष्टाः सर्वे जनाः, कोऽपि न प्रतिपद्यते । ततोऽसमसाहसी परमकृपापरवशः कुबेर एव गतः । नाविकोक्तमनुष्ठितं तत्र गत्वा । निर्गतानि सहस्रप्रवहणानि भृगुपुरे च प्राप्तानि क्षेमेणेति । अतोऽग्रतः कुबेरस्वरूपं नावगच्छामि । एवं विंशतिकोटिस्वर्णाष्टकोटिरौप्यसहस्रतुलामितरत्नादिकुबेरधनं नृपगृहानुपतिष्ठते, इत्युक्ते महत्तरैर्निरीहशिरोमणिः तद्द्रव्यं तृणवदगणय्यैवंविधासमदयासाहसधनी स पुरुषोत्तमः जीवन्नेव समागच्छतीति गुणश्रियमाश्वास्य यावता पश्चान्निर्गच्छति तावता

कुबेरो विमानाधिरूढः सजायः समागात्। विमानादवतीर्य मातुः पादौ प्रणम्य राजानं प्रणनाम। राजा सर्वोऽपि महाजनः अहो! महदाश्चर्यं कुबेरः समायात इति वदन्ति।

राजा च पृष्टवान्। हे साहसधन! शून्यपूरे किमभूत्?।

कुबेरः—स्वामिन्! तत्र पुरे एकत्र प्रासादे कन्या दृष्टा पृष्टा च। तया चोक्तम्—अत्र पातालतिलकपुरे पातालकेतुर्विद्याधरो राजा। पातालसुन्दरी भार्या। तयोः सुतां पातालचन्द्रिकानाम्नीं मां कन्यकां विद्धि। स च मत्पिता मांसलोलुपतया कियता कालेन मार्जारीभक्षितपूर्वसंस्कृतमांसाभावाद्बन्धुकीत्यक्तबालमांसभक्षणसंजातमहामांसाशनव्यसनो राक्षसोऽजनि। नगरं सर्वं भक्षितम्। सम्प्रति स्वाहाराय कापि गतोऽस्तीति। अत्रावसरे पातालसुन्दरी समायाता। पातालकेतुरपि भार्यया पर्यवसाप्य कन्यां परिणायितोऽहम्। मयापि पातालकेतुः प्रतिबोधितः। तेन विद्याधरेण विमानमारोप्य सभार्योऽहमत्रानीय मुक्तः। स च स्वस्थानं प्राप्तः इति श्रुत्वा विस्मितः श्रीचौलुक्यः प्राह—

निर्मूल्यं गणितं निजं परपरित्राणे तृणं जीवितं
पाणौ कृत्य नभश्चरीयमचिरात्कल्याणिनी प्रीणिता।
प्राप्तः कोणपतां नृपो विधिवशाद्धर्माध्वनि स्थापितः
स्वं धामानुसृतं कुबेर! भवता किं किं कृतं नाद्भुतम्?॥

गृहाण च स्वलक्ष्मीं कुबेरदत्त! इत्यभिनन्द्य गुरुवन्दनाय जगाम—

तत्कर्तव्यं नृपोपज्ञं विज्ञाय जनतामुखात्।
उच्चैश्चमत्कृतश्चित्ते हेमाचार्यस्तमूचिवान्॥ १॥
न यन्मुक्तं पूर्वैं रघुनघुषनाभाकभरत-
प्रभृत्युर्वीनाथैः कृतयुगकृतोत्पत्तिभिरपि।
विमुञ्चन् संतोषात्तदपि रुदतीवित्तमधुना,
कुमारक्ष्मापाल! त्वमसि महतां मस्तकमणिः॥ २॥
अपुत्राणां धनं गृह्णन् पुत्रो भवति पार्थिवः।
त्वं तु सन्तोषतो मुञ्चन् सत्यं राजपितामहः॥ ३॥
इत्थं श्रीगुरुणा नरेश्वरशतैराशास्यमानो मुदा
निर्वीराभिरनेकधा च सकलैर्लोकैः स लोकोत्तरः।
लक्षाणां द्रविणस्य रेणुवदिह द्वासप्तति वर्जयन्
प्रत्यब्दं स्तुतिभाजनं न हि भवेत्कस्य प्रशस्यात्मनः॥ ४॥

(From Jinamandana's Kumârapâlaprabandha.)

INTRODUCTION.

आज्ञावर्त्तिषु मण्डलेषु विपुलेष्वष्टादशस्वाद रा-
दब्दान्येव चतुर्दश प्रसृमरां मारीं निवार्यौजसा ।
कीर्त्तिस्तम्भनिभांश्चतुर्दशशतीसंख्यान्विहारांस्तथा
कृत्वा निर्मितवान् कुमारनृपतिर्जैनो निजैनोव्ययम् ॥

The present work the Moharâjaparâjaya or the Over-coming of King Moha is a drama in five acts describing the conversion of Kumârapâla, the Chaulukya king of Gujarat to Jainism, his prohibition of injury to animals and the stopping of the old practice of confiscating the properties of those dying heirless, through the religious instructions of the great Hemachandra.

The form of the play—The play is allegorical and resembles in subject-matter and treatment the Christian plays of mediæval Europe. The Sanskṛta literature, too, has got such other plays,[1] the most well-known of which is the Prabodhachandrodaya of Kṛshṇamiśra composed in the reign cf Kîrtivarmadeva, the Chandel king, about 1065 A. D. i. e. about a century earlier than the present drama. All the *dramatis personœ* except the king, his jester and Hemachandra are abstract qualities good as well as evil. Such personification of abstract qualities is familiar to the readers of the "Pilgrim's Progress."

The author and the date of the composition of the drama—The author of the drama is Yaśahpâla, son of Dhanadeva and Ṛkmiṇî of the Modha Bania caste. His father Dhanadeva is styled as Mantrin and the author describes himself as a swan in the lotus-feet of Chakravarti Ajayadeva.

Chakravarti Ajayadeva is the same as Ajayapâla, the successor of king Kumârapâla, who is also styled as Chakravarti on page 16 of the present work. The Gûrjara kings Siddharâja and Bhîmadeva II also assumed the title of Chakravartin. Ajayadeva reigned from A.D. 1229 to 1232. The date of the composition of the drama should be, thus, put between these years. The drama was first acted on the occasion of the festival of the idol of God Mahâvîra of the Kumâravihâra (the temple erected by Kumârapâla) at Thârâpadra (the modern Tharád in the Pálanpur Agency) of which place the author would appear to be a governor or resident.

The analysis of the play—The play begins with a salutation to the three Tîrthankaras—Ṛshabha, Pârśva and Mahâvîra. Then follows the usual

1. Other works of this type are:—(1) Prabodhachandrodaya, (2) Sankalpasûryodaya by Venkaṭanâtha, (3) Mâyâvijaya by Anant Nârâyaṇa Sûri, (4) Jñânasûryodaya by Vâdichandra, (5) Jñâṇachandrodaya by Padmasundara, (6) Chaitanyachandrodaya by Kavi Karṇapûra.

dialogue between the stage-manager and his wife about the representation of the present drama and its author. The prelude being over, the king Kumârapâla enters the stage with his jester. The king remembers Hemachandra with gratitude. The jester takes him to task for his religiousity. Jñânadarpaṇa, a spy sent to inquire about the return of the enemy king Moha, then comes and relates to him the news got by him. He tells him that he went to the camp of the enemy but for long he could not even get entrance, as the clever guard प्रमाद was on his watch incessantly day and night. He, however, at last got entrance under the guise of a sage. There he was received by the circle of heretics (पाखण्डमण्डल), but could not for many days get any news about Moha. Once he saw the mobilization of the army of the enemy for an attack on the capital of विवेकचन्द्र. He, too, accompanied the army, which besieged जनमनोवृत्ति, the capital of विवेकचन्द्र. Vivekachandra occupied the fort named सदाचार. A fierce battle ensued. The enemy obstructed the great river धर्मचिन्ता. The city was consequently much agitated but the preceptors opened the secret wells of सदागम, and the people were, as it were, given a new life. But Cupid and others of the city joined the side of Moha and gave him the news. The enemy then covered the wells with रजः, tied the wheels of अविनय, prohibited the entrance of the messengers प्रबोध etc., and made holes in the fort. Inside also the stock of food and fuel in the form of यम and नियम fell short. विवेकचन्द्र in consultation with his ministers, Vimarsha and others, requested the enemy through the messenger काल for giving the Dharmadvâra. The enemy granted his request and विवेकचन्द्र left the city with his bride शान्ति and his daughter कृपासुन्दरी. The enemy then completely occupied the capital. It was not known where Vivekachandra was at the time. Kumârapâla is delighted to hear the name of कृपासुन्दरी. Continuing further the spy told him that he saw a lady, who told him that she was कीर्तिमंजरी, the daughter of सच्चरित्र through his queen नीति and the wife of Chakravarti Kumârapâla. She complained about Kumârapâla's indifference towards her brother प्रताप and herself. Once she and her nurse गुणावली were taken by the king's man त्याग to the forest on the sea-shores. There she fell into the sea, but was saved, and afterwards took the vow of an ascetic and stayed in forest. Once her brother प्रताप came from the king and informed her that the king had become attached to the Jain Muni and he was advised by him to remove कीर्तिमञ्जरी far away and banish प्रताप. कीर्तिमञ्जरी in anger joined the army of Moha, who through her instigations made a vow that either he should not be or he should kill Kumârapâla on the battlefield. He had adopted the means of making a split in his subjects and had won over to his side the whole court. Now he will make an invasion. कीर्तिमञ्जरी asked Jñânadarpaṇa of the result. Jñânadarpaṇa said that Moha himself had indicated his defeat by his words "Either I should not be or Kumârapâla should die at my hands."

कीर्त्तिमञ्जरी, pained to hear this, went away and he (Jñânadarpaṇa) came there. King Kumârapâla then expresses his determination to overcome King मोह. Behind the stage a bard describing the mid-day Sun indicates that it is time of worship, and the king and the spy leave the stage.

The Second Act. The minister पुण्यकेतु enters the stage and says that he has accomplished the work of uprooting enemies and that the news about मोह has been conveyed to Kumârapâla, who has been made very angry with him. The friendly astrologer गुरूपदेश has, moreover, said that the king by marrying कृपासुन्दरी, the daughter of विवेक, will overcome मोह, the enemy of the three worlds. Thus the overthrow of the enemy depends upon the marriage. But व्यवसायसागर, who is sent to bring विवेकचन्द्र, is tarrying. व्यवसायसागर comes and tells him that विवेकचन्द्र has been brought by him with his wife and daughter to the capital and has been given residence in the penance-grove of Hemachandra and that he has been introduced to the king before the preceptor. Thus the king gets an opportunity of seeing कृपासुन्दरी, who looked at him with love. The king gives residence to विवेक in his drawing room. Here ends the interlude.

The king now enters with the jester. The king shows intense love for कृपासुन्दरी and in order to divert himself he enters the garden धर्म, where the great tree दम grew. Here he sees कृपासुन्दरी sprinkling the tree with the pot of meditation with her companion सोमता. The king approaches and the eyes of both meet together. When she goes to touch the tree, the king takes hold of her hand. When she is engaged in sprinkling, the king's pleasure-parrot relates to her friend that Kumârapâla has taken vows of stopping the practice of confiscating the property of those dying heir-less and the banishment of the seven vices from' his kingdom. In the meanwhile the queen राज्यश्री enters the garden with her companion रौद्रता and sees the king with कृपासुन्दरी. The queen is much enraged and the king tries to appease her by falling at her feet but his overtures are not accepted and the queen goes away in fury. The king also then leaves the garden on account of twilight.

The third act. The minister पुण्यकेतु manages to hide one of his servants behind the image of the goddess whom the queen राज्यश्री goes to worship to get the boon of making कृपासुन्दरी disfigured. The servant behind the deity tells her that the marriage of कृपासुन्दरी with Kumârapâla should be accomplished, as through that only he would be able to overcome मोह and that she should personally go and request विवेकचन्द्र for the hand of his daughter and that कृपासुन्दरी being the daughter of शान्तिकुमारी, the sister of her mother त्यागपताका, she should not entertain jealousy. The queen then approaches विवेकचन्द्र, who, while accepting the offer, tells her about the vow of his daughter about the stopping of the practice of confiscating the property of those dying heirless, and the banishment of the seven vices. The queen consents to accomplish this and through her servant व्यवस्था requests the king to do these things. The king consents.

At this time four merehants approach the king and request him to send some officer to take possesion of the properties of a big millionaire of the capital named Kubera, who was supposed to be dead in a sea-voyage. The king goes to his mansion and is much pleased to see his immense property consisting of gold, silver, pearls, horses, elephants etc. The king consoles Kubera's mother and issues a general order to stop the practice. Meanwhile Kubera suddenly comes with his newly married wife in an air-ship and all are delighted to see him return safely.

The Fourth Act. देशश्री enters the stage longing to see her younger daughter नगरश्री, and meets वनराजी, a friend of नगरश्री, who takes her to नगरश्री. देशश्री asks her mother why she has been changed. नगरश्री relates how her lord Kumârapâla has adopted the Jain faith and has given up flesh-eating and hunting and thus she has also become a Jain. नगरश्री describes to her the nature of the Jain religion and देशश्री consequently adopts the Jain faith. देशश्री asks her why she has put on special dress and ornament. नगरश्री replies that the king has just returned from his pilgrimage to Mts. Śatruñjaya and Girnar and that there is a festival to celebrate his entrance in the city.

Both of them then meet कृपासुन्दरी, who feels uneasy and is diverted by her friends सोमता, and वनराजी. देशश्री contracts friendship with कृपासुन्दरी. Noises of hunting and fishing are heard and disgusted at these कृपासुन्दरी begins to go away but is stopped. But a fresh noise of the cry of Dharmakuñjara, a police officer newly appointed by the minister पुण्यकेतु to search out the men of the enemy, make them able to depart. Then enters the police officer (दाण्डपाशिक) धर्मकुञ्जर with two footmen (यम & नियम) and some other man, who inadvertently gives his real name संसार, and from the pill of lac with him a letter is found. The man is taken to the king and there the letter is read. It is addressed to कलिकन्दल by King मोह, who informs him that a new man मिथ्यात्वराशि in the form of a तापस is sent to his help and he is to be utilised along with four other men काम, गर्व, छद्म & लौल्य sent to him and that the carrier संसारक is sent to hasten him in this work. The king orders संसारक to be chained. धर्मकुञ्जर tells him that नगरश्री has requested him to banish the vices for stopping the entrance of the men of the enemy and also for fulfilling the vow of कृपासुन्दरी. The king orders him to take hold of the vices Gambling, Flesh-eating, Drinking and Slaughter. Theft and Adultery have been already expelled from the city. Concubinage may, however, be overlooked as it is immaterial if it goes or stays. धर्मकुञ्जर goes in search of them and finds द्यूत with his wife असत्यकन्दली, मद्य, जाङ्गलक, सूना and मारी gathered together.

All these talk about the change in the king's religion and the rumours of their banishment. रहमाण predicts 12 years' banishment. धर्मकुञ्जर siezes them all and brings them before the king. All plead their cause and tell him how the ancient kings and even his ancestors Vanarâja and others were addicted

to them. They also tell him that they brought large revenues to the State. The king does not listen to them at all and orders their banishment.

The fifth act. King विवेकचन्द्र enters the stage and expresses his joy at the marriage of his daughter कृपासुन्दरी with Kumârapâla, which Jinamaṇḍana says occured in Samvat 1216.[1] He then approaches the king. Jñânadarpaṇa, who was sent to inquire about the movements of the enemy, enters and gives his report. He went there as a bard of Kumârapâla and cajoled King Moha. Moha's force consists of राग, द्वेष, अनङ्ग, कोप, गर्व, दम्भ, पाखण्ड, कलिकन्दल, मिथ्यात्वराशि, पञ्चविषय, प्रमाद, पापकेतु, शोक and शृङ्गारिरस. The vices, too, have joined him. कीर्तिमञ्जरी and प्रताप have instigated king Moha for an attack on Kumârapâla. Moha is coming forwards, though disuaded by his minister पापकेतु. The minister पुण्यकेतु enters and gives to the king योगशास्त्र as a steel armour and विंशतिवीतरागस्तुति as divine pills fcr keeping in the mouth, all sent by Hemachandra, so that he may be invulnerable and invisible to the enemy. King Kumârapâla now attended by पुण्यकेतु, विवेकचन्द्र and ज्ञानदर्पण, who shows the camps of Râga and others, comes near the residence of Moha. King Moha is with his minister पापकेतु and hearing the reports of his spy कदागम, who tells him about the marriage of कृपा with Kumârapâla and the prophecy that after the marriage Kumârapâla will overcome Moha, he calls his warriors. Kumârapâla removes the pills from his mouth and becomes visible. A fierce battle takes place, wherein Kumârapâla overcomes Moha, who flies away with his army. The king then enters, makes Viveka to re-enter his capital जनोमनोवृत्ति, which was wrested from him by Moha.

Historical Information to be derived from the play. Kumârapâla wandered abroad through curiosity and got the empire of Gujarat through his luck. He delighted the hearts of the people plunged in sorrow by the death of Siddharâja.[2] Kumârapâla built Tribhuvanavihâra and 32 other royal temples for the expiation of the sin of flesh-eating to which he was much addicted before his conversion.[3] Kumârapâla overcame the king of Śámbhar through his valor.[4] The blessed Tyâgabhaṭa (Charity?), best among princes,

---

(1) कृपासुन्दर्याः संवत् १२१६ मार्गशुदिद्वितीयादिने पाणिं जग्राह श्रीकुमारपालमहीपालः श्रीमदर्हद्देवतासमक्षम् ।

Jinamaṇḍana's Kumârapâlaprabandha.

(2) एको यः सकलं कुतूहलितया बभ्राम भूमण्डलं
प्रीत्या यत्र पतिंवरा समभवत्साम्राज्यलक्ष्मीः स्वयम् ।
श्रीसिद्धाधिपविप्रयोगविधुरामप्रीणयद्यः प्रजां
कस्यासौ विदितो न गूर्जरपतिश्चौलुक्यवंशध्वजः ॥ I–28

(3) एदं रायणा काराविदं तिहुयणविहारुत्ति देउलं । IV–p. 93
जित्तिया दिया इत्तिए जिणविहारे कारावसुत्ति । अदो एदे विहारा रन्ना काराविदत्ति ।

(4) देव गुज्जरनरेसर परक्कमक्कंतसायंबरीभूपाल ! IV–p. 106

who had resorted to the king of Śámbhar, has undertaken an expedition against Kumârapâla at this time of his conversion.[1] The period of banishment of the vices was of 12 years showing that after Kumârapâla's death the State influence of Jainism declined.[2] The Chaulukya kings lived in the same palaces as those of the Chávdá kings.[3] Hemachandra's new grammar Siddha-Hema had already commenced to be studied in Gujarat.[4] The Yogaśâstra and Vimśati-Vîtarâgastutis were composed by Hemachandra for Kumârapâla.[5]

Condition of the society in Gujarat as depicted in the play. The Banias of the capital (Anhilwad) were very affluent. There were many millionaires and over the mansions of the Kotiśvaras (those possessing a crore and more) there were hoisted huge banners with ringing bells. Their grandeur was quite royal. They had elephants and horses and maintained alms-houses. The staircases were constructed of crystal stone and temples with crystal floor were attached to the mansions. Pictures illustrating events from the lives of the Jinas were painted on their walls. There were also boxes made of crystal for putting religious books. The Jain millionaries took vows to keep a certain amount of wealth and property in their possession and the surplus was to be spent away in religious works. Kubera had vowed to keep six crores of gold coins, 800 Tulâs of silver and 8 Tulâs of valuable jewels, 2000 Kumbhas of grain, 2000 Khâris of oil, 50000 horses, 1000 elephants, 80000 cows, 500 each of ploughs, shops, houses, carriages and waggons.[6] The merchants earned enormous wealth by sailing to foreign waters. When a person died

---

(1) धन्यस्त्यागभटः कुमारतिलकः शाकम्भरीमाश्रितो
योऽसौ तस्य कुमारपालनृपतेश्चौलुक्यचूडामणेः ।
युद्धायाभिमुखोऽभवज्जयविधिस्त्वास्यं विधिः प्रेक्षते
प्रोद्गर्जन् विफलं शरद्घन इव त्वं केवलं वल्गसि ॥ V–36

(2) धणियसासणानुवत्तिय ! बारसवरसियं पवासवसणदुहं वो दीसदि । IV p. 102

(3) इह धवलहरेसु चिरं चावुक्कडरायलालिओ वसिओ । IV–47

(4) कइविसेसनवनिबद्धविसुद्धसिद्धहेमणामहेयवागरणपढणत्थं उवणीदो उवज्झायस्स कुमारो। I–p. 2

(5) देव ! प्रसादनाम्नो राजपुरुषस्य हस्ते प्रहितमिदं गुरुणा श्रीहेमचन्द्रेण भवतो युद्धश्रद्धालुमनसो योगशास्त्रं नाम वज्रकवचम् । इमाश्च वीतरागस्तुतिसंज्ञा विंशतिर्दिव्यगुलिकाः ।

(6) गुरुपादमूलकमले गृहमेधिजनोचितानिमान्नियमान् ।
प्रतिपद्यते कुबेरो वैराग्यतरङ्गितस्वान्तः ॥

तद्यथा—

जन्तून् हन्मि न वच्मि नानृतमहं स्तेयं न कुर्वे पर-
स्त्रीर्नो यामि तथा त्यजामि मदिरां मांसं मधु म्रक्षणम् ।
नक्तं नाद्मि परिग्रहे मम पुनः स्वर्णस्य षट् कोटय-
स्तारस्याष्ट तुलाशतानि च महार्घाणां मणीनां दश ॥ ३९ ॥

heirless his property was confiscated to the State. The State-officers took possession of the house, a Panchakula was appointed and it was only after all the things were taken away by the State-officers, that the dead body could be removed. This gave much trouble to the people. Prostitution was not considered a great sin.[1] Gambling was very common even among kings and the public. On religious occasions the people gambled freely. Five kinds of gambling are described. 1 अन्धय which is daily resorted to by kings on squares with a small piece of cloth on their privities. 2. नालय which is played by bankers with plenty of gold. 3. चतुरङ्ग which seems to be the same as chess. 4. अक्ष dice, with which the Kauravas won a kingdom. 5. वराड playing with cowries common with boys.[2] The description of gamblers too is given. Of some, hands, feet and ears are chopped off. Of others, eyes are removed. Some are without nose and lips, of some all the limbs are cut off, while others go naked.[3]

Among the gamblers were to be counted the following royal personages 1 Son of the king of Mewar, 2 Brother of the king of Soraṭha, 3 the Lord of Chandrâvatî, 4 Nephew of the king of Nadol, 5 Nephew of the king of Godhra, 6 Sister's son of the king of Dhârâ, 7 Maternal uncle of the king of Śâkambharî, 8 Step-brother of the king of Konkan, 9 Brother-in-law of the

---

कुम्भखारीसहस्रे द्वे प्रत्येकं स्नेहधान्ययोः ।
पञ्चायुतानि वाहानां सहस्रमपि हस्तिनाम् ॥ ४० ॥
अयुतानि गवामष्टौ पञ्च पञ्च शतानि तु ।
हलाट्टसद्मनां यानपात्राणामनसामपि ॥ ४१ ॥
पूर्वजोपार्जिता लक्ष्मीरियत्यस्तु गृहे मम ।
इतो निजभुजोपात्तां करिष्ये पात्रसात्पुनः ॥ ४२ ॥

(1) वेश्याव्यसनं तु वराकमुपेक्षणीयम् । न तेन किञ्चिद्गतेन स्थितेन वा ।

(2) एयं अंधियनामं रूवं पसयच्छि ! चच्चरे पिच्छ ।
जं सेविज्जइ निच्चं कयकोवीणेहिं निवईहिं ॥ ५ ॥
अवरं मयच्छि ! पिच्छसु मह रूवं इत्थ नालयं नाम ।
उवणीयकणयकोडीहिं सेवियं वणियपुत्तेहिं ॥ ६ ॥
तइयं नियसु नियंबिणि ! इणमो चउरंगयं ति मह रूवं ।
जत्थ अरिकन्नकडुया खडक्खडा अमयसारिच्छा ॥ ७ ॥
दच्छे ! इमं नियच्छसु चउत्थमक्खाभिहाणयं रूवं ।
कुरुतणया भूमिवई जस्स पसाएण संजाया ॥ ८ ॥
पंचमयं मह रूवं वराडनामं इमं निहालेसु ।
सेवाइ जस्स डिम्भा गयंपि कालं न याणंति ॥ ९ ॥

(3) केवि कट्टियचरणकरकन्न, किवि कड्डियनयणजुय, केवि नक्कअहरिहि विवज्जिय ।
किवि लूणसव्वावयव केवि जेव खवणय अलज्जिय ॥

king of Cutchha, 10. Sister's son of the king of Marwar, and 11 uncle of the Chaulukya King.[1] They delighted so much in gambling that even if there died in their house father, mother, wife or son, they went on gambling without any sorrow.[2] Śûdraka won his empire through gambling.[3]

Four sects are given as advocates of the principle of slaughter.

1. कौल advocating unrestrained use of flesh and wine. 2. कापालिक preaching cannibalism i. e. eating flesh of a man in the scull of a noble man. 3. रद्दमाण Dhanika says there is no sin in eating flesh. 4 घटचटक who preaches that one who forces the soul from the prison of the body, attains the highest goal.[4] Nâstika says there is no soul, and there is no sin in killing a man. Therein lies religious merit. This is the doctrine of Bṛhaspati.[5]

On festive occasions the citizens had to water the highroad of the Market, and decorate the shops with pearl-necklaces and beautiful clothes. They had to put golden pots at prominent places and the courtezans used to dance on decorated platforms.[6]

---

(1) एस मेवाढनिवदिकुमारो। एस सुरद्वाहिवसहोदरो। एस चंदावदीपदी। एस नड्डुलनरिंदनत्तुओ। एस गुद्दहरायभायनंदणो। एस धाराहिरायभागिणिजो। एस सायंभरीभूवालमाडुलगो। एस कुंकणाहिववेमाउओ। एस कच्छभूमीभुयंगसालओ। एस मरुमण्डलाखंडलदुहिदानंदणो। एस पुण चालुक्कनिवजणयमाडुगो। IV p. 80

(2) जइ मरइ घरे जणओ वा पणइणी व पुत्तो वा।
तहवि इमे मह सेवं न मुयंति करंति य न सोयं॥ IV. 12

(3) मज्झ पसाएणं पिय सुद्दयदेवेण वीरपवरेण।
निज्जियरिउचक्केणं एगच्छत्तं कयं रज्जं॥ IV-29

(4) Principles of this or a similar sect are given in the vṛtti of the first verse of the Nandî Sûtra.

(5) खज्जइ मंसं अणुदिणु पिज्जइ मज्जं च मुक्कसंकप्पं।
अणिवारियमणपसरो एसो धम्मो मए दिट्ठो॥
उत्तमपुरिसकवाले भुंजई जो पुरिसजंगलं निच्चं।
सो पावइ सिवठाणं इय नरकावालिणा कहियं॥
जइ पिज्जइ गोच्छीरं पलासणे तइय नत्थि सो दोसो।
इत्थ य लिंगियवहणे धम्मो दिट्ठु त्ति धणिएण॥
तणुगुत्तिहरा जीयं पिहगं जो कुणइ धम्मिओ कहवि।
सो पावइ परमगइं इय घडचडगेण दंसिओ धम्मो॥
जीवो नत्थि न कस्सवि हिंसिज्जइ जंपि तंपि नहु पावं।
पुन्नं नहु इय धम्मो सुरगुरुणा पयडिओ भुवणे॥ IV-22-26

(6) पौराः कुर्युर्विपणिपदवीमस्तपांशुं पयोभि-
र्मुक्ताहारैरुचिरवसनैर्हट्टशोभां विदध्युः।

Vanarâja was much addicted to drinking and so also were all the Châpotkața kings.[1] Kumârapâla was much addicted to flesh-eating in his youth and during his wanderings he maintained himself chiefly on flesh.[2]

Hemachandra, the spiritual preceptor of Kumârapâla—Hemachandra's is a great personality in the history of Jainism. He occupies a very high place among the Jain Âchâryas and laymen, who contributed towards the spread and glorification of the Jain faith. Hemachandra was born in Samvat 1145 in the family of a leading family of Modha Bania of Dhandhukâ (in the Ahmedabad District). His name was Changadeva, and his parents' Pâhiņi and Chachcha. Once Devachandra Sûri of the Pûrņatalla Gaćhćhha came to Dhandhukâ. Among the Jains who came for paying their respects and hearing his lectures, there was one young lad, Changadeva, with his maternal uncle Nemichandra. Changadeva hearing the lecture requested him to initiate him. The Sûri asked who he was. His maternal uncle said that he was his sister's son. While he was in hls mother's womb she saw in a dream a mango tree grown in her house. The tree, after it began to put forth flowers and fruits, was removed to a great garden, where it began to favour many persons with its shadow, sprouts, flowers, and choice fruits. The boy's heart was turned to religion. The Âchârya replied that the boy should enter the order as he would, thereby, be able to do good to the people like a Tîrthankara and asked him to take the permission of his father for initiation. Chachcha, however, refused but the boy persisted, and followed the Âchârya and took the vow at Cambay. This event occurred in Samvat 1154. His name was kept as Somadeva. He learnt in a few years all the scriptures. Devachandra Sûri, seeing the wonderful intellect of the pupil, made him a Sûri in Samvat 1162 at Nágor. As the colour of his body was like that of gold and his face delighted the people like the moon, he was called Hemachandra.

Hemachandra and Siddharâja. Hemachandra through his learning and ready-wit got easy access in the court of Siddharâja and it was through his request that Hemachandra composed a new Sanskrita grammar Siddha-Hema. Hemachandra's religious lectures had such an influence on him that he partially leaned towards Jainism and it was through his instruction that he built two Jain temples 1 Râjavihâra in the capital and 2 Siddhavihâra at Siddhapura. Siddharâja always took delight in his company and never was content even for a moment without seeing Hemachandra, whose words poured out like nectar.

स्थाने स्थाने कनककलशान् स्थापयेयुर्भवन्त:
पण्यस्त्रीभि: सुरगृहसखान् मञ्चकान् भूषयेयु: ॥ IV–19

(1) वनराजस्याहं बहुमतोऽभूवमित्युपस्थितममुना ।
इय धवलहरेसु चिरं चाउक्कडरायलालिओ वसिओ । IV–47

(2) बालत्ताउ वि तुह देव ! निच्चमच्चंतवल्लहो अहयं ।
मह साहिज्जेण तया कयाइं देसंतराइँ तए ॥

Hemachandra and the conversion of King Kumârapâla—Hemachandra had, however, complete sway over Siddharâja's successor, Kumârapâla. The work begun by Hemachandra in Siddharâja's time was completed in the reign of Kumârapâla. Siddharâja only favoured Jainism but it was during the reign of Kumârapâla that Jainism was adopted as the religion of the State. Kumârapâla took the twelve vows of a Jain layman and stopped the practice of the killing of animals throughout his kingdom and also the territories of his tributaries. He erected many big temples throughout his kingdom. The practice of confiscating the property of those dying heirless was also abolished and gambling, drinkiug, flesh-eating, stealing, and adultery were prohibited by royal edicts.

Hemachandra's Literary work.[1] Hemachandra was, however, more known to the literary world through his literary works. He was an encyclopædic author and his writings are said to have amounted to three crores and a half verses. His first work was Siddha-Hema Śabdânuśâsana in eight chapters composed at the request of Siddarâja to commemorate his name. Hemchandra himself wrote a big commentary on this work, commonly called Ashṭâdaśa Sâhaśrî, and a Nyâsa amounting to 84,000 granthas. In order to illustrate the rules of the new grammar and also to sing the glory of the Chaulukya kings he composed a mahâkâvya named Dvyâśraya. The Prâkṛta portion dealing with Kumârapâla's reign was added later on in Kumârapâla's reign. The other aceessories to his grammar were also composed at the same time. The Abhidhânachintâmaṇi with Anekârtha Sangraha, Deśînâmamâlâ and Nighanṭu, the Kavyânuśâsana with the Viveka, the Chhandonuśâsana, and the Pramâṇamîmânsâ were also composed during Siddharâja's time. Thus the main part of his literary activity was done during Siddharâja's reign. The works composed in the reign of Kumârapâla were of a religious nature. The Yogaśâstra and the Vîtarâgastutis were written for instructing Kumârapâla

---

(1) व्याकरणं पञ्चाङ्गं प्रमाणशास्त्रं प्रमाणमीमांसां ।
छन्दोऽलङ्कृतिचूडामणी च शास्त्रे विभुर्व्यधित ॥
एकार्थानेकार्था देश्या निर्घण्ट इति च चत्वारः ।
विहिताश्च नामकोशाः भुवि कवितानट्युपाध्यायाः ॥
त्र्युत्तरषष्टिशलाका नरेशव्रतगृहिव्रतविचारे ।
अध्यात्मयोगशास्त्रं विदधे जगदुपकृतिविधित्सुः ॥
लक्षणसाहित्यगुणं विदधे च द्वयाश्रयं महाकाव्यम् ।
चक्रे विंशतिमुच्चैः स वीतरागस्तवानां च ॥
इति तद्विहितग्रन्थसङ्ख्यैव हि न विद्यते ।
नामापि न विदन्त्येषां मादृशा मन्दमेधसः ॥

प्रभावकचरित

and similarly the Triśashaṭiśalâkâpurushacharitra was also composed at Kumârapâla's request[1]. Hemachandra died in Samvat 1229, at the mature age of 84, only six months before Kumârapâla.

King Kumârapâla. Kumârapâla was the second son of Tribhuvanapâla, son of Devapâla, son of Kshemarâja, the elder brother of Siddharâja's father Karṇadeva. Tribhuvanapâla had loyally stood by Siddharâja during his minority. Siddharâja had no son and it was predicted by prophesiers that Kumârapâla will succeed him but Siddharâja did not like him on account of the low caste of his mother Kaśmîrâ Devî and hence tried his best to see him away from the world. Kumârapâla had to quit his house and wander under the guise of a तापस in distant lands. Frequently his life was in serious danger but he managed somehow to escape. After Siddharâja's death the ministers, finding him the fittest claimant, put him on the throne. Kumârapâla was born in Samvat 1149 and was anointed as king in 1199 at the mature age of fifty. The first ten years of his reign were occupied in overcoming internal enemies. Kumârapâla was a great warrior and he extended the kingdom of Gujarat. It is mentioned in the Mahâvîracharita of Hemachandra that the conquest of Kumârapâla will extend to Turkistan in the North, the Ganges in the East, Mount Vindhya in the South and the ocean in the [2]West. The most

---

(1) जिष्णुश्चेदिदशार्णमालवमहाराष्ट्रापरान्तान्कुरून्
  सिन्धूनन्यतमांश्च दुर्गविषयान् दोर्वीर्यशक्त्या हरिः ।
चौलुक्यः परमार्हतो विनयवान् श्रीमूलराजान्वयी
  तं नत्वेति कुमारपालपृथिवीपालोऽब्रवीदेकदा ॥
पापर्द्धिद्यूतमद्यप्रभृति किमपि यन्नारकायुर्निमित्तं
  तत्सर्वं निर्निमित्तोपकृतिकृतधियां प्राप्य युष्माकमाज्ञाम् ।
स्वामिन्नुर्व्यां निषिद्धं धनमसुतमृतस्याथ मुक्तं तथार्हं–
  चैत्यैरुत्तंसिता भूरभवमिति समः सम्प्रतेः सम्प्रतीह ॥
पूर्वं पूर्वजसिद्धराजनृपतेर्भक्तिस्पृशो याच्ञया
  साङ्गं व्याकरणं सुवृत्तिसुगमं चक्रुर्भवन्तः पुरा ।
मद्धेतोरथ योगशास्त्रममलं लोकाय च द्व्याश्रय–
  च्छन्दोऽलङ्कृतिनामसङ्ग्रहमुखान्यन्यानि शास्त्राण्यपि ॥
लोकोपकारकरणे स्वयमेव यूयं सज्जाः स्थ यद्यपि तथाऽप्यहमर्थयेऽदः ।
माहग्जनस्य परिबोधकृते शलाका पुंसां प्रकाशय वृत्तमपि त्रिषष्टेः ॥
तस्योपरोधादिति हेमचन्द्राचार्यः शलाकापुरुषेतिवृत्तम् ।
धर्मोपदेशैकफलप्रधानं न्यवीविशच्चारुगिरां प्रपञ्चे ॥ त्रिषष्टिशलापुरुषचरित्रप्रशस्ति

(2) स कौबेरीमातुरुष्कमैन्द्रीमात्रिदशापगाम् ।
  याम्यामाविन्ध्यमावार्धि पश्चिमां साधयिष्यति ॥ IV–52.

conspicuous of his victories were those over the Sâmbhara king Arṇorâja, and the Silhâra king Mallikârjuna. During his reign the kingdom of Gujarat had reached its highest glory. The enemies having been subdued, he could devote himself to religious matters. Minister Bâhaḍadeva introduced to him the great Hemachandra, whose great learning gratified his religious curiosity. Daily he heard his religious sermons and the doctrine of non-injury went straight into his heart. He adopted the Jain faith and took the vows of a Jain layman. The date of this event is given by Jinamaṇḍana as Samvat 1216 the second day of the bright half of Mâgha. He was zealous in this new faith adopted by him and built many Jain temples throughout his kingdom, issued orders for the prohibition of slaughter in his kingdom and also stopped the seven vices. Two such edicts of non-injury to animals issued by Kumârapâla's feudatories of Marwad:—(1) by Pûnapâkśa and (2) by Âhlaṇadeva dated Samvat 1207—have come to light (vide appendix III). He made pilgrimages to Mts. Śatruñjaya and Girnar. He died in Samvat 1229 at the mature age of 80.

The Mss. Material. The present edition of the Moharâjaparâjaya is based on the following three mss. designated as *A*, *B*, & *C*.

A is a paper ms. comtaining the complete text belonging to the Mss. collection of Pravartaka Kântivijayaji at Baroda. It consists of 25 leaves. It is a recent copy made from an old ms. It is generally correct both in the Sanskṛta and Prâkṛta portions.

B is an incomplete palm-leaf ms. belonging to the Deccan College Mss. Library. It consists of 105 leaves, of which leaves 65, 67–69, 73, 75, 80, 83-91 are missing. For a detailed description of the ms., see Kielhorn's Report on the search for Sanskṛta mss. in the Bombay Presidency during the year 1880–81. The ms. is not dated but from the style of writing it appears to have been written in the middle of the 13th century.

C is an incomplete, mutilated and much damaged ms. from the Deccan College Mss. Library. Many pages have, owing to dampness, stuck to gether. It consists of 44 leaves and is dated Samvat 1579. The colophon runs as under:–

संवत् १५७९ वर्षे श्रीचित्र (कूटे) श्रीखरतरगच्छे श्रीजिनवर्धनसूरिसन्ताने श्रीजिनचन्द्रसूरिश्रीजिनसागरसूरि-श्रीजिनहर्षसूरिश्रीजिनचन्द्रसूरिशिष्येण विमलकाभसुनिना मोहपराजयनाटकमलेखि ।

This ms. seems to have been copied from the palm-leaf ms. B. Both these mss. belonged to a collection of the Kharatara Gachchha bought by Dr. Kielhorn at Pattan. They are on the whole correct and reliable. The Prâkṛta portion, too, is generally correct.

CONTENTS

पात्राणि

सूत्रधारः—नान्दीपाठकः
नटी—सूत्रधारपत्नी
राजा—अणहिलपुरपत्तनाधिपतिर्महाराजः कुमारपालः
पुण्यकेतुः—कुमारपालामात्यः
विदूषकः—कुमारपालनर्मसचिवः
प्रतीहारः—कर्मविवरनामा कुमारपालप्रतीहारः
पुरुषः—लोकाचारनामा कुमारपालसेवकः
योगी—ज्ञानदर्पणनामा कुमारपालप्रणिधिः
ज्ञानदर्पणः—कुमारपालप्रणिधिः
वैतालिकः—स्तुतिपाठकः
व्यवसायसागरः—विवेकनृपत्यानयनायामात्यपुण्यकेतुप्रेषितः कश्चिद्राजपुरुषः
कृपासुन्दरी—विवेकचन्द्रनृपपुत्री कुमारपालपत्नी वा
सोमता—कृपासुन्दरीप्रियसखी
शुकः—संवरनामा राजशुकः
राज्यश्रीः—कुमारपालप्रणयिनी
रौद्रता—राज्यश्रीप्रियसखी
व्यवस्था—राज्यश्रीलेखहारिका
वणिजः—
महत्तरवणिजः } अणहिलपुरपत्तनवास्तव्या नागरिकाः
महाजनः
कुबेरः—नगरश्रेष्ठी
गुणश्रीः—कुबेरश्रेष्ठिमाता
वामदेवः—कुबेरश्रेष्ठिसखा
कमलश्रीः—कुबेरश्रेष्ठिभार्या
पातालकेतुः—विद्याधराधिराजः
पातालसुन्दरी—पातालकेतुपत्नी
पातालचन्द्रिका—कुबेरश्रेष्ठिपरिणीता पातालकेतुविद्याधरपुत्री

देशश्रीः— } भगिन्यौ
नगरश्रीः—

वनिता— } कृपासुन्दरीनगरश्रियोः प्रियसखी
वनराजी—

दाण्डपाशिकः—पुण्यकेतुमन्त्रिणा विपक्षपुरुषगवेषणार्थं नियुक्तः धर्मकुञ्जरनामा राजपुरुषः

पदाती—राजपुरुषौ

पुरुषः—संसारकनामा मोहराजलेखहारकः

द्यूतकुमारः— } व्यसनानि
जाङ्गलकः—
मद्यशेखरः—

असत्यकन्दली—द्यूतकुमारभार्या

शूना— } भगिन्यौ
मारिः—

कौलः— } हिंसाधर्मप्ररूपकाः सिद्धान्ता मारिसेवकाः
कापालिकः—
रहमाणः—
घटचटकः—
नास्तिकः—

विवेकचन्द्रः—जनमनोवृत्त्यधिपतिः

मोहराजः—जनमनोवृत्त्याक्रामकः विवेकचन्द्ररिपुः

पापकेतुः—मोहराजामात्यः

प्रतिहारी—अविरतिकलानाम्नी मोहराजप्रतिहारी

कदागमः—मोहराजप्रणिधिः

रागकेसरी— } मोहराजपुत्रौ
द्वेषगजेन्द्रः—

मदनदेवः—मोहराजसखा

कलिकन्दलादयः—मोहराजकटकाधिपतयः



मन्त्रियशःपालविरचितं

मोहराजपराजयम् ।

अमरविसरशीर्षक्रीडदापीडरत्न-
प्रचुररुचिररोचिश्चामरैश्चुम्ब्यपादम् ।
रमयति शिवलक्ष्मीर्निर्मलं चिन्मयं यं
स जयति वृषलक्ष्मा नाभिजन्मा जिनेन्द्रः ॥ १ ॥

उत्तंसयति मुक्तिं यः सूक्तिमर्थं इवोज्ज्वलः ।
नतोऽस्मि तस्मै श्रीपार्श्वस्वामिने परमात्मने ॥ २ ॥

अपि च—

यः संरम्भभवद्वलिस्थपुटितं चक्रे न भालस्थलं
भ्रूभङ्गं न मुहुर्बबन्ध नयने निन्ये न ताम्रद्युतिम् ।
नोच्चैर्वाचमुवाच वर्म न दधे दध्रे न चास्त्रं करे
व्यामोहं नृपमेवमेव जितवान् वीरः स वस्त्रायताम् ॥ ३ ॥

(नान्द्यन्ते)

सूत्रधारः—(सानन्दं परिक्रम्य) कथमद्यापि चिरयति मम प्राणेश्वरी ?।

(प्रविश्य)

नटी—(सविनयं) (१) आणवेदु अंज्जउत्तो को निंओगो अणुचिट्ठीयदु त्ति ।

सूत्रधारः—(साक्षेपं) कथमजनि भवत्याः कालक्षेपः ?।

(१) आज्ञापयतु आर्यपुत्रः को नियोगोऽनुष्ठीयतामिति ।

१ B & C अज्जो. २ B & C नियोगो.

नटी—(१) अच्छरियं अच्छरियं जं दाणि इदं पि विसुमरिदं अज्जेण णं। महीमोहणाभिहाणेण भरदहदगेण पउरपयंडपरिच्छदेण पाढपोढिमाए वसीकदो नायरजणो। तं च पराजेदुं वंछदि मे वच्छो भुवणमल्लो। नवरं दुरधीदविज्जो अणुवासिदगुरुकुलो अ। अदो सुगुरुसेवज्जियविज्जं करेमि त्ति मंतिय मए सद्धिं अज्जेव अज्जेण कइविसेसनवनिबद्धविसुद्धसिद्धहेमणामहेयवागरणपढणत्थं उवणीदो उवज्झायस्स कुमारो। पुत्तविज्जागहणमहूसवसंवुत्तसंगीदाणंदसंदाणिदाए न मुणिदो मए कालक्खेवो।

सूत्रधारः—(सहर्षं) आर्ये ! साधु स्मारितोऽस्मि। मम हि विस्मृतमिदमद्य सद्य एवोपस्थितेनाऽमुना सकलरसान्तरतिरस्कारिणा नवेनोत्सवरसेन।

नटी—(सानन्दं) (२) तं इमं खीरम्मि सक्करुक्केरो जं ऊसवे ऊसवंतरं। ता कहेदु अज्जो किं चिय तं।

सूत्रधारः—आर्ये ! अद्याहं सबहुमानमाहूय समादिष्टोऽस्मि सकलसुरासुराधिराजनिर्व्याजनिर्वर्त्तितपादपद्मसेवदेवाधिदेवप्रणामप्रणयप्रणवनर्तितातिशयसंपदा त्रिभुवनवनविहारियशःसिंहेन भगवता श्रीसङ्घेन ?।

नटी—(३) किं चिय आणत्तं भगवदा संघेण ?।

सूत्रधारः—आर्ये ! श्रूयतामिदमादिशति स्म तत्रभवान् श्रीसङ्घः। यदद्य मरुमण्डलकमलामुखमण्डनकर्पूरपत्राङ्कुरथारापद्रपुरपरिष्कारश्रीकुमारविहारक्रोडालङ्कारश्रीवीरजिनेश्वरयात्रामहोत्सवप्रसङ्गसङ्गतमस्तोकं सामाजिकलोकं कस्यापि निस्तुषरसोपनिषन्निस्यन्दिनो रूपकस्याऽभिनयदर्शनेन परमप्रमोदसंपदं संप्रापयेति।

(१) आश्चर्यमाश्चर्यं यदिदानीमिदमपि विस्मृतमार्येण खलु महीमोहनाभिधानेन भरतहतकेन प्रचुरप्रचण्डपरिच्छदेन पाठप्रौढिम्ना वशीकृतो नागरजनः। तं च पराजेतुं वाञ्छति मे वत्सो भुवनमल्लः। नवरं दुरधीतविद्योऽनुपासितगुरुकुलश्च। अतः सुगुरुसेवार्जितविद्यं करोमीति मन्त्रयित्वा मया सार्द्धमद्यैवार्येण कतिविशेषनवनिबद्धविशुद्धसिद्धहेमनामधेयव्याकरणपठनार्थमुपनीत उपाध्यायाय कुमारः। पुत्रविद्याग्रहणमहोत्सवसंवृत्तसङ्गीतानन्दसन्दानितया न ज्ञातो मया कालक्षेपः।

(२) तदिदं क्षीरे शर्करोत्करो यदुत्सवे उत्सवान्तरम्। तस्मात्कथयत्वार्यः किं खलु तत्।

(३) किं खलु आज्ञप्तं भगवता सङ्घेन।

१ A अच्छरीयं अच्छरीयं. २ B & C ॰रोक्केरो. ३ B & C ॰रक्क.॰

नटी—(१) अज्ज ! अवि अत्थि को वि तादिसो अहिणवपबंधो जस्स अहिणयरसेण भगवदो संघस्स सासणं संपाडिय कयत्थो हवसि ।

सूत्रधारः—(स्मृतिमभिनीय) आर्ये ! अस्त्येव श्रीमोढवंशावतंसेन श्री-अजयदेवचक्रवर्त्तिचरणराजीवराजहंसेन मन्त्रिधनदेवतनुजन्मना रुक्मिणीकुक्षिलालितेन सर्वतोमुखनिस्तुषशेमुषीविलासवासभवनेन निर्व्याजराजनीतिनितम्बिनीवदनविभ्रममणिदर्पणेन व्यापारिकमलाकुचकलशमुक्ताफलहारयष्टिना सारसारस्वतोदारसारणीसेकसुकुमारस्मेरकाव्यकन्दलप्ररोहेण परमार्हतेन यशःपालकविना विनिर्मितं मोहराजपराजयो नाम नाटकम् ।

नटी—(साकूतं) (२) अज्ज ! मोहराजपराजउ त्ति नामं पि दाव सुंदरं । ता किमित्थ वंन्नीयदि त्ति सोदुमिच्छामि ।

सूत्रधारः—(सोत्साहं) आर्ये ! समासतः श्रोतुमवधेहि तावत् । इह हि—

पश्चासद्य कुमारपालनृपतिर्जज्ञे स चन्द्रान्वयी
जैनं धर्म्ममवाप्य पापशमनं श्रीहेमचन्द्राद्गुरोः ।
निर्वीराधनमुज्झता विदधता द्यूतादिनिर्वासनं
येनैकेन भटेन मोहनृपतिर्जिग्ये जगत्कण्टकः ॥ ४ ॥

नटी—(३)अज्ज ! जदि एवं ता एदस्स राएसिणो परमबोधिसत्तस्स अचब्भुदचरिदेण विच्छाइदाइं चिरंदणमहानरिंदललिदाइं ।

सूत्रधारः—आर्ये ! एवमेवैतत्, कः सन्देहः । किञ्चापरमपि किमेकमत्र न प्रवेकमाकलयामः ? । यतः—

---

(१) आर्य ! अप्यस्ति कोऽपि तादृशोऽभिनवप्रबन्धो यस्याभिनयरसेन भगवतः सङ्घस्य शासनं संपाद्य कृतार्थो भवसि ।

(२) आर्य ! मोहराजपराजय इति नामापि तावत्सुन्दरम् । ततः किमत्र वर्ण्यते इति श्रोतुमिच्छामि ।

(३) आर्य ! यद्येवं तदा एतस्य राजर्षेः परमबोधिसत्त्वस्यात्यद्भुतचरितेन विच्छायितानि चिरन्तनमहानरेन्द्रललितानि ।

---

१ A अभिण.° २ A भोसि. ३ B & C फलयष्टिना. ४ A मोहरायपराजय त्ति. ५ A वन्नीयदिहि त्ति. ६ B & C श्रोत्रे श्रो.°

थारापद्रपुरं निसर्गचतुरं चैत्येषु सर्वोत्तमं
किञ्चैतज्जिनमन्दिरं रसमयं चौलुक्यवृत्तं स्वयम् ।
जङ्घालः कविराजवर्त्मसु यशःपालः प्रवीणः कवि-
र्मद्भृत्याः कुशलाः कलासु तदहो ! दिष्ट्या प्रसन्नो विधिः ॥ ५ ॥

नटी—(१)अज्ज ! एवं णेदं । अवरं पि किं पि पुच्छिस्सं ।

सूत्रधारः—(सोल्लासं) विस्रब्धं ब्रूहि ।

नटी—(२) किं ति एदिणा कविंदेण सयं य्येव अप्पा न वण्णिदो ।

सूत्रधारः—आर्ये ! तस्य खल्वशेषसत्पुरुषपरिषच्छिरःशेखरस्येतरतरलकविसार्थवन्न स्ववर्णनघण्टापथे निरर्गलं वल्गति वाणीवाणिणी । असौ हि परैरेव स्तूयमानमात्मानं लभते । तथा च—

श्रीमोढाह्वयवंशजः स जयति श्रीमान् यशःपाल इ-
त्युद्यद्वृत्तगुणेन पूरुषमणिस्तेजस्विनामग्रणीः ।
स्वच्छत्वात्प्रतिबिम्बडम्बरमभूत्केषां न यत्राऽद्भुते
भित्त्वान्तर्गुणसंक्रमं विहितवान् क्लेशान्पुनः कश्चन ॥ ६ ॥

(इति नेपथ्ये गीयते ।)

(३) सुपसन्नचंदपायस्स भोदु भद्दं वसंतरायस्स ।
भुवणम्मि लद्धपसरो दलिओ सिसिरो रिऊ जेण ॥ ७ ॥

सूत्रधारः—(श्रुत्वा सप्रमोदं) अये ! कथमुपक्रान्तमेव कुशीलवैः, यदियं निस्तन्द्रचन्द्रमःकिरणधोरणीधवलितधरातलस्य लब्धप्रसरशिशिरवैरिविजयावर्जितोर्जितकीर्त्तेः ऋतुचक्रवर्त्तिनोऽवतारव्याजेनैदंयुगीनजैनसङ्घमध्यमूर्द्धन्यश्रीहेमचन्द्रगुरुपादप्रसादप्रादुर्भूतप्रबोधस्य जनितजगद्द्रोहमोहरिपुराजपराजयप्ररोहदसपत्नवीरव्रतस्य सकलमहीपालमौलिलीलालालितशासनस्य स्वामिनः

---

(१) आर्य ! एवमेतत् । अपरमपि किमपि प्रक्ष्यामि ।
(२) किमित्येतेन कवीन्द्रेण स्वयमेवात्मा न वर्णितः ।
(३) सुप्रसन्नचन्द्रपादस्य भवतु भद्रं वसन्तराजस्य ।
भुवने लब्धप्रसरो दलितः शिशिर ऋतुर्येन ॥

श्रीमत्कुमारपालदेवस्य प्रावेशिकी ध्रुवा । तदेह्यावामप्यनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

(ततः प्रविशति राजा विदूषकश्च)

राजा—(शिरस्यञ्जलिं निवेश्य)

श्रीहेमचन्द्रप्रभुपादपद्मं वन्दे भवाब्धेस्तरणैकपोतम् ।
ललाटपट्टान्नरकान्तराज्याक्षरावली येन मम व्यलोपि ॥ ८ ॥

विदूषकः—(स्वगतं)(१) अदिमित्तं खु गहीदो एस धम्मग्गहेण । जं दाणि गुरु गुरु त्ति पलवंतो न विरमदि ता अन्नकधाए अक्खिविस्सं । (प्रकाशं) भो रायं ! पिच्छ पिच्छ वम्महमहारायपियवयंसओ पत्तो वसंतसमओ । इह हि–

(२) कीलावणेसु कमलाकुलमंदिरेसु
रोलंबरोलववएसनिमंतिदाणं ।
दोलाहिरूढरमणीकलगीदिखीरि-
तित्ती चिरं तरुणकन्नदियाण भोदि ॥ ९ ॥

राजा—(अनाकर्णितकेन) अहो ! उड्डमरसंसारमरुस्थलीकल्पतरोर्गुरोरुपासनामृतानामतृप्तोऽस्मि ।

विदूषकः—(स्वगतं सोद्वेगं) (३) कधं[1] मह वयणमणायन्निय तहिं ज्जेव[2] से निब्बंधो[3] ता को उवाओ । अधवा पयडं ज्जेव भणिस्सं दाव । (प्रकाशं) भो वयस्स ! णिच्छिदं छलिदोऽसि एदेहिं पासंडिपिसाएहिं[4] । जदो नाविक्खसि रज्जं,

---

(१) अतिमात्रं खलु गृहीत एष धर्मग्रहेण । यदिदानीं गुरो गुरो इति प्रलपन् न विरमति तदन्यकथायामाक्षेप्स्यामि । भो राजन् ! पश्य पश्य मन्मथमहाराजप्रियवयस्यः प्राप्तो वसन्तसमयः ।

(२) क्रीडावनेषु कमलाकुलमन्दिरेषु रोलम्बरवव्यपदेशनिमन्त्रितानां ।
दोलाधिरूढरमणीकलगीतिक्षीरतृप्तिश्चिरं तरुणकर्णद्विजानां भवति ॥

(३) कथं मम वचनमनाकर्ण्य तत्रैव तस्य निर्बन्धस्ततः क उपायः । अथवा प्रकटमेव भणिष्यामि तावत् । भो वयस्य ! निश्चितं छलितोऽसि एतैः पाखण्डिपिशाचैः । यतो नापेक्षसे राज्यम्,

---

१ B & C कथं. २ B & C ज्जेव. ३ B & C निबंधो. ४ B & C पासंडपि.

न संभावसि अवरोहं, न बहु मन्नसि संगीदरसं। अधवा मह ज्जेव इक्कस्स अपुन्नोदएण ईदिसो तं जादोऽसि। जदो जप्पभुदि तस्स सेयंबरधुत्तस्स दंसणं संवुत्तं तप्पभुदि निसाए न भुंजसि। दिवा वि अणिद्धमधुरमदिक्कंतवेलं अवहुवंजणं इदरु व्व जं वा तं वा जेमसि। ता सच्चमेदं वरस्स खलु भोयणे जन्नजत्ताए पंसु त्ति। अदो पसीद पडिवज्ज पगिदिं।

राजा—(विहस्य) धिग्मूर्ख ! न युक्तमुक्तवानसि। ग्रामीण इव नागरकवृत्तस्याऽलब्धास्वादोऽसि प्रशमरसस्य। पश्य पश्य,

मिथ्यात्वतिमिरच्छन्नमुपदेशशलाकया।
ज्ञानचक्षुर्गुरुर्दिष्ट्या ममेदमुदघाटयत्॥ १० ॥

अपि च—

किं राज्येन गुरोरुपास्तिरनिशं चेल्लभ्यते निर्भरा
किं शुद्धान्तपुरन्ध्रिभिर्धृतिवधूसङ्गो यदि प्राप्यते।
किं सङ्गीतरसेन चेज्जिनवचःपीयूषमापीयते
मोहाद्ब्रूहि यथा तथा मम पुनर्लीनं मनो ब्रह्मणि॥ ११ ॥

किञ्च—

उच्छिष्टं क्रियते चरद्भिरभितो यत्प्रेतभूतादिभि-
र्ध्वान्तक्रान्तदृशो न यत्र पततः पश्यन्ति जन्तूनणून्।
बाधन्ते स्मृतयो यदाहुरधमं यद्वैद्यविद्याविद-
स्तन्निःशूकमनाः करोति नृपशुः कश्चिन्निशाभोजनम्॥ १२॥

अन्यच्च—

हृद्ये अप्यन्नपानीये स्यातामुच्चारमूत्रसात्।
अतः सारेतराहारविचारावसरः कुतः॥ १३ ॥

न संभावयसेऽवरोधम्, न बहु मन्यसे सङ्गीतरसम्, अथवा ममैवैकस्यापुण्योदयेनेदृशस्त्वं जातोऽसि। यतो यत्प्रभृति तस्य श्वेताम्बरधूर्त्तस्य दर्शनं संवृत्तं तत्प्रभृति निशायां न भुङ्क्षे। दिवापि अस्निग्धमधुरमतिक्रान्तवेलमबहुव्यञ्जनमितर इव यद्वा तद्वा जेमसि। ततः सत्यमेतद् वरस्य खलु भोजने जन्ययात्रायां पांशुरिति। अतः प्रसीद प्रतिपद्यस्व प्रकृतिम्।

---

१ A. जेमेसि

विदूषकः—(स्वगतं) (१) असज्झो एस वाही । ता उविक्खिस्सं । (प्रकाशं) भो वयस्स ! चिरादो छुहाकरालिदो न सक्कुणोमि तए सह चडुत्तरियं कादुं ।

(नेपथ्ये)

हंहो प्रतीहार ! निवेदय मदागमनं मनुजेश्वरस्य ।

प्रतीहारः—भोः ! संप्रति परमार्हतो देवो नाभिनन्दति भवादृशां दर्शनम् ।

(पुनर्नेपथ्ये)

हंहो प्रतीहार ! बहु मन्यते नितमामस्मद्दर्शनं परमयोगी देवः । अपि च, मत्समागमसुखमवलोकते वः स्वामिनो मनोरथसिद्धिः ।

राजा—(श्रुत्वा) कस्कोऽत्र भोः ! ।

(प्रविश्य)

पुरुषः—(२) आणवेदु देवो ।

राजा—लोकाचार ! याहि जानीहि क एष मद्दर्शनमभिलषति ।

पुरुषः—(३) जं देवो आणवेदि त्ति । (निष्क्रम्य प्रविश्य च) देव ! दुवारपालपडिक्खलिदो जोगिंदो को वि ।

राजा—(स्वगतं सावज्ञं) किमनेन । अथवा पश्यामस्तावत् । (प्रकाशं) भद्र ! मदाज्ञया कर्मविवरं प्रतीहारमुक्त्वा मोचयित्वा पुरस्कृत्य चैनं प्रवेशय ।

पुरुषः—(४) जं देवो आणवेदि त्ति । (निष्क्रम्य योगिना सह पुनः प्रविश्य च) इदो इदो एदु तत्तभवं ।

योगी—(परिक्रामन् सविमर्शं) अहो ! साधूक्तम्,

तस्याजननिरेवास्तु नृपशोर्मोघजन्मनः ।
अविद्धकर्णो यो योग इत्यक्षरशलाकया ॥ १४ ॥

---

(१) असाध्य एष व्याधिस्तत उपेक्षिष्ये । भो वयस्य ! चिरात्क्षुधाकरालितो न शक्नोमि त्वया सह चटोत्तरितं कर्तुम् ।

(२) आज्ञापयतु देवः ।

(३) यद्देव आज्ञापयतीति । देव ! द्वारपालप्रतिस्खलितो योगीन्द्रः कोऽपि ।

(४) यद्देव आज्ञायतीति । इत इत एतु तत्रभवान् ।

(पुरोऽवलोक्य च सहर्षं) स एष निःशेषधर्मवीरप्रवरो राजर्षिः कुमारपाल-
। अस्य हि—

अमन्दमुद्यत्पुलकाङ्कुराभिः
सुरीभिरुच्चैरुपवीणितानि ।
शृणोत्यजस्रं चरिताद्भुतानि
धुन्वन् शिरः सोऽपि सुराधिराजः ॥ १९ ॥

राजा—(विलोक्य सप्रत्यभिज्ञं) कथमयं मोहरिपुस्वरूपनिरूपणाय नियुक्तो
ो ज्ञानदर्पणो नाम ममैव प्रणिधिः ।

विदूषकः—(विलोक्य सभयं) (१) भो एगेण पासंडिणा तुमं छलिदो।
ओ ममं छलिदुं एदि ता नस्सिस्सं ।

ाजा—अयि कातर ! मा भैषीः । ननु मत्समीपस्थोऽसि ।

ेदूषकः—(सावष्टम्भं) (२) अधवा तुह वयंसे म्हि ता न बीहिस्सं ।
त ममं छलिदुं धाविस्सदि ततो नूणमेदिणा दंडकट्ठेण ताडिस्सं ति ।
ं परामृशति)

जा—वयस्य ! अलमलमलीकारम्भेण, अभ्यागतः खल्वयं नार्हत्यव-
।

दूषकः—(३) एवं भोदु ।

षः—(४) एस देवो, उवसप्प णं ।

ी—(उपसर्प्य) राजर्षे ! योगेनावियुक्तो भूयाः ।

ा—योगिन् ! इदमासनमास्यताम् । लोकाचार ! त्वमपि स्वनियो-

(पुरुषो निष्क्रान्तः)

भो एकेन पाखण्डिना त्वं छलितः । एष द्वितीयो मां छलयितुमेति ततो नङ्क्ष्यामि।
अथवा तव वयस्योऽस्मि ततो न भेष्ये । यदि एष मां छलयितुं धाविष्यति ततो नून-
ताडयिष्यामीति ।
वं भवतु ।
देवः, उपसर्पेमम् ।

C वयंस म्हि. २ B & C अलमलीकसं.

राजा—(स्वगतं) उत्तानप्रकृतिर्बटुस्तन्नैव[1] रहस्यश्रवणार्हः भवतु तावत् । (प्रकाशं) योगिन् ! कच्चिदात्यन्तिकः कोऽपि धर्मप्रत्यूहहेतुर्यदस्मानस्मार्षीः ।

योगी—(स्वगतं) साधु समयज्ञशिरोमणे ! साधु । (प्रकाशं) राजन् !,

न धर्मविप्लवः कोऽपि[2] त्वयि शासति मेदिनीम् ।
उदिते पूषिणि पुष्णाति तमःस्तोमः किमुद्गमम् ॥ १६ ॥

किन्तु द्रष्टव्यो वर्णाश्रमगुरुरिति ।

विदूषकः—(१) भो वयस्स ! चिट्ठ तुमं । अहं दाव पुच्छिस्सं । महल्लं मे कोदुहल्लं ।

राजा—एवमस्तु ।

विदूषकः—(२) भो साहेसु नियसमयरहस्सं ।

योगी—न खल्वहं तव रहस्यमाख्यातुमागतोऽस्मि ।

विदूषकः—(३) अध अन्नस्स कस्स ? ।

योगी—अपि तु महाराजस्य ।

विदूषकः—(४) अहं पि महारायपियमित्तु म्हि जइ परं इमाओ थोवेण परिहीयामि ।

राजा—किञ्चानुपपन्नमत्र ? ।

योगी—भद्र ! न खलु राजमित्रमिति रहस्यं श्रोतुमर्हेति,अपि तु योग्यः ।

विदूषकः—(५) अच्छरियं अच्छरियं जं अहं महाबंभणोऽवि अजु[3]ग्गो ।

योगी—ब्राह्मणः शूद्र इति न किञ्चिदेतत् । यतः—

सप्तधातुमये देहे समाने सर्वदेहिनाम् ।
ब्राह्मणोऽयमयं शूद्र इति केयं विचारणा ? ॥ १७ ॥

---

(१) भो वयस्य ! तिष्ठ त्वम् । अहं तावत्प्रक्ष्यामि । महन्मे कुतूहलम् ।
(२) भोः कथयस्व निजसमयरहस्यम् ।
(३) अथान्यस्य कस्य ? ।
(४) अहमपि महाराजप्रियमित्रमस्मि यदि परमस्मात् स्तोकेन परिहिणोमि ।
(५) आश्चर्यमाश्चर्यं यदहं महाब्राह्मणोऽप्ययोग्यः ।

---

१ B & C स्तन्नैव. २ B & C क्कापि. ३ B & C जोग्गो.

विदूषकः—(१) अध कधं जुग्गो होमि ? ।

योगी—यद्यस्मासु गुरुबुद्धिं बध्नासि ।

विदूषकः—(२) मह बंभणी दाव ममं सुरगुरु त्ति वाहरंदि । तधावि भोदु ।

योगी—तर्हि एहि प्रपद्यस्व योगिदीक्षाम् ।

विदूषकः—(३) न खु न खु चउवेयपुत्तगो भोदुं सुद्ददिक्खं पवज्जिय अप्पाणं विगोविस्सं ।

राजा—वयस्य ! मा मैवम्,

यथा तथा स्वार्थनिष्ठैर्भवितव्यं विचक्षणैः ।
श्रूयते रासभस्यापि ममर्द चरणौ हरिः ॥ १८ ॥

तत् क्रियतामेतत् ।

विदूषकः—(४) जदि एवं ता देहि मे नियदिक्खं ।

योगी—तर्हि समीपमुपसर्प ।

(विदूषकः तथाकरोति)

योगी—पत मे पादयोः ।

विदूषकः—(सदैन्यं) (५) परित्तायध भो! परित्तायध मं । नियबंभणीए विणा जो अन्नस्स चलणेसु आजम्मं न पडिदो सोऽहं मोहेदुं पासंडिणा पाएसु पाडीयामि ।

राजा—वयस्य ! किमेवमविवेकवानसि ? । प्रणामो हि प्रथमे प्राणा विनयव्रतस्य ।

---

(१) अथ कथं योग्यो भवामि ? ।
(२) मम ब्राह्मणी तावन्मां सुरगुरुरिति व्याहरति तथापि भवतु ।
(३) न खलु न खलु चातुर्वेदपुत्रको भूत्वा शूद्रदीक्षां प्रतिपद्यात्मानं विगोपिष्ये ।
(४) यदि एवं ततो देहि मे निजदीक्षाम् ।
(५) परित्रायस्व भोः ! परित्रायस्व माम् । निजब्राह्मण्या विना योऽन्यस्य चरणेषु आजन्म न पतितः सोऽहं मोहयित्वा पाखण्डिना पादयोः पात्ये ।

---

१ B & C जोग्गो. २ B & C °रति. ३ B & C पाडियामि.

विदूषकः—(१) एवं पि भोदु । (पादयोः पतति ।)

योगी—(शिरसि हस्तं विधाय) भोः ! समुत्खन शिखाम्, अपनय कण्ठाद्यज्ञोपवीतं, येन योगमुद्रामारोपयामि ।

विदूषकः—(सक्रोधं) (२) आ दासीएपुत्तग ! पासंडहदग ! सिहं जन्नोपवीदं च अवहरिदुमिच्छसि ? । किं तेण सुवन्नगेण जेणं कन्नच्छेदो भोदि ? । (इति दूरीभवति ।)

राजा—वयस्य ! निरुपचरितं हि वो ब्राह्मण्यं न खलु यज्ञोपवीतादिबाह्यलिङ्गसव्यपेक्षं, तदलमस्थानसंरम्भेण ।

विदूषकः—(३) णं ईदिसस्स राउलस्स दूरेण पणामो कीरदि । जत्थ बंभणा वि एवं विडंबिज्जंति ता गंमिस्सं । (इति निष्क्रामति ।)

राजा—(स्वगतं) गच्छतु तावत् ।

योगी—स्वामिन् ! निर्मक्षिकं जातम् ।

राजा—ज्ञानदर्पण इत आस्यताम् ।

(ज्ञानदर्पणः योगिवेषं विमुच्योपसर्पति ।)

राजा—भद्र ज्ञानदर्पण ! कच्चिदधिगतं किञ्चन रिपोरितिवृत्तम् ? ।

ज्ञानदर्पणः—देव ! सर्वमपि ।

राजा—तर्हि विस्तरतः श्रोतुमिच्छामि ।

ज्ञानदर्पणः—देव ! श्रूयताम् । इतस्तावन्निष्क्रम्य गतोऽस्मि मोहराजशिबिरम् । तत्र च चिरेणापि न प्राप्तवान् प्रवेशम् ।

---

(१) एवमपि भवतु ।

(२) आः दास्याःपुत्रक ! पाखण्डहतक ! शिखां यज्ञोपवीतं चापहर्तुमिच्छसि ? । किं तेन सुवर्णकेन येन कर्णच्छेदो भवति ? ।

(३) ननु ईदृशो राज्ञो दूरेण प्रणामः क्रियते । यत्र ब्राह्मणा अपि एवं विडम्ब्यन्ते, ततो गमिष्यामि ।

---

१ B & C °वं भो.° २ B & C दत्ता. ३ B °पवीयं. ४ A जदो. ५ B & C गच्छिस्सं. ६ A इव आ.°

राजा—उपपन्नमेतत्, निषिद्धासंस्तुतजननिर्गमप्रवेशा हि शिबिरनिवेशाः ।

ज्ञानदर्पणः—अथ किम्? तत्र हि दिवानिशं भ्राम्यन्न विश्राम्यति मोहनरेन्द्रनिरूपितो निपुणः प्रमादो नाम कटकारक्षकः ।

राजा—अथ कं प्रवेशोपायमकार्षीः ? ।

ज्ञानदर्पणः—देव ! विमृश्य विश्वसनीयां मुनिमुद्रामादृत्य प्रविष्टोऽस्मि ।

राजा—वर्णिलिङ्गिनः प्रणिधयो भवन्तीति न केनापि पर्यनुयुक्तोऽसि ? ।

ज्ञानदर्पणः—देव ! दूरे पर्यनुयोगः प्रत्युत सत्कृतोऽस्मि पाखण्ड[1]मण्डलेन।

राजा—(सकौतुकं) आः ! कथं तत्र पाखण्डसंभवः ? ।

ज्ञानदर्पणः—देव ! दुरात्मना मोहेन विजित्य स्वचरणसेवाव्रतदानेन दीक्षिताः सर्वेऽपि दर्शनिनः ।

राजा—अहो ! निरवधिः कोऽपि तस्य महिमा । यतः—

यश्चक्रे भुवनत्रयं कमलभूः शङ्के स चक्रे न यं
येनाकारि विधिर्न यं स कृतवान् मन्ये महाभैरवः ।
तस्मादेष जगद्विलक्षणकलाकौशल्यशक्त्या सुरान्
दैतेयानुरगान्नरांश्च सततं सर्वान्करोत्यात्मसात् ॥ १९ ॥

(पुनः सौत्सुक्यं) ततस्ततः ।

ज्ञानदर्पणः—नीतश्चास्मि तैर्मोहमहाराजास्थानम् । दृष्टश्च स मोहमहीपालः ।

राजा—साधु पाखण्डमण्डल ! साधु,

अकारि युक्तं पाखण्डैर्यत्त्वं मोहस्य दर्शितः ।
स्वजातेः पक्षपातो हि क्रियते वायसैरपि ॥ २० ॥

भद्र ! वर्णय तस्य वैभवम् ।

ज्ञानदर्पणः—देव ! किमेकमस्य वर्णयामि ? । यतः—

---

१ B & C °खण्डिम.°

दग्धं येन पुरातनं तृणमिवायत्नात्पुराणां त्रयं
यस्य प्रज्वलतो नभस्तलमिदं धूम्यायते सर्वतः ।
यत्र त्रीण्यपि विष्टपान्युपययुः सान्याग्यलेशश्रियं
मोहे तत्र जलात्मतां स गतवान् त्र्यक्षस्य नेत्रानलः ॥ २१ ॥

अपि च—

बललीलायितं दृष्ट्वा तस्य मोहमहीपतेः ।
कान्दिशीको भवत्येव कालिन्दीसोदरः प्रभो ! ॥ २२ ॥

अपि च—

अमराः किङ्करायन्ते दासायन्ते च दानवाः ।
दीनास्तपोधनास्तस्य पुरो वीरशिरोमणेः ॥ २३ ॥

राजा—(सरोमाञ्चं) हृदय ! दिष्ट्या वर्द्धामहे संग्राममहोत्सवेन । (इति सरभसमुत्थातुमुत्सहते ।)

ज्ञानदर्पणः—देव ! मा मैवं वर्णनेयं तस्य नास्ति प्रत्यक्षः प्रतिपक्षः ।

राजा—(सलज्जं) ततस्ततः ।

ज्ञानदर्पणः—एवं च बहून्यपि अहानि स्थित्वा न किञ्चित्तन्मन्त्रमधिगतवानस्मि ।

राजा—गूढमन्त्रता हि जीवितं राजनीतेः ।

ज्ञानदर्पणः—अथान्येद्युरकस्मान्निर्भरं प्रादुर्बभूव भैरवः सन्नाहभेरीरवः। तदाकर्णनाकुलमिलत्सैनिकचक्रवालश्चचाल कस्याप्यभिमुखं मोहमहीपालः ।

राजा—(सविस्मयं) ततस्ततः ।

ज्ञानदर्पणः—अहमपि कुतूहलात्सहैव चलितवान् । गत्वा चानेन पर्यवेष्टि विवेकचन्द्राह्वयनृपतेर्जनमनोवृत्तिर्नाम राजधानी ।

राजा—अहह ! निर्व्याजमोजायितं विजिगीषूणाम् ।

ज्ञानदर्पणः—सहसोपस्थितं च परचक्रमालोक्य पर्याकुलोऽभवत्पौरलोकः ।

राजा—ततः कच्चिदभ्यमित्रीणतां प्रपन्नो विवेकराजः ? ।

ज्ञानदर्पणः—नहि नहि, अपि तु सदाचारनाम्नः प्राकारस्य मध्यमध्यास्य स्थितः ।

राजा—आः ! कथं तादृशोऽपि दुर्गाश्रयणमाचरति ? ।

ज्ञानदर्पणः—असौ हि पुरापि रिपुणा निपुणप्रणीतभेदोपायेन नितान्तं नीतस्तनिमानम्, तेनेदमादृतवान् ।

राजा—देशकालज्ञस्तर्हि न गर्हामर्हति ।

ज्ञानदर्पणः—अन्तर्बहिस्थयोश्च बलयोः प्रत्यहं प्रावर्तत घोरः समरसंमर्दः ।

राजा—ततस्ततः ।

ज्ञानदर्पणः—अथ तस्याः पुर्याः पर्यन्तवाहिन्यस्ति धर्मचिन्ता नाम महानदी । तां चागत्य वैरिवरूथिनी रुरोध । तदवग्रहाच्च बलवत्यपि पर्याकुलीभूता पुरी ।

राजा—धिक्, कष्टमापतितम् ।

ज्ञानदर्पणः—अथ बहुश्रुतैर्गुरुभिः पुरुषैरुद्घाट्यन्त सदागमनामानः प्रयत्नपरिपालिता गुप्तकूपाः । तेभ्यः स्वप्रवणश्रवणप्रणालद्वयद्वारेणान्तः प्रावेश्यत योगसलिलम् । तेन च पुनः प्रत्युज्जीवितेव प्रजा ।

राजा—(सहर्षं) अत एव हि राजकुलेषु गुरुपुरुषपरिग्रहः प्रशस्यते ।

ज्ञानदर्पणः—विदितश्चायमर्थः परैः ।

राजा—कथमिव ? ।

ज्ञानदर्पणः—तद्राजधानीजन्मानो मनोभवादयः, ते हि सर्वं संविदन्ति । समानशीलतया पुनर्मोहराजं प्रपेदिरे ।

राजा—उपपद्यते तर्हि ।

ज्ञानदर्पणः—अथ रिपुभिरुपेत्य रजसाच्छादिताः कूपाः । बद्धाश्चाविनयप्रभृतयो घट्टाः । प्रतिषिद्धाश्च प्रबोधप्रभृतिप्रणिधिसञ्चाराः । पातितानि प्रतिकलं प्राकारे छिद्राणि । अन्तरपि प्रतनूबभूवतुर्यमनियमरूपे यवसेन्धने ।

१ B & C °वत्पर्या.°

राजा—अहो ! महात्मनो मनोवचसोरगोचरः कोऽपि व्यसनोत्करः ।

ज्ञानदर्पणः—बलवद्वरोधदौस्थ्याच्च विवेकचन्द्रेण राज्ञा विमर्शप्रमुखै-रमात्यैः सह स्थापितः सिद्धान्तः ।

राजा—किमभ्यमित्रीणतां प्रतिपद्य योद्धव्यमिति ? ।

ज्ञानदर्पणः—नहि नहि, अपि तु याचितः कालनाम्नो दूतस्य मुखेन धर्मद्वारं मोहराजः ।

राजा—नीतिरेषा बलीयसा प्रारब्धस्य विदेशो वा तदनु प्रवेशो वेति द्वयी गतिः । ततः किमनेन प्रपन्नम् ? ।

ज्ञानदर्पणः—किमन्यद्दत्तमेव धर्मद्वारम् ।

राजा—तादृशामपि तादृशः क्षत्रधर्मः ।

ज्ञानदर्पणः—अथैकया शान्तिनाम्न्या देव्या कृपासुन्दरीनाम्न्या च प्राणवल्लभया कन्यया समं नगरीतो निर्गतो विवेकचन्द्रः ।

राजा—कष्टं भोः ! कष्टम् । अपि च[1]—

अश्रद्धेयमसंभाव्यमचिन्त्यमपि हेलया ।
नयते प्राञ्जलं वर्त्म देवाय विधये नमः ॥ २४ ॥

ज्ञानदर्पणः—प्रविश्य चाध्यासिता मोहराजेन जनमनोवृत्तिर्नगरी ।

राजा—अपि ज्ञायते क्व स प्राप्तो विवेकराज इति ? ।

ज्ञानदर्पणः—अतः परं प्रयत्नगवेषिताऽपि न प्राप्ता तत्प्रवृत्तिः ।

राजा—(सोत्कण्ठं)

आः किं भविष्यति कदापि मनःकलापि-
मेघः सुधारसमयः समयः स कोऽपि ।
यस्मिन् विवेकनृपतिं निजराजधानी-
मानीय नाम गमयामि पुरा पुरीं स्वाम् ॥ २५ ॥

ज्ञानदर्पणः—देव ! किं न संभाव्यते त्वयि ? ।

राजा—(स्वगतं) न जाने कुतोऽपि विवेकनृपतिकुलनभस्तलशशिकलां कृपासुन्दरीमुपश्रुत्यापि किमपि द्रवतीव मे चेतश्चन्द्रकान्तः । अपि च—

---

१ A पुस्तके–'अपि च' इति नास्ति ।

आजन्मनोऽप्यहह ! निर्जितचन्द्रधाम्ना
नाम्नापि या परिचयं न जगाम नाम ।
एनां विवेकनृपतेस्तनयां निशम्य
चेतो ममेदमुदकण्ठत कस्य हेतोः ? ॥ २६ ॥

(प्रकाशं) भद्र ! पुरस्तात्कथय ।

ज्ञानदर्पणः—अथ तत्रापि कञ्चिन [1] स्वसंबद्धमुदन्तमधिगच्छन् निश्चलीभूय स्थितोऽस्मि तावत् ।

राजा—साधु अनुष्ठितम् । अनिर्वेदो हि संवननबीजाक्षरं सिद्धेः ।

ज्ञानदर्पणः—अपरेद्युश्च,

देवानामपि विस्मयं विदधतीं वैवर्ण्यरोमोद्गम-
स्वेदोत्कम्पमयीर्दशाश्च दिशतीं क्षोणीश्वराणामपि ।
सौन्दर्येण तपस्विनामपि मनस्युत्पादयन्तीं स्पृहां
गौराङ्गीं तरुणीं स्वभावसुभगामद्राक्षमेकामहम् ॥ २७ ॥

सा च वृद्धयैकया वनितया यूना च नरेणैकेनानुगम्यमाना मामेत्य प्रणनाम । दत्ताशिषा च पृष्टा मया 'भद्रे ! का त्वमसि ? ।' उक्तश्चानया 'भगवन् ! महती मे कथा । तथापि समासतः शृणु । अहं हि सच्चरित्रनरेन्द्रनन्दिनी नीतिदेवीकुक्षिसंभवा श्रीमत्कुमारपालदेवचक्रवर्तिप्रणयिनी कीर्त्तिमञ्जरी नाम ।' अथ मयोक्तं 'कल्याणि ! क एष कुमारपालः ' इति ।

राजा—साधु ज्ञानदर्पण ! साधु । ममैव मनसा सह संप्रधार्य पर्यनुयुक्तवानसि ।

ज्ञानदर्पणः—प्रत्यपादि च तया 'भगवन् ! वैरिकुलकालकेतुं किमेतमपि क्षत्रप्रधानं राजानं न जानासि ? । आश्चर्यमाश्चर्यम्,

एको यः सकलं कुतूहलितया बभ्राम भूमण्डलं
प्रीत्या यत्र पतिंवरा समभवत्साम्राज्यलक्ष्मीः स्वयम् ।
श्रीसिद्धाधिपविप्रयोगविधुरामप्रीणयद्यः प्रजां
कस्यासौ विदितो न गूर्जरपतिश्चौलुक्यवंशध्वजः ॥ २८ ॥'

अथावाचि मया 'आर्ये ! साधु ज्ञापितोऽस्मि । संप्रत्यस्मरं तं गूर्जरेश्वरं

१ A & C किञ्चन.

राजर्षिम् ' । पुरस्तात्कथय । कीर्त्तिमञ्जरी प्राह, ' भगवन् ! इमां गुणावलीं नाम ममैव धात्रीं विद्धि । यदङ्कलालिताहं वृद्धिमागता । अमुं च प्रतापं नाम मे भ्रातरमवेहि । अथ स भर्त्ता मूलादपि वीरश्रीविलासरसैकलालसोऽभूत् । मम तु स बाल्यादपि प्राणप्रियः समजनि । तदनेन दग्धास्मि प्रतिदिनं दर्शितप्रतिप्रेयसीर्ष्यासंपदा । अपि च—

कविभिरभितो बद्धा कण्ठे धृता बत ! बन्दिभिः
किमपि गमिता दण्डैर्मूर्च्छां बुधैरवमानिता ।
तदिति कुपतेस्तस्यासक्ता कथं न विडम्बिता
तदपि मनसाप्यस्मिन् प्रेमा न मे श्लथतां गतः ' ॥ २९ ॥

इदं चापरमाकर्णय तच्चेष्टितम्—

' निष्कामनिष्कलङ्काया ममोत्कीर्त्तनपर्वणि ।
व्रीडानम्रमुखाम्भोजः श्रयत्येष विलक्षताम् ॥ ३० ॥

अन्यदा च निष्कृपनृपनिरूपितेन त्यागनाम्ना राजपुरुषेण गुणावलीद्वितीया नीत्वा मुक्तास्मि जलधिवेलावनेषु । भर्तृनिर्वासनदोषदुःखाच्च दुरारोहेष्वारुह्य महामहीधरेषु बहुशोऽपि दत्तवती महार्णवेषु झम्पाम् । अगमं च रसातलम् । अपतं च पन्नगीमुखेषु । तथापि न विपन्ना । तत्सत्यं मरणमपि दुष्प्रापं पापकर्मणाम् । ततश्च प्राप्ता भगवतो नारदस्य निकटम् । तेन च नीता सुरसदनम् । तत्रापि न किञ्चित्संवृत्तम् । ततः प्राप्ता मर्त्त्यलोकम् । स्थिता वैखानसव्रतमादाय तपोवनेषु । अन्येद्युरुपागतो नृपसमीपादयं प्रतापो नाम मम भ्राता । तेन चेदं न्यवेदि, 'भगिनि ! संप्रत्यजनि जैनमुनिप्रियस्ते प्रणयी । तैश्चैवं विप्रतारितः । यथा—

दूराद्दूरं प्रापय कीर्त्तिं कल्याणहेतवे स्वस्य ।
निर्विषयं चाज्ञापय बन्धुममुष्याः प्रतापाख्यम् ॥ ३१ ॥

तच्चाप्तबुद्ध्या परिगृह्य निर्वासितोऽहम् । तथापि दूरप्रापणार्थमनुपदमेष्यति धर्मशेखरनामा नवदण्डपाशिकः । तदेहि वरं स्वयं दूरीभवावः ' इति । तच्चाकर्ण्य सरोषमुक्तं मया, 'भ्रातः ! स्थिताहमियन्तं कालं कुलव्रते । अधुना पुनः पश्य यत्करोमि' इत्युक्त्वा प्राप्ता विश्वजयिनो मोहनृपतेर्निकटम् । तैस्तैश्च वचनप्रपञ्चैर्दूरं ग्राहितस्तदुपरि संरम्भं मोहमहीपतिः । कृता चानेन सर्वसमक्षमप्रतिमा प्रतिज्ञा । यथा—

अहं वा न भवाम्येष जगद्विक्रमघस्मरः ।
न स वा भवति क्षुद्रः क्षत्रियः समराङ्गणे ॥ ३२ ॥

प्रयुक्तश्च तत्प्रकृतिषु भेदोपायः । वशीकृतं चाखिलं तद्राजमण्डलम् । संप्रति करिष्यते स तदुपरि यात्राम् । तद्भगवन् ! कथय कतरोऽनयोर्जयश्रीकुचकलशयोः करिष्यति मुक्ताहारलीलायितम् ? । निरर्गलज्ञाननयनो हि मुनिजनो भवति' इति । मयावाचि, 'भद्रे ! ननु प्रथममात्माभाववचसा सूचित एव मोहराजेन स्वात्मनः पराजयः' । कीर्तिमञ्जरी 'हा ! धिक्कष्टम्, एवं चेन्नास्ति मे विश्वत्रयेऽप्यवस्थितिः ' इत्युक्त्वा गता सा वनिता । अहमपि प्राप्तो देवस्यान्तिकम् ' इति ।

राजा—

कलीनामालयो मूलं वैराणां पदमापदाम् ।
सत्यं रक्ता विरक्ताश्च विषमेव स्त्रियो नृणाम् ॥ ३३ ॥

अपि च—

साक्षात्कारे झगिति जगतां जागरूकं त्रयाणां
तार्तीयीकं प्रकृतिविशदं त्वन्मयं यस्य चक्षुः ।
सोऽहं मोहं समरशिरसि न्यस्य विश्वैकशत्रुं
निर्वेक्ष्यामि प्रणयनिबिडां निर्वृतिं निर्विशङ्कः ॥ ३४ ॥

(नेपथ्ये)

वैतालिकः—

शीतांशोः स्वपरिग्रहेण महता माहात्म्यदानोद्यतो
विद्विष्टोज्ज्वलराजमण्डलसरोजिन्याः प्रियंभावुकः ।
विश्वान्धंकरणस्य शश्वदगदङ्कारस्तमःसंचय-
व्याधेस्तारकवर्त्ममध्यमधुना धाम्नां पतिः प्राश्नति ॥ ३५ ॥

राजा—(ऊर्ध्वमवलोक्य) अयि ! कथं ललाटंतपस्तपनस्तदतिक्रामति भगवतो वीतरागस्य सपर्याक्षणः ? । ज्ञानदर्पण ! त्वया सततं मम संनिहितेन भाव्यम् ।

(इति निष्क्रान्ताः सर्वे ।)

प्रथमोऽङ्कः ।

द्वितीयोऽङ्कः ।

(ततः प्रविशति पुण्यकेतुः ।)

पुण्यकेतुः—(स्वगतं)

अविज्ञातसुखास्वादाः पारवश्यविसंस्थुलाः ।
चिन्ताक्लिष्टतया कष्टं जीवन्ति हतमन्त्रिणः ॥ १ ॥

भवतु तावत् । मया हि स्वामिनः सकलाधिकारचिन्तास्ववहितेन सर्वं सुविहितमेव । तथा च—

उत्खातान्यरिमण्डलानि सुहृदः संवर्धिताः प्रोद्धृताः
प्रोद्धृत्ता अपि कण्टकाः प्रकृतयो न्याय्ये नियुक्ताः पथि ।
अध्यक्षाः प्रतिमण्डलं नियमिताः सौस्थ्यं च नीताः प्रजा
निर्व्याजं बलदुर्गकोशनिचयाः पुष्टिं परां प्रापिताः ॥ २ ॥

अथवा जगज्जिगीषाजागरूकमहिम्नि मोहराजे स्वामिनः प्रतिपन्थिनि किमिव सुविहितम् ?। (पुनः सावष्टम्भं) तत्रापि सर्वं सुघटितमेव । यतः, ग्राहितो निपुणज्ञानदर्पणप्रणिधिमुखेन रिपोरितिवृत्तं देवः । प्रापितश्च तदुपरि परं संरम्भम् । अभ्यमित्रीणे च चौलुक्यचक्रवर्त्तिनि क इव स मोहहतकः ? । किञ्च, संप्रति परिगृहीतेन गुरूपदेशनाम्ना आप्तनैमित्तिकेन निवेदितमेतत् । यथा—

विवेकराजतनयां परिणीय कृपां नृपः ।
भूर्भुवःस्वस्त्रयीशत्रुं मोहराजं विजेष्यते ॥ ३ ॥

इति । तन्नूनं कृपासुन्दरीसङ्गमसव्यपेक्षो विपक्षप्रतिक्षेपः । विवेकसंपर्कनिमित्ता कृपासुन्दरीप्राप्तिः । अपरत्रालब्धपदः संप्रति गूर्जरमण्डलमलंकुरुते विवेकनृपतिरिति च श्रुतिः । तदानयनाय व्यापारितो व्यवसायसागरः । स च न जाने किमद्यापि चिरयति? इति ।

(ततः प्रविशति व्यवसायसागरः ।)

व्यवसायसागरः—(पुरो विलोक्य सोल्लासं) (१) एसो सो पुण्णकेदु अमच्चो,

जो निमिसं पि निसासु वि न सुयइ पहुरज्जकज्जचिंताए ।
एयस्स लहइ को चरणरेणुकणकरणिलेसं पि? ॥ ४ ॥

---

(१) एष स पुण्यकेतुरमात्यः ।

यो निमिषमपि निशास्वपि न स्वपिति प्रभुराज्यकार्यचिन्तया ।
एतस्य लभते को चरणरेणुकरणिलेशमपि? ॥

उवसप्पामि णं दाव । (उपसृत्य) जयदु जयदु अमच्चो ।

पुण्यकेतुः—(विलोक्य सहर्षं) अये ! कथं चिन्तानन्तरमेवोपनतो व्यवसायसागरः ? । भद्र ! इदमासनमास्यताम् ।

(व्यवसायसागरः प्रणम्योपविशति ।)

पुण्यकेतुः—भद्र ! कथय किं किं कृतवानसि ? ।

व्यवसायसागरः—(१) एवं विन्नवीयदि । इदो दाव अमच्चादेसेण गडुय[1] गवेसिदो तेसु तेसु ठाणेसु विवेयनिवो । अदिनिगूढपैचारु[2] त्ति चिरादो सच्चविदो य ।

पुण्यकेतुः—एवमेवैतत्,

ऋद्धिमानयशःस्थानच्युताः परिजनोज्झिताः ।
विदेशवासिनश्छन्नं विचरन्ति मनस्विनः ॥ ५ ॥

ततस्ततः ।

व्यवसायसागरः—(२) वयणविन्नासविणयादीहिं कदो अचिरेण हिदहिदओ । नियन्तिदो दीवंतरगमणववसायादो । अन्नदा पत्थुदा मए राएसिणो कुमारपालनरवइणो गुणसंकहा । जैधा[3]—

(३) तस्स भुयापल्लंकट्ठियाइ सुहमीलियच्छिजुयलाए ।
फणिमणिकीलणदुक्खं विम्हरियं पुहविदेवीए[4] ॥ ६ ॥

एवं च उप्पादिदा बाढं देवम्मि दंसणुक्कंठा । आणीदो सो समं देवीए तणयाए य चालुक्करायहाणिं[5] । ठिदो भगवदो सिरिहेमचंदस्स तवोवणे । राएसिणा सह कारिदो गुरुसमीवे दंसणं ।

उपसर्पामि ननु तावत् । जयतु जयतु अमात्यः ।

(१) एवं विज्ञाप्यते । इतस्तावदमात्यादेशेन गत्वा गवेषितस्तेषु तेषु स्थानेषु विवेकनृपः । अतिनिगूढप्रचार इति चिरात्सत्यापितश्च ।

(२) वचनविन्यासविनयादिभिः कृतोऽचिरेण हृतहृदयः । नियन्त्रितो द्वीपान्तरगमनव्यवसायतः । अन्यदा प्रस्तुता मया राजर्षेः कुमारपालनरपतेर्गुणसंकथा । यथा—

(३) तस्य भुजापर्यङ्कस्थितया सुखमीलिताक्षियुगलया ।
फणिमणिक्रीडनदुःखं विस्मृतं पृथिवीदेव्या ॥

एवं चोत्पादिता बाढं देवे दर्शनोत्कण्ठा । आनीतः स समं देव्या तनयया च चौलुक्यराज-

---

१ B & C हुअइ. B २ & C °पचारो त्ति. ३ B & C जधा. ४ B & C याए. ५ B & C °धाणिं.

पुण्यकेतुः—(सरभसं) भद्र ! किमुच्यते? चतुरोऽसि महापुरुषसंयोजनव्यवहारवर्त्मसु । यतः—

इतरेतरमुत्कण्ठितमनसोः स्वपदप्रधानयोरुभयोः ।
अभ्यर्हितासु भूमिष्वधिकुरुते दर्शनं प्रथमम् ॥ ७ ॥

अथ तत्र कच्चिन्नेत्रपथमवातरत्कृपासुन्दरी देवस्य ।

व्यवसायसागरः—(१) [1]अध किं ? । अवि य, तीए वि साणुरायं सुचिरं निव्वन्निदो देवो ।

पुण्यकेतुः—(सहर्षं) यद्येवं नायकयोः पुनर्दर्शनप्रकारपरिचिन्तनमेवैकमवशिष्यते ।

व्यवसायसागरः—(२) तं पि संपन्नं त्ति परिभावेदु अमच्चो ।

पुण्यकेतुः—(सवितर्कं) कथमिव ? ।

व्यवसायसागरः—(३) जदो महदा निबंधेण विवेयनिवो देवेण नीदो नियमन्दिरं । वासिदो सपणयं नियचित्तसालाए ।

पुण्यकेतुः—(सप्रमोदं) दिष्ट्या संपूर्णास्तर्हि मे मनोरथाः। साधु भो व्यवसायसागर ! साधु । यदेवमतिगहनमपि कार्यमक्लेशेन सम्पादितवानसि। यदि वा—

किमत्र चित्रं यन्मन्त्रा दुःसाधा अपि मन्त्रिणाम् ।
सिध्यन्ति हेलया दक्षैरासैरुत्तरसाधकैः ॥ ८ ॥

तद्गच्छ पुनर्विवेकराजस्य भव पारिपार्श्विकस्त्वम् । वयमपि प्रस्तुतार्थमनुसन्धातुमुपगच्छामः ।

(इति निष्क्रान्तौ ।)

विष्कम्भकः ।

धानीम् । स्थितो भगवतः श्रीहेमचन्द्रस्य तपोवने । राजर्षिणा सह कारितो गुरुसमीपे दर्शनम् ।

(१) अथ किं ? । अपि च, तयापि सानुरागं सुचिरं निर्वर्णितो देवः ।

(२) तदपि संपन्नमिति परिभावयतु अमात्यः ।

(३) यतो महता निर्बन्धेन विवेकनृपो देवेन नीतो निजमन्दिरम् । वासितः सप्रणयं निजचित्रशालायाम् ।

---

१ B & C अध इं.

(ततः प्रविशति राजा विदूषकश्च ।)

राजा—(दीर्घमुष्णं च निःश्वस्य)

श्रुतां प्रणिधिवक्त्रेण दृष्टां गुरुतपोवने ।
तामेकां सुन्दरीं मुक्त्वा नान्यत्र रमते मनः ॥ ९ ॥

किञ्च—

सर्वज्ञचरणयुगले सरसिजलक्ष्मीं विलोक्य मे चित्तम् ।
चिन्तयति नेत्रनलिनद्वयमनघं तत्क्षणं तस्याः ॥ १० ॥

(पुनराकाशे लक्षं बद्ध्वा)

धातस्त्वया या मृगशावलोचना
हृता नितान्तं खलचित्तवृत्तिना ।
संस्पर्द्धया ते मम चिन्तया हृदि
न्यासीकृता सैव सुधातरङ्गिणी ॥ ११ ॥

अपि च—

सर्वंकष ! पञ्चेषो ! संप्रति मां प्रति करिष्यसे किं रे ? ।
स्त्रीरत्नं तन्मम हृदि यस्य खलु त्वमपि दासोऽसि ॥ १२ ॥

अन्यच्च—

आच्छिन्नं यस्य धनुर्भ्रूवल्लीछद्मना यया तन्व्या ।
सार्द्धं मम मनसि तया स वसन्नो लज्जसे काम ! ॥ १३ ॥

विदूषकः—(स्वगतं) (१) हद्धी हद्धी पुरा वि दाव एस उम्मत्तओ आसि । इदाणिं पुण विसेसो जाओ । जं तस्सेव सेयंबरगुरुणो तवोवणे निज्झाइदा अणेण किवासुंदरी णाम कन्नगा । तदणुरायविसंठुलो य असमंजसं वियरदि । जंवा तंवा पलवदि । ता सच्चमेयं,

जत्थ व तत्थ व नूणं कामियणो नियइ तम्मयं सयलं ।
उम्मत्तयरसरसिओ पिच्छइ नन्नं विणा कणयं ॥ १४ ॥

---

(१) हा धिक् हा धिक् पुरापि तावदेष उन्मत्तक आसीत् । इदानीं पुनर्विशेषो जातः । यत्तस्यैव श्वेताम्बरगुरोस्तपोवने निर्ध्याता अनेन कृपासुन्दरी नाम कन्यका । तदनुरागविसंस्थुलश्चासमंजसं विचरति । यद्वा तद्वा प्रलपति । ततः सत्यमेतत्,

यत्र वा तत्र वा नूनं कामिजनो पश्यति तन्मयं सकलम् ।
उन्मत्तकरसरसितः प्रेक्षते नान्यद्विना कनकम् ॥

---

१ B & C पुरा दा°

भोदु दाव बोधयिस्सं । (प्रकाशं) भो वयस्स ! कीस तीसे रूवविवज्जिदाए इत्थिगाए कदे माइण्हियाइ व्व मिगो बाढं तम्मसि ? । कहं वा तप्पिम्मगंहिल्लिओ रूवनिज्जिदरदीणं देवीणं परम्मुहो होसि ? । ता सव्वधा न जुत्तमिमं ।

राजा—वयस्य ! मा मैवम् । यत:—

मन्ये प्राच्यभवान्तरेऽपि भगवत्सर्वज्ञपादश्रिया
संश्लिष्टं मम भालमण्डलमिदं दृष्टिश्च तद्दर्शनैः ।
तस्मादस्मि सुधांशुरश्मिशिशिरां स्त्रीरत्नचूडामणे-
र्लीलोन्मूलितकाममार्गणगतिं तस्याः श्रितोऽहं दशम् ॥ १५ ॥

अपि च—

दिशि दिशि विरचितबहुविधरूपा यद्वीक्ष्यते मया व्यक्तम् ।
तद्दिव्या काचिदसौ मानुष्या नेदृशी शक्तिः ॥ १६ ॥

(पुनः स्वहृदयं प्रति ।)

धारय हृदय ! सयत्नं रत्नं रमणीषु जीवितं यन्मे ।
येन विना मयि वर्षति तुषाररुचिरपि कणान् वह्नेः ॥ १७ ॥

विदूषकः—(स्वगतं सविषादं) (१) अदिदूरमारोविदो एस दासीए पुत्तगेण पिम्मग्गहेण । ता किमिदाणिं कायव्वं ।

राजा—वयस्य ! प्रियाविरहव्यथाक्रान्तस्वान्ततया न क्वापि प्राप्नोमि रतिम् । तदादेशय धर्मारामस्य पन्थानम् । येन तत्र गत्वात्मानं विनोदयामि ।

विदूषकः—(२) इदो इदो एदु वयस्सो । (उभावपि परिक्रामतः ।)

विदूषकः—(३) भो वयस्स ! पिच्छ पिच्छ,

भवतु तावद् बोधयिष्ये । भो वयस्य ! कस्मात्तस्या रूपविवर्जितायाः स्त्रियाः कृते मृगतृष्णिकाया इव मृगो बाढं ताम्यसि ? । कथं वा तत्प्रेमग्रथिलको रूपनिर्जितरतिभ्यो देवीभ्यः पराङ्मुखो भवसि ? । ततः सर्वथा न युक्तमिदम् ।

(१) अतिदूरमारोपित एष दास्याः पुत्रकेन प्रेमग्रहेण । ततः किमिदानीं कर्त्तव्यम् ।

(२) इत इत एतु वयस्यः ।

(३) भो वयस्य ! पश्य पश्य,

---

१ B & C °गहिल्लओ. २ A °तर्ति. ३ B & C तन्मे. ४ B & C कादव्वं.

एसो धम्मारामो जत्थत्थि महद्दुमो दमो नाम ।
मुत्तावलीहिं फलिओ विडम्बए तियसतरुलच्छि ॥ १८ ॥

राजा—(विलोक्य स्वगतं ।) अत्र हि—

सौभाग्यभाग्यपात्र्या दूरस्थे दृष्टिविभ्रमे तस्याः ।
संवृद्धो मम हृदये यास्यति शान्तिं स सन्तापः ॥ १९ ॥

(धर्मारामपरिसरमुपसृत्य निरूप्य च ।) इह हि—

विरतिसरसीसमुत्थं विमलं संतोषशतदलं वीक्ष्य ।
तस्याः स्मरामि सततं विभ्रमविस्फारितं चक्षुः ॥ २० ॥

(पुनर्विलोक्य) वयस्य ! क्वासौ शाखी ? ।

विदूषकः—(१) एस पुरो ज्जेव ।

राजा—(विलोक्य सहर्षं)

घटितमिवात्मानमिमं मन्येऽहं पुण्यसारसन्दोहैः ।
यत्तत्परिमलवाही मामनुगृह्णाति पवनोऽयम् ॥ २१ ॥

(पुनराघ्राय)

परिमलमेनं मन्ये तस्या निस्सीमपुण्यमालायाः ।
अयमन्यथा कथं मे प्राणानां जायतां प्राणः ॥ २२ ॥

विदूषकः—(२) ऍवमेदं ।

राजा—(दक्षिणाक्षिस्पन्दनमभिनीय)

कुरु हृदय ! मुदं यस्मात्फलितः पुण्यद्रुमस्तवेदानीम् ।
इति कथयति मम दक्षिणचक्षुःस्फुरणं शुभोदर्कम् ॥ २३ ॥

विदूषकः—(३) अणेण सुहनिमित्तेण तुह मणोवल्लहा किवासुन्दरी वि इत्थ पएसे संभाविज्जइ ।

एष धर्मारामो यत्रास्ति महाद्रुमो दमो नाम ।
मुक्तावलीभिः फलितो विडम्बयेत् त्रिदशतरुलक्ष्मीम् ॥

(१) एष पुर एव ।
(२) एवमेतत् ।
(३) अनेन शुभनिमित्तेन तव मनोवल्लभा कृपासुन्दर्यप्यत्र प्रदेशे संभाव्यते ।

---

१ B & C एवं नेदं.

राजा—साधु वयस्य ! साधु । साप्यत्र सावधानैर्विलोकनीया । (इति सानन्दं परिक्रामति ।)

विदूषकः—(१) वयस्स ! पिच्छ पिच्छ एस सो पायवो ।

राजा—(विलोक्य) अहो ! सकलवृक्षजातिविलक्षणोऽयं पादपः । यतो दृष्टमात्रोऽपि मयि वर्षति सुधाधाराधोरणीः । (पुनः सम्यग्निरीक्ष्य ।) अहह ! छायासौन्दर्यमस्य । तथा च—

अस्यच्छायाधिक्यात्संपन्नं खलु कलङ्कमपनेतुम् ।
आरब्धं दानमहो ! कर्त्तुं किल कल्पवृक्षेण ॥ २४ ॥

(नेपथ्ये)

त्रिभुवनहितेऽखण्डितसुखसन्दोहदायिनि सकलपादपेभ्यो विलक्षणोऽयं पादपः । यतः—

जलधरजलं न वाञ्छति संकोचं भजति सिन्धुपाथोभिः ।
अमृतेनापि न विकसति रसेन रूढोऽपरेणायम् ॥ २५ ॥

राजा—(श्रुत्वा सविस्मयं) अहो ! चित्रं चित्रम् । सन्ति तादृशा अपि प्रदेशाः । यत्र जलादृतेऽपि प्ररोहन्ति तरवः । भवतु तावत्कोऽपि कस्मैचिदुपदिशति । तत्केनामुना भवितव्यम् ।

विदूषकः—(२) कहं छहिं रसेहिं नवहिं नट्टरसेहिं वा परूढो एस तरू ? ।

(पुनर्नेपथ्ये)

सोमते ! दक्षासि अस्य वृक्षस्य सेचनके ।

सोमता—(सविनयं) (३) भयवं जाणेदि । पुणो वि आणवेदु तत्तभवं ।

(नेपथ्ये)

उन्मुद्रितसरस्वतीभाण्डागारस्य ज्ञानसमुद्रस्य श्रीहेमचन्द्रस्य गुरोरादेशसुधासारं मन्मुखप्रणालद्वारेण धारय मनःकुण्डे । यदस्य तरोर्निजसखीसकाशात्सेचनकं कारयेः ।

---

(१) वयस्य ! पश्य पश्य एष स पादपः ।
(२) कथं षड्भिः रसैर्नवभिर्नाट्यरसैर्वा प्ररूढ एष तरुः ? ।
(३) भगवान् जानाति । पुनरपि आज्ञापयतु तत्रभवान् ।

---

१ B & C वृक्षः. २ B & C सस्मयं.

सोमता—(१) भयवं ! इमाए गुरुयणआणाए आणन्दरसतरंगिदं मे हिदयं[1]। परं केण जलेण एस रुक्खो सित्तव्वु ? त्ति आइसस्सु ।

(नेपथ्ये)

साधूपन्यस्तं भवत्या । श्रूयताम्—

संयमरसेन भृत्त्वा ध्यानोत्तमकलशमुरसि विन्यस्य ।
सिञ्चति यथा द्रुममिमं सखी तव तथा त्वया कार्यम् ॥ २६ ॥

सोमता—(२) जं भयवं आणवेदि ।

राजा—अये ! कश्चिदेष तपोधनः ? । भवतु तावत् । वृक्षान्तरित एव द्रक्ष्यामि । (तथा करोति विलोक्य ।)

चित्रं शतदलमेतत्परि[2]मिलदलिहरिसंश्रितश्रीकम् ।
धत्तेऽसौ नवशाखी नाद्भुतमद्भुतचरित्रेषु ॥ २७ ॥

अपि च—

त्वत्तः शाखिन् ! दुष्टं न परं पश्यामि विश्वविश्वेषु ।
उद्भिन्नं तव कुसुमं विह्वलयति मुनिमनो यस्मात् ॥ २८ ॥

विदूषकः—(स्वगतं) (३) कीदिसोऽयं पियवस्सस्स चित्तविब्भमो ? जं एवं जंपदि । ता सयं पि पिच्छिस्सं । (प्रकाशं) वयस्स ! अहं पि पिच्छिस्सं ।

राजा—गृहाण दृशोः फलम् ।

विदूषकः—(आयतां कन्धरां विधाय विलोक्य च ।) (४) अच्छरियं अच्छरियं जं दाणि पायवो चन्दपसू जादो । तथा च—

---

(१) भगवन् ! अनया गुरुजनाज्ञया आनन्दरसतरङ्गितं मे हृदयम् । परं केन जलेनैष वृक्षः सेक्तव्यः ? इति आदिश ।

(२) यद्भगवान् आज्ञापयति ।

(३) कीदृशोऽयं प्रियवयस्यस्य चित्तविभ्रमो यदेवं कथयति ? । ततः स्वयमपि प्रेक्षिष्ये । वयस्य ! अहमपि प्रेक्षिष्ये ।

(४) आश्चर्यमाश्चर्यं यदिदानीं पादपश्चन्द्रप्रसूर्जातः ।

---

१ B & C हियं. २ B C °परिमलमिलदलिहरिश्रि.°

(१) एसो सारयचन्दो नीहरिदो तरुवराओ संपुन्नो ।
लायन्नसुधा[1] पिज्जइ जस्स सुरेहिं अलिछलेण ॥ २९ ॥

राजा—वयस्य ! व्यालोकितं सुधालहरीसहोदरं मृतसंजीवकं किमपि ।

विदूषकः—(चक्षुषी निमील्य) (२) एदं दिट्ठिगोयरं कडुय अन्नं न विसविलासं पलोयिस्सं ।

राजा—साधु वयस्य ! साधु । अभिज्ञोऽसि दर्शनीयवस्तूनाम् । श्रूयतां वाचोयुक्तिः—

नेदं पद्मं नेन्दुर्वदनं विकस्वरं तस्याः ।
यत्पथ्यं मुनिमनसो विषयव्यापारविरतस्य[2] ॥ ३० ॥

सोमता—(साक्षेपं) (३) सहि ! कहं पायवस्स सेचणयं न करेसि ? । कहं विम्हरिदं गुरुसासणं, विहडिदो झाणकलसो ? । सेचणयं[3] विणा सच्छायो न भविस्सदि एस पायवो ।

कृपासुन्दरी—(ससंतापमिव) (४) सहि ! महुयरराएण मह हिययादो अवहरिदो झाणकलसो । ता किं कुणेमि ? ।

सोमता—(वृक्षमवलोक्य स्वगतं) (५) अयि ! अवहरिदो ज्जेव अणेण महुयरराएण झाणकलसो । (प्रकाशं) पियसहि ! पुणो वि संघडसु झाणकलसं ।

कृपासुन्दरी—(सहासं) (६) सहि ! देववल्लहा होसि, जं भग्गं संघडसु त्ति जंपसि ।

---

(१) एष शारदचन्द्रो निस्सृतस्तरुवरात्संपूर्णः ।
लावण्यसुधा पीयते यस्य सुरैरलिच्छलेन ॥

(२) एतद्दृष्टिगोचरं कृत्वाऽन्यन्न विषविलासं प्रलोकिष्ये ।

(३) सखि ! कथं पादपस्य सेचनकं न करोषि ? । कथं विस्मृतं गुरुशासनम् ? । विघटितो ध्यानकलशः । सेचनकं विना सच्छायो न भविष्यति एष पादपः ।

(४) सखि ! मधुकरराजेन मम हृदयतोऽपहृतो ध्यानकलशस्ततः किं करोमि ? ।

(५) अयि अपहृत एवानेन मधुकरराजेन ध्यानकलशः । प्रियसखि ! पुनरपि संघटय ध्यानकलशम् ।

(६) सखि ! देववल्लभा भवसि, यद्भग्नं संघटयेति जल्पसि ।

---

१ B & C छुहा. २ B & C विवशस्य. ३ B & C सेचणं.

राजा—(सम्यग् निरूप्य स्वगतं) अयि ! सैव कृपासुन्दरी । यया मम दृष्टि-चकोरिकाया निजवदनेन्दुकिरणैः कारितः पारणविधिः । सांप्रतं च 'मधुकरराजविघटितध्यानकलशः' इतिवचनेन संभावयति माम् । तद्धृदय ! विधेहि लास्यम् । भज च प्रमोदसंदोहम् । यतः—

चेतः ! प्ररूढो हृदयालवाले मनोरथः पादपसत्तमो यः ।
स वल्लभावक्त्रविलोकनेन प्रकाममिद्धः फलितः फलेन ॥ ३१ ॥

(पुनः साभिलाषमवलोक्य)

अस्याः प्रियाया वदनेन्दुबिम्बे लावण्यपङ्के मम दृष्टिधेनुः ।
मग्ना तथा भग्नपदेव मन्दा नोत्थातुमीशा क्षणमेकमेषा ॥ ३२ ॥

सोमता—(साक्षेपं) (१) सहि ! गुरुयणस्स आणाभंगे जं पावं होदि तं कस्स ? ।

कृपासुन्दरी—(२) सहि ! मज्झ ।

सोमता—(३) जइ एवं ता झाणकलसेण सेचणयं कुण ।

(कृपासुन्दरी सभयं हृदि नेत्रे विन्यस्य तरुं प्रति ध्यानं नाटयति ।)

राजा—(ससंभ्रमं) कीदृशो ध्यानकलश इति निरीक्ष्य सविषादम्,

पुण्यस्त्वमेव तरुवर ! हृदयस्थं त्वां विलोकते यदियम् ।
मामेव हि निर्भाग्यं श्वपचमिव स्पृशति नो दृष्ट्या ॥ ३३ ॥

कृपासुन्दरी—(ध्यानं पारयित्वा) (४) एसो[1] साही अहिसित्तो बहिणि ! झिज्जए कीस ? ।

सोमता—(विलोक्य स्वगतं) (५) कहमेयं पुरिसरयणं आहिविडंबिदं पिच्छिऊण एवंविहं पियसही जंपदि ? । एयं पुण न संभवदि जदो एसा पुरिसविद्देसिणी । तथा च—

---

(१) सखि ! गुरुजनस्याज्ञाभङ्गे यत्पापं भवति तत्कस्य ? ।
(२) सखि ! मम ।
(३) यद्येवं ततो ध्यानकलशेन सेचनकं कुरु ।
(४) एष शाखी अभिषिक्तो भगिनि ! क्षीयते कस्मात् ? ।
(५) कथमेतं पुरुषरत्नमाधिविडम्बितं प्रेक्ष्य एवंविधं प्रियसखी कथयति ? । एतत्पुनर्न संभवति यत एषा पुरुषविद्वेषिणी

---

१ B & C एसो ड सा.°

चत्तो दससयनित्तो परिहरिओ फणिवई तह इमाए ।
का गणणा अवरनिवाण पुरिसविद्देसिणी एसा ॥ ३४ ॥

परमज्ज अन्नादिसी दीसदि । तथा च—

थंभियदेहविवन्ना सेयसलिलविंदुमुत्तियाहरणा ।
रोमंचकंचुयसिरिं धरमाणा भासए बाला ॥ ३५ ॥

(प्रकाशं) सहि ! जइ वि खिन्नसरीरा तहा वि करफंसणेण संभावेहि तरुवरं।

कृपासुन्दरी—(१) जं पियसही भणदि । (इति पाणिवल्लवेन तरुं स्पृशति ।)

विदूषकः—(सौत्सुक्यं) (२) पियवयस्स ! झत्ति नियपाणिणा से पाणिं धरेसु । जहा तुम्ह सरीरे अमयपवाहो पयट्टदि ।

राजा—(ससंभ्रमं तरुपल्लवगुच्छान्तरेण पाणिना तस्याः पाणिग्रहणं कृत्वा स्वगतं)

भृङ्गायितं यज्जिनपादपङ्कजे
मुक्तान्यकृत्येन चिरं कर ! त्वया ।
तस्यानुभावात्स्मरतापघस्मरो
बभूव तेऽस्याः करसङ्गमोत्सवः ॥ ३६ ॥

कृपासुन्दरी—(स्वगतं) (३) कहं पायवस्स एवंविहो पल्लवो भोदि ? । जस्स फंसादो मणवयणाणं अगोयरो उप्पज्जइ सुहसंभारो । ता सहियणं पुच्छिस्सं । (प्रकाशं) सहि ! कहं एदस्स पायवस्स पल्लवसंसग्गेण सलिलसेकेण व रोमंचमिसेण कन्दलिदं मह देहमहीए ? ।

त्यक्तो दशशतनेत्रः परिहृतः फणिपतिस्तथानया ।
का गणनाऽपरनृपाणां पुरुषविद्वेषिणी एषा ॥

परमद्यान्यादृशी दृश्यते ।

स्तम्भितदेहविवर्णा स्वेदसलिलबिन्दुमौक्तिकाभरणा ।
रोमाञ्चकञ्चुकश्रियं धरन्ती भासते बाला ॥

सखि ! यद्यपि खिन्नशरीरा तथापि करस्पर्शनेन संभावय तरुवरम् ।

(१) यत्प्रियसखी भणति ।

(२) प्रियवयस्य ! झटिति निजपाणिना तस्याः पाणिं धर । यथा तव शरीरेऽमृतप्रवाहः प्रवर्तते ।

(३) कथं पादपस्यैवंविधः पल्लवो भवति । यस्य स्पर्शतो मनोवचनयोरगोचर उत्पद्यते सुखसंभारः । ततः सखिजनं प्रक्ष्यामि । सखि ! कथमेतस्य पादपस्य पल्लवसंसर्गेण सलिलसेकेनेव रोमाञ्चमिषेण कन्दलितं मम देहमह्या ।

सखी—(१) देववल्लहे ! कहं पायवपल्लवेसु एरिसो धम्मो समुल्लसदि ?। निज्जियकन्दप्पतेयस्स पुरिसरयणस्स अमयरसवरसिणा करकमलेण भोदव्वं ।

(कृपासुन्दरी श्रुत्वा सलज्जं सरभसं हस्तमाकृष्य पराङ्मुखी तिष्ठति ।)

राजा—(सविषादं)

कथमपि तव कर ! जातः पुण्यश्रीपाणिपल्लवः प्रणयी ।
तत्किं भूयो भविता ? सिद्धान्नं नाङ्कुरं सूते ॥ ३७ ॥

(पुनः स्वकरं विलोक्य)

तत्करपीडनजातस्वेदाम्भःकणमिषेण हस्तो मे ।
संप्रति तस्य वियोगे रोदिति नूनं विधे ! पश्य ॥ ३८ ॥

सोमता—(२) पियसहि ! गुरुसासणविराहणे महन्तो पच्चवाओ। ता कुणह सेचणयं ।

(कृपासुन्दरी साशङ्कं संमुखीभूय तरुं प्रति ध्यानकलशेन सेचनकं विधत्ते ।)

विदूषकः—(वीक्ष्य सानन्दं) (३) पियवयस्स ! तुह पुन्नाणुभावेण अब्भादो अदिक्कंता चन्दलेहा, विद्दविअं तमपडलं । (इति नृत्यति ।)

राजा—(निरूप्य सहर्षं) धिग्मूर्ख ! मा मैवं कुरु । यतः, त्वदुत्तालतुमुलेन त्रस्यति बालहरिणी ।

विदूषकः—(४) जइ एवं ता निजंतेमि एदं अणेण बंभसुत्तेण । (इति यज्ञोपवीतं कण्ठादुत्तारयति ।)

राजा—अहो ! असमयज्ञोऽयं विप्रः । यतः—

यदि भवति पादबन्धः प्रेमगुणेनैव नान्यथा युवतेः ।
पुण्येन विना बत ! नहि पारदबन्धो भवत्यपरैः ॥ ३९ ॥

(पुनर्विमृश्य)

---

(१) देववल्लभे ! कथं पादपपल्लवेष्वीदृशो धर्मः समुल्लसति ?। निर्जितकन्दर्पतेजसः पुरुषरत्नस्यामृतरसवर्षिणा करकमलेन भवितव्यम् ।

(२) प्रियसखि ! गुरुशासनविराधने महान् प्रत्यवायः । ततः कुरु सेचनकम् ।

(३) प्रियवयस्य ! तव पुण्यानुभावेनाभ्रतोऽतिक्रान्ता चन्द्रलेखा । विद्रावितं तमःपटलम् ।

(४) यद्येवं ततो नियन्त्रयाम्येतामनेन ब्रह्मसूत्रेण ।

---

१ सोमतेत्यर्थः ।

स्फुरति न विघ्नो यावत्तावद्दृक्पथ्य सन्ततं तन्वीम् ।
क्षमते नाम न सुचिरं तनुपुण्यं तनुभृतां भोगम् ॥ ४० ॥

सोमता—(सखीं विलोक्य स्वगतं) (१) कहं अज्ज वि न विरमदि तरु-सिंचणादो पियसही? । ता किं कुणेमि एगा अहं? । जइ को वि परिचिदो अप-रिचिदो वा सन्निहिदो भोदि, ता तेण समं कहाविणोदेण खणंमित्तं सुहं कुणेमि । इति ।

(ततः प्रविशति तरोरुड्डीय संवरनामा शुकः ।)

सोमता—(निरीक्ष्य सप्रमोदं) (२) सोहणं संपन्नं । ता ऐणं पुच्छिस्सं । अयि रायसुय ! सागयं तुम्ह ।

शुकः—स्वागतं सज्जनदर्शनेन ।

सोमता—(३) इत्थ धम्मारामे अहिरमसि न व त्ति ।

शुकः—श्रीचौलुक्यचन्द्रस्य कुमारपालदेवचक्रवर्त्तिनः क्रीडाशुकोऽहं तस्य पृष्ठतो विचरामि ।

सोमता—(सावहित्थं) (४) सो राया कत्थ पएसे संपयं ? ।

शुकः—जन्मान्तरप्रणयिनीं कृपासुन्दरीमवलोकयितुमत्रैव वर्त्तते ।

सोमता—(५) तस्स गुणसंकित्तणेण सहलीकरेदु मह कन्ने भवं ।

शुकः—(स्वगतं) इयं गुणग्राहिणी वर्णिनी ततो निवेदयामि स्वामिनो गुणान् । (प्रकाशं) दक्षिणं पाणिमुद्यम्य, एषः—

श्रीहेमचन्द्रक्रमपद्मसेवा-
पवित्रभालः स कुमारपालः ।

---

(१) कथमद्यापि न विरमति तरुसिञ्चनतः प्रियसखी? । ततः किं करोमि एकाहम्? । यदि कोऽपि परिचितोऽपरिचितो वा सन्निहितो भवति, ततस्तेन समं कथाविनोदेन क्षणमात्रं सुखं करोमि ।

(२) शोभनं संपन्नम् । तत एतं प्रक्ष्यामि । अयि राजशुक ! स्वागतं तव ।

(३) अत्र धर्मारामेऽभिरमसे न वेति ।

(४) स राजा कुत्र प्रदेशे सांप्रतम् ? ।

(५) तस्य गुणसंकीर्त्तनेन सफलीकरोतु मम कर्णौ भवान् ।

---

१ B & C खणमेत्तं. २ B & C एयं.

यत्कीर्त्तिजन्मेव सुधामरीचि-
जॅगत्तमो हन्ति महोविलासैः ॥ ४१ ॥

सोमता—(१) विहङ्गमसत्तम ! अदोवरं किं करिस्सदि महाराया ?।

शुकः—

सर्वंकषं कल्मषवर्मदुर्जयं
व्यामोहराजं विनिहत्य सङ्गरे ।
कृपाविलासैरमृतोर्मिसोदरै-
रानन्दितः स्थास्यति काननेऽत्र सः ॥ ४२ ॥

सोमता—(२) रायवल्लह ! सा पुरिसविद्देसिणी सुणीयदि । कहं नरनाहस्स पणयिणी भविस्सदि ? । अवि य, तीसे वट्टदि दुप्पूरो महापणबन्धो ।

शुकः—कीदृशः ? ।

सोमता—(३) सुणसु । तैथा च—

इह भरहनिवाओ जं न केणावि चत्तं
मुयइ मयधणं जो तं पि पाविक्कमूलं ।
नियजणवयसीमं मोयए जो य जूय-
प्पमुहवसणचक्कं सो वरो मज्झ होउ ॥ ४३ ॥

शुकः—प्रथममेव कक्षीकृतोऽयमर्थः पार्थिवेन ।

सोमता—(४) एदं नाहं सद्दहामि ।

---

(१) विहङ्गमसत्तम ! अतःपरं किं करिष्यति महाराजः ? ।

(२) राजवल्लभ ! सा पुरुषविद्वेषिणी श्रूयते । कथं नरनाथस्य प्रणयिनी भविष्यति ? । अपि च, तस्या वर्त्तते दुष्पूरो महान् पणबन्धः ।

(३) शृणु,

इह भरतनृपाद्यन्न केनापि त्यक्तं
मुञ्चति मृतधनं यस्तदपि पापैकमूलम् ।
निजजनपदसीमां मोचयेद्यश्च द्यूत-
प्रमुखव्यसनचक्रं स वरो मम भवतु ॥

(४) एतन्नाहं श्रद्दधामि ।

---

१ B & C 'तथा च'

शुकः—श्रद्धेयमेवेदम् ।

सोमता—(१) इत्थ अत्थे अत्थि सक्खी को वि ? ।

शुकः—(२) अत्थि रायवल्लहो दियवरपहाणपुरिसो ।

विदूषकः—(श्रुत्वा उपसृत्य शुकमवलोक्य च) (३) सत्थि रायसुयस्स ।

शुकः—तव महाद्विजस्य दर्शनेन ।

विदूषकः—(सोमतां निरीक्ष्य) (४) सुंदरि ! सोहग्गगव्विरी होहि ।

शुकः—राजवयस्य ! तव मम च स्वामिना गुरुश्रीहेमचन्द्रपादाम्बुज-प्रत्यक्षं निर्वीराधनमोक्षणे ससव्यसननिर्वासने च प्रतिज्ञातमित्यस्याः साक्षी भव ।

विदूषकः—(५) इत्थ अत्थे मह महबंभणस्स वयणं पमाणं ।

सोमता—(६) नूणं सिद्धमिणं पओयणं ।

शुकः—तद्गमिष्याम्यहम् । (उड्डीय गतः ।)

सोमता—(सविषादं) (७) कहं गदो रायसुओ ? । अज्ज वि पियसही झाणकलससिंचणादो न विरमदि ।

कृपासुन्दरी—(ध्यानसेचनं विमुच्य) (८) सहि सोमदे ! एयस्स साहिणो अदिट्ठगुणपासेन संजदम्हि । पदमेगं चलिदुं न सक्केमि । ता आगंतूण पासादो मुक्खं कुणह ।

---

(१) अत्रार्थेऽस्ति साक्षी कोऽपि ? ।
(२) अस्ति राजवल्लभो द्विजवरप्रधानपुरुषः ।
(३) स्वस्ति राजशुकस्य ।
(४) सुन्दरि ! सौभाग्यगर्विणी भव ।
(५) अत्रार्थे मम महाब्राह्मणस्य वचनं प्रमाणम् ।
(६) नूनं सिद्धमिदं प्रयोजनम् ।
(७) कथं गतो राजशुकः ? । अद्यापि प्रियसखी ध्यानकलशसेचनान्न विरमति ।
(८) सखि सोमते ! एतस्य शाखिनोऽदृष्टगुणपाशेन संयतास्मि । पदमेकं चलितुं न शक्नोमि । तत आगत्य पाशान्मोक्षं कुरु ।

सोमता—(स्वगतं) (१) अदिसएण बंधे पडिस्सदि। (प्रकाशं) भोदु दाव। (समीपमुपसृत्यावलोक्य च) सहि! गाढयरो बंधो नाहं मोक्खं कादुं सक्केमि। जदि परं भट्टा करिस्सदि।

कृपासुन्दरी—(२) सहि सोमदे! असंबद्धपलाविणि! अवेहि।

राजा—(सविषादं)

पायं पायं तस्या लावण्यं शशभृतेव घटितायाः।
विरमति न मम दृशस्तृट् तदसौ ज्वरितेव संवृत्ता ॥ ४४ ॥

विदूषकः—(सहासं) (३) पियवयस्स! सच्छन्दं दाव चिट्ठ जाव तुह पणयिणी देवी इत्थ न एदि।

(ततः प्रविशति देवी राज्यश्रीः रौद्रता च।)

राज्यश्रीः—(साटोपं) (४) हला रुद्दे! अवि नाम अवितहमेदं जं तुमं कधेसि ?।

रौद्रता—(५) भट्टिणि! किमन्नधा तुम्ह निवेदीयदि ?।

राज्यश्रीः—(६) ता पुणो वि कधेसु एदं।

रौद्रता—(७) जं देवी आणवेदि। जणमणवित्तिणामनयरीनरिंदो विवेयचन्दो नाम संपदि इत्थ समागदो चिट्ठदि त्ति देवीए विदिदं ज्जेव।

राज्यश्रीः—(८) अध किं ?।

---

(१) अतिशयेन बन्धे पतिष्यति। भवतु तावत्। सखि! गाढतरो बन्धो नाहं मोक्षं कर्तुं शक्नोमि। यदि परं भर्त्ता करिष्यति।

(२) सखि सोमते! असंबद्धप्रलापिनि! अपैहि।

(३) प्रियवयस्य! स्वच्छन्दं तावत्तिष्ठ यावत्तव प्रणयिनी देवी अत्र नैति।

(४) हला रौद्रते! अपि नामावितथमेतद्यत्त्वं कथयसि ?।

(५) भट्टिनि! किमन्यथा तव निवेद्यते ?।

(६) तत् पुनरपि कथयैतत्।

(७) यद्देवी आज्ञापयति। जनमनोवृत्तिनामनगरीनरेन्द्रो विवेकचन्द्रो नाम संप्रत्यत्र समागतस्तिष्ठतीति देव्या विदितमेव।

(८) अथ किम् ?।

[रौद्रता]—(१) तस्स य धूया किवासुन्दरी नाम। सा य आसमपदे पिइपासनिसन्ना निव्वन्निदा भट्टिणा।

राज्यश्रीः—(साक्षेपं) (२) तदो तदो ?।

रौद्रता—(३) परूढो परुप्परं पिम्मंकुरो। अदो ज्जेव आणीदो विवेयनिवो नियमन्दिरं। कदा अप्पडिमा पडिवत्ती। दिन्नं ठाणं नियचित्तसालाए।

राज्यश्रीः—(४) इदाणिं मुणियं चित्तसालप्पणकारणं विवेयस्स।

रौद्रता—(५) जप्पभुदि दिट्ठा सा कन्नगा तप्पभुदि अणीदिसो भट्टा। अज्ज पुण विरहविणोयणत्थं[1] धम्मारामसणुपत्तस्स संगदा सा कन्नगा। तीए समं किं पि जंपंतो वट्टदि ?।

राज्यश्रीः—(निःश्वस्य) (६) अहो जीवन्तेहिं किं न दीसदि सुव्वदि वा?। जं तारिसो वि भविय अज्जउत्तो एरिसो संवुत्तो। हला ! कत्थ पएसे सो सढो ?।

रौद्रता—(७) इदो इदो एदु देवी।

(उभे परिक्रामतः।)

राज्यश्रीः—(पुरोऽवलोक्य) (८) हला ! एसो सो निल्लज्जो जहा कहिदो तहा दीसदि। तो[2] एहि पडिनियत्तम्हि। न खु[3] एवं दइदं दट्ठुं खमम्हि।

---

(१) तस्य च दुहिता कृपासुन्दरी नाम्नी। सा चाश्रमपदे पितृपार्श्वनिषण्णा निर्वर्णिता भर्त्रा।

(२) ततस्ततः ?।

(३) प्ररूढः परस्परं प्रेमाङ्कुरः। अत एव आनीतो विवेकनृपो निजमन्दिरम्। कृताऽप्रतिमा प्रतिपत्तिः। दत्तं स्थानं निजचित्रशालायाम्।

(४) इदानीं ज्ञातं चित्रशालार्पणकारणं विवेकस्य।

(५) यत्प्रभृति दृष्टा सा कन्यका तत्प्रभृति अनीदृशो भर्त्ता। अद्य पुनर्विरहविनोदनार्थं धर्माराममनुप्राप्तस्य सङ्गता सा कन्यका। तया समं किमपि कथयन् वर्त्तते।

(६) अहो ! जीवद्भिः किं न दृश्यते श्रूयते वा ?। यत्तादृशोऽपि भूत्वा आर्यपुत्र ईदृशः संवृत्तः। हले ! कुत्र प्रदेशे स शठः ?।

(७) इत इत एतु देवी।

(८) हले ! एष स निर्लज्जो यथा कथितस्तथा दृश्यते। तत एहि प्रतिनिवृत्तास्मि। न खल्वेवं दयितं द्रष्टुं क्षमास्मि।

---

१ B & C °दणत्थं. २ B & C तो ३ B & C खु.

रौद्रता—(१) भट्टिणि ! तरुतिरोहिदा दाव सुणिस्सामो किं जंपंति ?।

राज्यश्रीः—(२) एवं भोदु ।

(उभे तथा कुरुतः।)

राजा—प्रिये ! आज्ञापय मां येन विगतपाशबन्धनां त्वां करोमि ।

(कृपासुन्दरी अधोमुखीभवति ।)

विदूषकः—(३) भो वयस्स ! दुक्खिदपरित्ताणं कुलधम्मो चालुक्काणं। ता किं विलंबीयदि ?।

राजा—युक्तमाह वयस्यः । (उपसृत्य गुणपाशेन सह हस्ते गृह्णाति ।)

राज्यश्रीः—(४) हला ! अदो वरं जीविय किं कायव्वं?।

रौद्रता—(५) भट्टिणि ! पुणो वि पिच्छ दाव ।

राज्यश्रीः—(६) एवं पि भोदु ।

कृपासुन्दरी—(७) चालुक्क ! मुंच मुंच ममं गमिस्समहं दाव ।

राजा—प्रिये ! न खलु चिरात्प्राप्तां त्वामहं मोक्ष्यामि ।

कृपासुन्दरी—(सर्वतो विलोक्य सभयं) (८) अज्जउत्त ! (इत्यर्धोक्ते लज्जां नाटयित्वा) महाराज ! मुंच मुंच ममं । जदो एदाए तरुतिरोहिदाए आतंबलोयणाए बीहेमि। (इति राज्ञो भुजान्तरं प्रविशति।)

राजा—(अवलोक्य) अहो ! परमोपकारिणी काचिदेषा । येनेदृशां श्रेयसां पात्रीकृतोऽस्मि,

---

(१) भट्टिनि ! तरुतिरोहिते तावत् श्रोष्यावः किं कथयतः ?।

(२) एवं भवतु ।

(३) भो वयस्य ! दुःखितपरित्राणं कुलधर्मश्चौलुक्यानाम् । ततः किं विलम्ब्यते ?।

(४) हले ! अतः परं जीवित्वा किं कर्त्तव्यम् ?।

(५) भट्टिनि ! पुनरपि पश्य तावत् ।

(६) एवमपि भवतु ।

(७) चौलुक्य ! मुञ्च मुञ्च मां गमिष्याम्यहं तावत् ।

(८) आर्यपुत्र ! । महाराज ! मुञ्च मुञ्च माम् । यत एतया तरुतिरोहितया आताम्रलोचनया बिभेमि ।

नोद्गमिष्यद्राहुर्यदि नभसि भयङ्करास्यकुहरोऽसौ ।
तत्किं शशभृत्प्रतिमा मम शरणमुपैष्यदमृतमयी ? ॥ ४५ ॥

अपि च—

अनदिष्यद्यदि न वने सिंही वित्रासितैणसङ्घातम् ।
तत्किं हरिणीचक्षुर्विभ्रमशर्माऽभविष्यन्मे ? ॥ ४६ ॥

किञ्च—

अकरिष्यद्यदि न विधिर्बिसिनीं संचारिणीमिमां विपिने ।
तत्किं मधुकरललितान्यस्या वदनेऽभविष्यन्मे ? ॥ ४७ ॥

रौद्रता—(१) भट्टिणि ! सुदं अन्नु[1]त्तिगूढाभिप्पायं भट्टिणो वयणं ? ।

राज्यश्रीः—(२) हला[2] ! सुदं ज्जेव । जदो—

अहिरमदि रायहंसो बगीसु मुत्तूण जच्चनिजहंसिं ।
तस्स चिय सो दोसो वंसविरुद्धं कुणन्तस्स ॥ ४८ ॥

रौद्रता—(३) भट्टिणि ! अदो वरं अहं पि सोढुमक्खमा । ता का गदी ? ।

राज्यश्रीः—(४)हला ! एहि जेण हारलयाए बंधिय लीलाकमलनालेण निद्दयं ताडेमि इमं सढं ।

रौद्रता—(५) एवं भोदु ।

(उभे सहसोपसर्पतः ।)

विदूषकः—(विलोक्य) (६) भो वयस्स ! एसा कुड्डा चंडि व्व एदि देवी । ता नस्सिस्सं । (इति त्वरितपदं निष्क्रान्तः ।)

---

(१) भट्टिनि ! श्रुतमन्योक्तिगूढाभिप्रायं भर्तुर्वचनम् ? ।
(२) हले ! श्रुतमेव । यतः—
अभिरमते राजहंसो बकीषु मुक्त्वा जात्यनिजहंसीम् ।
तस्यैव स दोषो वंशविरुद्धं कुर्वाणस्य ॥
(३) भट्टिनि ! अतः परमहमपि श्रोतुमक्षमा । ततः का गतिः ? ।
(४) हले ! एहि येन हारलतया बद्ध्वा लीलाकमलनालेन निर्दयं ताडयामीमं [शठ]म् ।
(५) एवं भवतु ।
(६) भो वयस्य ! एषा क्रुद्धा चण्डीवैति देवी । ततो नङ्क्ष्यामि ।

---

१ B & C अन्नोत्ति २ B & C हला हला !

कृपासुन्दरी—(१) मुंच मुंच ममं एदाए बीहेमि बाढं ।

(राजा देवीं विलोक्य हस्तं मुञ्चति।)

(कृपासुन्दरी सोमतया सह निष्क्रान्ता ।)

राजा—(स्वगतं) अहो ! कष्टं कष्टम् । अरण्य इव निपतितोऽहम् । परित्यक्तश्चास्मि प्रियया वयस्येन च । तत्कोऽत्राभ्युपायः ? । भवतु । देवीमेव सान्त्वयामि ।

देवी—(ससंरम्भं) (२) रुद्दे ! बंधेहि दाव इमं पच्चक्खदिट्ठविप्पियं इमाए हारलदाए । जहा ताडेमि इमिणा उप्पलनालेण ।

राजा—(सभयं) देवि ! प्रसीद प्रसीद को नाम निजपरिजने संरम्भप्रकर्षः ? ।

देवी—(३) हला रुद्दे ! अहवा चिट्ठदु दाव इमम्मि बंधणकिलेसो। चत्तमज्जाओ खु एसो ।

रौद्रता—(४) जं भट्टिणी आणवेदि ।

राजा—(सविनयमञ्जलीं बद्ध्वा) प्रसीद प्रिये ! प्रणयिषु किमेवमतिपरुषां कुरुषे रुषम् ?।

देवी—(सगद्गदं) 'प्रिये' इति (५) अन्नत्थ संकंताइं एदाइं अक्खराइं। अपि च संस्कृतमाश्रित्य—

अतीववृद्धः शरदभ्रशुभ्र-
ज्योत्स्नापदेशात्पलितानि बिभ्रत् ।
राकासुधांशो ! नहि लज्जसे किं
क्रीडन् करैः कैरविणीमुखेषु ? ॥ ४९ ॥

राजा—देवि ! त्वमेव मे जीवितं भुवने । यतः—

---

(१) मुञ्च मुञ्च मामेतस्या बिभेमि बाढम् ।

(२) रौद्रते ! बधान तावदिमं प्रत्यक्षदृष्टविप्रियमनया हारलतया । यथा ताडयाम्यनेनोत्पलनालेन ।

(३) हला रौद्रते ! अथवा तिष्ठतु तावदस्मिन् बन्धनक्लेशः । त्यक्तमर्यादः खलु एषः ।

(४) यद्भट्टिनी आज्ञापयति ।

(५) अन्यत्र संक्रान्तान्येतान्यक्षराणि ।

मणिमुकुटशिखाग्रप्रेङ्खदंशुप्रवाहैः
　प्रतिनिहततमिस्रैर्येऽभवन् भानुकल्पाः ।
क्षितिपतिगुणभाजां पश्यतां देवि ! तेषां
　कमलमुखि ! भवत्या मालया स्वीकृतोऽहम् ॥ ५० ॥

अथवा किं बहुनोक्तेन ?,

प्रसत्तिवात्याहतकोपनीरदो-
　द्भिन्नः प्रसन्नः सितकान्तिरस्त्वसौ ।
यथास्य कान्त्या कृतपारणाविधिः
　क्रीडाचकोरस्तव शर्म सेवते ॥ ५१ ॥

(इति पादयोः पतितुमिच्छति ।)

राज्यश्रीः—(सकोपं) (१) अरे ! अवरनारिसंगसंभूदं तुहंगगंधं सहिदुं न सक्केमि । ता गमिस्सं । (इति निष्क्रान्ता ।)

राजा—कस्कोऽत्र भोः ! ।

(प्रविश्य)

विदूषकः—(२) दिट्ठिया अयालवादोलीए बंभणीपुन्नेहिं न उप्पाडिय नीदु म्हि ।

राजा—वयस्य ! अतिदूरं कुपिता देवी । तत्क इव प्रसादनोपायः ? । अथवा तिष्ठतु देवी । इदं तु कथय,

कास्ते पञ्चकलम्बचुम्बितपदन्यासप्रसूतप्रति-
　च्छन्दाम्भोरुहविभ्रमस्फुरदलिव्याख्यातपद्मागतिः ।
यच्चक्षुर्ललितैर्जितः किल मृगश्चन्द्रे ध्रुवं तस्थिवान्
　सा पीयूषतरङ्गिणी मम मनःसोमाश्मनः कौमुदी ? ॥ ५२ ॥

(नेपथ्ये)

---

(१) अरे ! अपरनारीसङ्गसंभूतं तवाङ्गगन्धं सोढुं न शक्नोमि । ततो गमिष्यामि ।
(२) दिष्ट्याऽकालवाताल्या ब्राह्मणीपुण्यैर्नोत्पाट्य नीतोऽस्मि ।

---

१ B & C प्रतानैरिव रचितदिनेशैर्यैः समं भूषिताशा. २ B & C तुह गंधं.

वैतालिकः—

चक्षुर्घस्मरमोहडम्बरतमस्तोमद्रुमोच्छित्तये
यत्रोत्तेजितरुक्कुठारनिकरे जाता ग्रहा निष्प्रभाः ।
लक्ष्मीं प्राप पुनस्तमी कुमुदिनी स्मेरानना चाभव-
द्राजा सैष कलानिधिः प्रतिकलं कुर्यान्मुदं देहिनाम् ॥ ५३ ॥

राजा—(श्रुत्वा) कथं प्राप्त एव प्रदोषसमयः ? । तत्प्रयामः सायन्तनीं भगवतः सर्वज्ञस्य सपर्यां निर्वर्तयितुम् ।

(इति निष्क्रान्ताः सर्वे ।)

द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

(ततः प्रविशति विदूषकः ।)

विदूषकः—(सरभसं परिक्रम्य) (१) हीही भो! रायरहस्सफुंट्टमाणपुट्टो न सक्कुणोमि जणसंकुले नियजीहं निजंतिदुं । ता अन्नदो गमिस्सं ति । (पदान्तरे स्थित्वा आकाशे लक्षं बद्ध्वा) साहु अमच्चपुन्नकेदु ! साहु । जं तहादुग्घडं पि घडिदं य्येव तए सामिकज्जं । तधाहि, पियवयंसकिवासुंदरीसंगमविघडणकदे चालुक्कचक्कवट्टिकुलदेवदमाराहिंतियं देविं रज्जसिरिं मुणिय भविद्व्वदा नाम नियपणइणी भणिदव्वगहीदत्थां कडुय मुक्का पच्छन्नं देवदापुट्टिभाए । सा उण समए जहुत्तं देविं भणिस्सदि त्ति इमिणा उवाएण सिद्धं य्येवे[2] समीहिदं ति तक्केमि । (पुनर्विमृश्य) अहो! देवीए दिढाणुसयत्तणं । जं तधा पियवयस्सेण अणुणिज्जन्ती वि न पसन्ना । अधवा—

हिययाइँ हयासाणं नियंबिणीणं न हुंति मउयाइं ।
सहवासिसिहिणसंसग्गलग्गकढिणत्तदोसेण ॥ १ ॥

जदि वा वरं देवी । मा दासीए धीदा रुद्दा ।

(प्रविश्य)

रौद्रता—(पुरोऽवलोक्य) (२) कधं एसो अज्जललिदसहावो? । भोदु । उवसप्पामि । (उपसृत्य) अज्ज ! पणमामि ।

---

(१) हीही भोः ! राजरहस्यभ्रश्यमानोदरो न शक्नोमि जनसंकुले निजजिह्वां नियन्त्रयितुम् । ततोऽन्यतो गमिष्यामीति । साधु अमात्यपुण्यकेतो ! साधु । यत्तथादुर्घटमपि घटितमेव त्वया स्वामिकार्यम् । तथाहि, प्रियवयस्यकृपासुन्दरीसङ्गमविघटनकृते चौलुक्यचक्रवर्तिकुलदेवतामाराधयन्तीं देवीं राज्यश्रियं ज्ञात्वा भवितव्यता नाम निजप्रणयिनी भणितव्यगृहीतार्था कृत्वा मुक्ता प्रच्छन्नं देवतापृष्ठिभागे । सा पुण समये यथोक्तं देवीं भणिष्यतीत्यनेनोपायेन सिद्धमेव समीहितमिति तर्कये । अहो! देव्या दृढानुशयत्वम् । यत्तदा प्रियवयस्येनानुनयन्त्यपि न प्रसन्ना । अथवा—

हृदयानि हताशानां नितम्बिनीनां न भवन्ति मृदुकानि ।
सहवासिस्तनसंसर्गलग्नकठिनत्वदोषेण ॥

यदि वा वरं देवी । मा दास्या दुहिता रौद्रता ।

(२) कथमेष आर्यललितस्वभावः ? । भवतु । उपसर्पामि । आर्य ! प्रणमामि ।

---

१ B & C °फुडमाणं, २ B & C ज्जेव.

विदूषकः—(१) सत्थि भोदीए ।

रौद्रता—(२) अज्ज! किं पि पुच्छामि। जदि नादिरहस्सं ता कधेसु।

विदूषकः—(३) भोदी वीसत्थं पुच्छ ।

रौद्रता—(४) किं नु सचिंतु व्व अज्ज अज्जो लखीयदि ?।

विदूषकः—(सनिर्वेदं) (५) भोदी ! कधं न सचिंतो भविस्सं? । जं दाणि मे पियवयस्सो [1]अदीवदुक्खिदो वट्टदि ।

रौद्रता—(६) अज्ज किं तीए अहिणवकन्नगाए कदे उत्तम्मदि भट्टा?।

विदूषकः—(सभयं) (७) नहि नहि ।

रौद्रता—(८) ता किमन्नं दुक्खकारणं भट्टिणो?।

विदूषकः—(९) रुद्दे ! देवीअपसादो ज्येव ।

रौद्रता—(१०) अज्ज ! जदि एवं ता मा उत्तम्म। जदो सव्वं पि साहु संपन्नं संपदि ।

विदूषकः—(स्वगतं) (११) दिट्ठिया फलिदममचनीदिलदाए । (प्रकाशं) भोदी कधेसु किं चिय संवुत्तं ?।

---

(१) स्वस्ति भवत्यै ।

(२) आर्य! किमपि पृच्छामि । यदि नातिरहस्यं तत्कथय ।

(३) भवती विश्वस्तं पृच्छ ।

(४) किं नु सचिन्त इवाद्य आर्यो लक्ष्यते ?।

(५) भवति ! कथं न सचिन्तो भवामि ?। यदिदानीं मम प्रियवयस्योऽतीवदुःखितो वर्त्तते ।

(६) आर्य ! किं तस्या अभिनवकन्यकायाः कृते उत्ताम्यति भर्त्ता ?।

(७) नहि नहि ।

(८) ततः किमन्यद् दुःखकारणं भर्तुः ?।

(९) रौद्रते ! देव्यप्रसाद एव ।

(१०) आर्य ! यद्येवं तदा मा उत्ताम्य । यतः सर्वमपि साधु संपन्नं संप्रति ।

(११) दिष्ट्या फलितममात्यनीतिलतया । भवती कथयतु किं खलु संवृत्तम् ?।

---

१ B & C अतीव°

रौद्रता—(१) अज्ज ! एदं कधीयदि । अज्ज किल कुलदेवदं भयवदिं पूइदुं गदा भट्टिणी ।

विदूषकः—(सावहित्थं) (२) कुदो वि देवदाराधनं करेदि देवि त्ति अत्थि जणप्पवादो ।

रौद्रता—(३) विसेसपूओवयारपुव्वयं थुणिय उवजाचिदा णं भट्टिणीए भयवदी । जधा, जा एसा अज्जउत्तस्स अहिणववल्लहा इत्थिगा अत्थि सा भयवदि ! तुह प्पभावादो दुब्भगा भोदु त्ति ।

विदूषकः—(सविमर्शं)

(४) कुसलाउ वि कुलजाउ वि दढधम्माओ वि दड्ढमहिलाओ ।
खिज्जंति सवित्तिजणे पावं परिचिंतयंतीओ ॥ २ ॥

रौद्रता—(५) इत्थंतरे सहस त्ति भयवदीए पदिकिदीदो समुट्ठिदा फुडक्खरा महुरगंभीरा भारदी । जधा—

वच्छे ! मंतसु मा इमं नहि तुमं जाणासि जं वेरिणं
मोहं तीई करग्गहेण हणिही हेलाइ ते वल्लहो ।
ता गंतूण सयं विवेयनिवइं पत्थेसु निस्संसयं
तं कन्नारयणं च गुज्जरधराधीसस्स संजोयसु ॥ ३ ॥

---

(१) आर्य ! एतत्कथ्यते । अद्य किल कुलदेवतां भगवतीं पूजितुं गता भट्टिनी ।

(२) कुतोऽपि देवताराधनं करोति देवीत्यस्ति जनप्रवादः ।

(३) विशेषपूजोपचारपूर्वकं स्तुत्वोपयाचिता खलु भट्टिन्या भगवती। यथा, या एषा आर्यपुत्रस्याभिनववल्लभा स्त्री अस्ति सा भगवति ! तव प्रभावतो दुर्भगा भवत्विति ।

(४) कुशला अपि कुलजा अपि दृढधर्मा अपि दग्धमहिलाः ।
खिद्यन्ति सपत्नीजने पापं परिचिन्तयन्त्यः ॥

(५) अत्रान्तरे सहसेति भगवत्याः प्रतिकृतितः समुत्थिता स्फुटाक्षरा मधुरगम्भीरा भारती । यथा—

वत्से ! मन्त्रयस्व मेदं नहि त्वं जानासि यद्वैरिणं
मोहं तस्याः करग्रहेण हनिष्यति हेलया तव वल्लभः ।
ततो गत्वा स्वयं विवेकनृपतिं प्रार्थय निस्संशयं
तत्कन्यारत्नं च गूर्जरधराधीशस्य संयोजय ।

---

१ A & C °दा भ° २ B & C °का. ३ B & C °दीप° ४ B & C तीए. ५ B & C सई. ६ B & C जह्र.

अवि य—

सा संतिदेवितणया दाणपडागाइ संतिभगिणीए ।
धूया तुमं ति ता पुत्ति ! मच्छरो को णु भगिणिजणे ? ॥ ४ ॥

विदूषकः—(सान्तर्हासं) (१) अहो ! सरसो कधानिवेसो । तदो किं पडिवन्नं देवीए ? ।

रौद्रता—(२) किमन्नं भोदि ? णं सिरसा पडिच्छिदं भगवदीसासणं ।

विदूषकः—(सहर्षं) (३) दिट्ठिया छुहाकरालिदो चिरादो लभिस्सदि अज्ज विवाहजन्ने जहिच्छिदं ललिदसहावबंभणो भोयणं । (इत्युत्थाय नृत्यति ।)

रौद्रता—(४) अज्ज ! अज्जवि सविलंबु व्व विवाहजन्नो ।

विदूषकः—(सविषादं) (५) कधं चिय ? ।

रौद्रता—(६) जदो भट्टिणीए गडुय संबंधपयडणपुव्वयं सप्पणयं पत्थिदो विवेयपत्थिवो किवासुंदरिं ।

विदूषकः—(साशंकं) (७) ता किं न पडिवादिदा तेण तणया देवीए ? ।

अपि च—

सा शान्तिदेवीतनया दानपताकायाः शान्तिभगिन्याः ।
दुहिता त्वमिति ततः पुत्रि ! मत्सरः को नु भगिनीजने ? ॥

(१) अहो ! सरसः कथानिवेशः । ततः किं प्रतिपन्नं देव्या ? ।

(२) किमन्यद्भवति ?, खलु शिरसा प्रतीष्टं भगवतीशासनम् ।

(३) दिष्ट्या क्षुधाकरालितश्चिराल्लप्स्यतेऽद्य विवाहयज्ञे यथेष्टं ललितस्वभावब्राह्मणो भोजनम् ।

(४) आर्य ! अद्यापि सविलम्ब इव विवाहयज्ञः ।

(५) कथं खलु ? ।

(६) यतो भट्टिन्या गत्वा संबन्धप्रकटनपूर्वकं सप्रणयं पार्थितो विवेकपार्थिवः कृपासुन्दरीम् ।

(७) ततः किं न प्रतिपादिता तेन तनया देव्यै ? ।

---

१ B & C °वडायाइ. २ B & C °बो व्व.

रौद्रता—(१) अज्ज ! तेणेदमुल्लविंदं । जादे रज्जसिरि !,

कामं तुमं दुलंघा वरोऽणुरूवो य एस राएसी ।
किं पुण पणपरिणेओ वच्छाइ परिट्ठिओ अप्पा ॥ ५ ॥

विदूषकः—(२) हद्धी ! विसममावडिदं ।

रौद्रता—(३) अध भट्टिणीए भणिदं ताद ! पणं नादुमिच्छामि ।

विदूषकः—(सौत्सुक्यं) (४) ममेव हिदएण समं मंतिय वुत्तं देवीए ।

रौद्रता—(५) तदो भट्टिणा विवेयचंदेण संलत्तं । पुत्ति ! एस वच्छाए पणो । जधा—

इह भरहनिवाओ जं न केणावि चत्तं
मुयइ मयधणं जो तं पि पाविक्कमूलं ।
नियजणवयसीमं मोयए जो य जूय-
प्पमुहवसणचक्कं सो वरो मज्झ होउ ॥ ६ ॥

विदूषकः—(सवितर्कं) (६) तदो किं मंतिदं देवीए ? ।

रौद्रता—(७) ताद ! इदमिदाणिं कारवीयदि त्ति भणिय उट्ठिदा देवी ।

विदूषकः—(सप्रमोदं) (८) भोदी ! संपन्नं य्येव एदं ति तक्केमि । अध कधिं पुण पत्थिदासि ? ।

---

(१) आर्ये ! तेनेदमुल्लपितम् । जाते राज्यश्रि !,

कामं त्वं दुर्लङ्घ्या वरोऽनुरूपश्चैष राजर्षिः ।
किं पुनः पणपरिणेयो वत्सया परिस्थित आत्मा ॥

(२) हा ! धिग् ! विषममापतितम् ।

(३) अथ भट्टिन्या भणितं तात ! पणं ज्ञातुमिच्छामि ।

(४) ममैव हृदयेन समं मन्त्रयित्वोक्तं देव्या ।

(५) ततो भर्त्रा विवेकचन्द्रेण संलपितम् । पुत्रि ! एष वत्सायाः पणः । यथा—

इह भरतनृपाद्यन्न केनापि त्यक्तं
मुञ्चति मृतधनं यस्तदपि पापैकमूलम् ।
निजजनपदसीमां मोचयेद् यश्च द्यूत-
प्रमुखव्यसनचक्रं स वरो मम भवतु ॥

(६) ततः किं मन्त्रितं देव्या ? ।

(७) तात ! इदमिदानीं कार्यते इति भणित्वोत्थिता देवी ।

(८) भवति ! संपन्नमेवैतदिति तर्कये । अथ कुत्र पुनः प्रस्थितासि ? ।

---

१ B & C °विंयं.

रौद्रता—(१) अज्ज ! भगवदीपूओवगरणाइं आणेदुमाणत्तम्हि भट्टिणीए।

विदूषकः—(२) रुद्दे संपाडेसु देवीसासणं । अहं पि इमिणा वुत्तंतेण निव्ववेमि पियवस्सं ।

(इति निष्क्रान्तौ ।)

प्रवेशकः ।

(ततः प्रविशति विरहावस्थां नाटयन्नासनस्थो राजा ।)

राजा—(कृपासुन्दरीमनुसंधाय सबहुमानं)

भद्रं तस्य तपोवनस्य सुतनुः प्राग्यत्र दृष्टा मया
यस्मिंश्चानुसृता प्रिया ननु तदुद्यानं चिरं नन्दतु ।
तस्मै स्वस्ति महीरुहाय सुदती यत्रालपन्ती श्रुता
बाला यत्र बलात्करेण विधृता तस्यै नमो भूमये ॥ ७ ॥

किञ्च—

सा वाचि सा च हृदि सा पथि सा च धाम्नि
सा व्योम्नि सा पयसि सा भुवि सा च दिक्षु ।
स्वप्नेऽपि सा शशिमुखी परिवर्त्तते मे
किं वापरैरजनि तन्मयमेव विश्वम् ॥ ८ ॥

(विमृश्य च) अहो ! नु कथमद्य रहस्यकार्यसचिवः सोऽपि नालोक्यते कुतोऽपि ललितस्वभावः ? ।

(ततः प्रविशति विदूषकः ।)

विदूषकः—(राजानमवलोक्य) (३) एसो पियवयस्सो किवासुंदरीविरहसंधुक्किदं देवीअपसादसंबंधसंवड्ढिदं हिदयसंतावमुव्वहंतो पुरो ज्जेव । ता उवसप्पिय इमिणा अमच्चपवंचेण निव्ववेमि । (इत्युपसर्पति ।)

राजा—(दृष्ट्वा सहर्षं) कथं प्राप्त एव वयस्यः ।

(१) आर्य ! भगवतीपूजोपकरणान्यानेतुमाज्ञप्तास्मि भट्टिन्या ।

(२) रौद्रते ! संपादय देवीशासनम् । अहमप्यनेन वृत्तान्तेन निर्वपामि प्रियवयस्यम् ।

(३) एष प्रियवयस्यः कृपासुन्दरीविरहसंधुक्षितं देव्यप्रसादसंबन्धसंवर्धितं हृदयसंतापमुद्वहन् पुर एव । तत उपसर्प्यानेनामात्यप्रपञ्चेन निर्वपामि ।

विदूषकः—(१) जयदु जयदु पियवयस्सो ।

राजा—इदमासनमास्यताम् ।

(विदूषकस्तथा करोति ।)

राजा—सखे ! हृष्ट इव दृश्यसे ।

विदूषकः—(२) भो ! दिट्ठिया वड्ढसि विवेयदुहिदालाभेण ।

राजा—(निःश्वस्य) वयस्य ! देव्यां प्रतिकूलायां कुत एतत् ? ।

विदूषकः—(३) भो ! देवी य्येव सव्वं संपाडिस्सदि ।

राजा—(सवितर्कं) कथमिव ? ।

(विदूषको राज्ञः कर्णे एवमेव ।)

राजा—(सोल्लासं) अहो ! मन्त्रिणस्तृणीकृतबृहस्पतिप्रतिभाविलासस्य सर्वतोमुखी शेमुषी । तथाहि—

कुर्वाणोऽनुनयं न नाम गणितः कोपाद्ययाहं तदा
त्यक्त्वा मामदया च पादपतितं या तर्जयन्ती गता ।
सायास्यत्सहसा प्रकृत्यसहना देवी प्रसत्तिं कथं ?
मन्त्री नीतिमिमां नितान्तनिपुणो व्यापारयिष्यन्न चेत् ॥ ९ ॥

अपि च—

देव्या दिव्यवचःप्रपञ्चविधिना व्यध्यापि कोपानल-
स्तस्या एव मुखाद्विवेकनृपतिः पुत्रीमथायाच्यत ।
तस्मादेव पणक्रमः प्रकटितस्तत्पूरणे प्रेरितो
युक्त्याहं तदनेन मत्प्रियकृते किं किं न विस्पन्दितम् ? ॥ १० ॥

विदूषकः—(४) भो ! अमच्चनीदिरहस्सं किं पुणो पुणो परावत्तेसि ? । णं कदाइ कोइ इमं सुणिय देवीए कहिज्ज ता धमियकणयं फुंकाए हारविदं हुज्ज ।

---

(१) जयतु जयतु प्रियवयस्यः ।
(२) भोः ! दिष्ट्या वर्धसे विवेकदुहितृलाभेन ।
(३) भोः ! देव्येव सर्वं संपादयिष्यति ।
(४) भोः ! अमात्यनीतिरहस्यं किं पुनः पुनः परावर्तयसे ? । ननु कदापि कोऽपि श्रुत्वा देव्यै कथयेत् ततो ध्मातकनकं फूत्कृत्या नाशितं भवेत् ।

---

१ B & C तो. २ B & C होज्ज.

राजा—एवमेतत् ।

(नेपथ्ये नूपुरध्वनिः ।)

राजा—(विलोक्य) कथं देव्याः पादपद्मोपजीविनी व्यवस्था ? ।

(ततः प्रविशति व्यवस्था ।)

व्यवस्था—(१) आणत्त म्हि भट्टिणीए । जधा, वच्छे! इमं पत्तयं गडुय अज्जउत्तस्स उवणेसु । इमं इमं च विन्नवेसु त्ति । ता कत्थ दाणि भट्टिणा भोदव्वं ? । (किञ्चित्परिक्रम्य) एसो भट्टा अज्ज ललिदसभावदुदीओ चिट्ठदि त्ति । (उपसृत्य) जयदु जयदु भट्टा । एदं भट्टिणीए पेसिदं ति । (पत्रकमुपनयति ।)

राजा—(सादरं गृहीत्वा वाचयति ।)

तह अणुणयं कुणंतो गणिओ न हु नाह ! जं सि माणेण ।
मह निग्घिणाइ ईक्कं तं अविणयविलसियं खमसु ॥ ११ ॥

अवि य, जं ववत्था विन्नवेदि तमवस्समवियप्पमबिलंबं च अज्जउत्तेण संपाडिदव्वं ति । (द्विस्त्रिर्वाचयित्वा सरभसं) अहो ! देव्या महानुभावत्वं यत्तथाप्रकुपितापि पुनः प्राकृतीं प्रकृतिमापन्नेति ।

विदूषकः—(अपवार्य) (२) णं भण, अहो ! अमच्चस्स कवडनाडयसुत्तधारत्तणं जमेवं देवी अदिसंधिद त्ति ।

राजा—व्यवस्थे ! निर्धारितो लेखार्थस्तदिदानीं वाचिकं श्रोतुमिच्छामि ।

व्यवस्था—(३) भट्टा ! भट्टिणी विन्नवेदि ।

---

(१) आज्ञप्तास्मि भट्टिन्या । यथा, वत्से ! इदं पत्रकं गत्वार्यपुत्रस्योपनय । इदमिदं च विज्ञपयेति । ततः कुत्रेदानीं भर्त्रा भवितव्यम् ? । एष भर्तार्य ललितस्वभाव द्वितीयस्तिष्ठतीति । जयतु जयतु भर्त्ता । एतद्भट्टिन्या प्रेषितमिति ।

तथानुनयं कुर्वन् गणितो न खलु नाथ ! यदसि मानेन ।
मम निर्घृणाया एकं तदविनयविलसितं क्षमस्व ॥

अपि च, यद्व्यवस्था विज्ञपयति तदवश्यमविकल्पमविलम्बं चार्यपुत्रेण संपादयितव्यमिति ।

(२) ननु भण, अहो ! अमात्यस्य कपटनाटकसूत्रधारत्वं यदेवं देव्यतिसंधितेति ।

(३) भर्तः ! भट्टिनी विज्ञपयति ।

---

१ B & C एकं.

राजा—किमाज्ञापयति देवी ? ।

व्यवस्था—(१) निव्वीराधनं मुंचसु त्ति ।

राजा—शिरसा प्रतिगृहीतं देव्याः शासनम् ।

विदूषकः—(२) भोंदी[1] पुणो[2] पि किं पि जंपिदुकाम व्व लक्खीयसि ।

व्यवस्था—(३) अध किं ? ।

राजा—भूयोऽपि किमप्यादिष्टं देव्या ? ।

व्यवस्था—(४) नियरज्जादो वसणचक्कवालं निव्वाससु त्ति ।

राजा—परमनुगृहीतोऽस्मि । भद्रे ! विज्ञापय देवीम् । यथा संपादित-मेवेदं द्वयमपीति ।

व्यवस्था—(५) एसा विन्नवेमि । (इति निष्क्रान्ता ।)

विदूषकः—(६) भो ! इमम्मि संपादिदे हत्थगद व्येव ते किवासुं-दरि त्ति ।

राजा—(कृपासुन्दरीमनुसृत्य प्रत्यक्षवदाकाशे)

कान्ते ! येन विलोकितासि सफलं तज्जन्म मन्ये सदा
　धन्यानां धुरि बुध्यते[3] स सुभगे ! रागेण यं पश्यसि ।
यं स्नेहादनुयासि सुभ्रु ! भगवांस्तस्य प्रसन्नो विधिः
　प्रेम्णालिङ्गसि यं कृशाङ्गि ! सुचिरं चक्रे स तीव्रं तपः ॥ १२ ॥

अपि च—

ज्योत्स्नामयी स्वभावान्मयि दहनमयीव वर्तसे यदिह ।
तदनेकान्ते कान्ते ! जातासि निदर्शनं प्रथमम् ॥ १३ ॥

---

(१) निर्वीराधनं मुञ्चेति ।
(२) भवती पुनरपि किमपि कथयितुकामेव लक्ष्यसे ।
(३) अथ किम् ? ।
(४) निजराज्याद्व्यसनचक्रवालं निर्वासयेति ।
(५) एषा विज्ञपयामि ।
(६) भोः ! एतस्मिन् संपादिते हस्तगतैव ते कृपासुन्दरीति ।

---

१ B & C 'भोदी' इति नास्ति. २ B & C पुणो किं. ३ B & C बध्यते.

(नेपथ्ये रुद्यते ।)

(उभौ सदुःखमाकर्णयतः ।)

राजा—कुतः पुनरिदममन्दमाक्रन्दविस्पन्दितमुदितमार्द्रयति पाषाणसोदराण्यपि हृदयानि ? ।

(प्रविश्य)

प्रतीहारः—(प्रणम्य) देव ! चत्वारो नगरमहत्तरवणिजो द्वारमध्यासते ।

राजा—शीघ्रं प्रवेशय ।

प्रतीहारः—यदाज्ञापयति देवः । (इति निष्क्रामति ।)

(ततः प्रविशन्ति प्रतीहारेण सह वणिजः ।)

प्रतीहारः—अयं देवस्तदुपसर्पत यूयम् ।

वणिजः—(अग्रतो विलोक्य सप्रमोदं)

निजकीर्तिवल्लिवलयव्यासब्रह्माण्डमण्डपाभोगः ।
देवः कुमारपालः स एष चौलुक्यकुलतिलकः ॥ १४ ॥

(उपसृत्य प्रणमन्ति ।)

राजा—(सप्रसादं) इत आस्यताम् ।

(वणिजो नात्यन्तोपविशन्ति ।)

राजा—भद्राः ! कच्चित्कश्चन गरीयान्कार्यविशेषः ? यद्राजकुलमारूढाः स्थ ।

वणिजः—देव ! अथ किम् ? ।

राजा—

दुर्नीतिर्मे किमिह महती काचिदुच्चैः प्रभुत्वाद् ?
मद्द्रुह्येभ्यः परिभवपदं किं कचिन्मत्प्रमादात् ? ।
मात्स्यो न्यायोऽनवहिततया मन्त्रिणामुत्थितः किं ?
किं धर्मस्य क्वचन बलवान् विप्लवः कोऽप्यकस्मात् ? ॥ १५ ॥

वणिजः—(कर्णौ पिधाय) शान्तं पापम् । आः किमेवमादिशति देवः ? ।

ननु,

कुनीतिस्त्वत्तश्चेन्न किमु शशिनोऽङ्गारपतनं ?
भयं त्वद्द्रुह्येभ्यो यदि न कथमब्धौ हुतवहः ? ।

यदि न्यायो मात्स्यस्तव भुवि विषं नो किमसृते ?
तमः किं नाऽऽलोके त्वयि तपति चेद्धर्मविलयः ? ॥ १६ ॥

राजा—तर्हि किमन्यन्मदुपसर्पणे प्रयोजनं स्यात् ? ।

वणिजः—(करकमलकुड्मलं मौलौ विधाय) देव ! महाजनोऽस्मन्मुखेविज्ञपयति ।

राजा—(सादरं) किमिव ? ।

वणिजः—यथा, निजलक्ष्मीपराजितराजराजो गूर्जरनगरवणिग्मूर्धन्यः कुबेरनामा श्रेष्ठी विदितो देवस्य ।

राजा—(ईषद्विहस्य)

निजविभवनिर्जितामरपुरीकमेते वयं सहानेन ।
यन्नगरमधिवसामः कथं न जानीम तं (स्तं) नाम ॥ १७ ॥

वणिजः—जानाति देवः स्वपरिग्रहे गौरवमारोपयितुम् ।

राजा—पुरस्तादभिधीयताम् ।

वणिजः—स च जलधिवर्त्मनि कथाशेषतया स्वामिपादानामसेवकतामशिश्रियत् ।

राजा—(सविषादं स्वगतं) कष्टं भोः ! कष्टम् । मन्ये च तद्गृहादेवायमतीवकरुणो रोदनध्वनिरुद्गमत् । (प्रकाशं) अहो ! ईदृश एवायमसारः संसारः, क्षणभङ्गुरमायुः, अनित्यं यौवनम्, चपलं जीवितव्यम्, विनश्वरं शरीरम्, अस्खलितगतयो व्याधयः, दुर्निवारा जरा ।

अपि च—

लङ्केशः क्व स ? केशवः क्व स ? नलः क्वासौ ? क्व ते पाण्डवाः ?
क्वासौ दाशरथिः ? क्व तत्कुरुशतं ? ते च क्व चक्रायुधाः ? ।
नाभेयप्रमुखाः क्व ते जिनवृषास्तत्सर्वसाधारणं
नन्वेतन्मरणं न तत्र शरणं कश्चित्क्वचित्कस्यचित् ॥ १८ ॥

वणिजः—देव ! एवमेवैतत् ।

राजा—अथ क इदानीमस्मासु महाजनस्य नियोगः ? ।

---

१ B & C सुखेन.

वणिजः—देव ! कुबेरस्वामी निष्पुत्र इति तल्लक्ष्मीर्नरेन्द्रगृहानुपतिष्ठते । तदादिश्यतामध्यक्षः कोऽपि येन तत्परिगृहीते गृहसर्वस्वे करोति महाजनस्तदौर्ध्वदेहिकानि ।

राजा—(स्वगतं)

आशाबन्धादहह ! सुचिरं संचितं क्लेशलक्षैः
केयं नीतिर्नृपतिहतका यन्मृतस्वं हरन्ति ? ।
क्रन्दन्नारीजघनवसनाक्षेपपापोत्कटाना-
माः किं तेषां हृदि यदि कृपा नास्ति तत्किं त्रपापि ? ॥ १९ ॥

मया त्ववश्यं मृतस्वं मोक्तव्यमेव । (प्रकाशं) भद्राः ! स्वयमागत्य तावद्रक्ष्यामस्तस्य गृहं गृहसारं च । तद्यात यूयं वयमप्यनुपदमेवायाता इति ।

वणिजः—परमनुगृहीताः स्मः । (इति प्रणम्य निष्क्रान्ताः ।)

विदूषकः—(१) भो ! तं य्येव उवत्थिदं ति ।

राजा—वयस्य ! साधयामस्तावन्मृतस्वमोक्षाय । त्वमप्यमुं प्रबन्धं पुण्यकेतोर्विदितं कुरु ।

विदूषकः—(२) एवं भोदु ।

राजा—कस्कोऽत्र भोः ! ।

(प्रविश्य)

प्रतीहारः—किमाज्ञापयति देवः ? ।

राजा—प्रतीहार ! प्रगुणय सुखासनं कुबेरसदनगमनाय ।

प्रतीहारः—यदादिशति देवः । (इति निष्क्रम्य प्रविश्य च ।) देव ! सर्वं सुविहितमेव ।

राजा—तदादेशय पन्थानम् ।

प्रतीहारः—इत इतो देवः ।

(१) भोः ! तदेवोपस्थितमिति ।
(२) एवं भवतु ।

B & C °स्तदूर्ध्व°

(राजा परिक्रामति ।)

प्रतीहारः—इदं सुखासनमलङ्करोतु देवः ।

(राजा सुखासनमारुह्य गमनं नाटयति ।)

प्रतीहारः—पुरः पताकापङ्क्तिस्तबकितव्योमोदरं कुबेरमन्दिरं पश्यतु देवः।

राजा—(विलोक्य) अये ! क्वणत्किङ्किणीजालवाचालदिक्चक्रवाला ध्वजावलिरसौ प्रकटयति कोटीश्वरतां कुबेरस्य ।

किञ्च—

अमी यथा मारुतघातघूर्णिता
ध्वजाञ्चलाः सौधशिरस्सु चञ्चलाः ।
तथा पदार्थाः सकलाः स्फुटं विद-
न्निदं न निर्वेदमुपैति कः किल ? ॥ २० ॥

प्रतीहारः—क एवं देवादपरो जानाति ? ।

राजा—(किञ्चित्परिक्रम्याङ्गुल्या निर्दिशन्) हन्त ! क एष कुबेरमन्दिरद्वारगोपुरं दक्षिणेन भूयान् जनसमवायः ? ।

(प्रविश्य)

महत्तरवणिजः—देव ! महाजनोऽयम् ।

राजा—किमेवमिह महाजनस्तिष्ठतीति ज्ञातुमिच्छामि ।

वणिजः—देव ! असौ हि कुबेरस्वामिसद्मप्रवेशावसरं प्रतिपालयति ।

राजा—(सविमर्शं) क इवेदानीमत्र प्रवेशप्रत्यूहहेतुः स्यात् ? ।

वणिजः—राजपुरुषपरिगृहीतसर्वस्वे निष्पुत्रप्रमीतधामनि प्रवेष्टव्यम् । अन्यथा हि राज्यग्राह्यता ।

राजा—(आत्मगतं)

कर्तुं तत्क्षणमौर्ध्वदेहिकमहो ! पापं भयाद्भूभुजां
निष्पुत्रस्य मृतस्य बान्धवजनः स्निग्धोऽपि नासीदति ।
क्रन्दन् किञ्च कदर्थ्यते गृहजनोऽन्विष्यद्भिरन्तर्धनं
धिक्कष्टं यमकिङ्करैरिव नृपव्यापारिभिर्निष्कृपैः ॥ २१ ॥

वणिजः—इतो गोपुरेण प्रविशतु देवः ।

(राजा प्रविशति ।)

वणिजः—इतो निवेश्यतां कुबेरस्वामिस्तम्बेरमघटासु चक्षुः ।

राजा—(निरूप्य सविस्मयं) अहो ! धन्यं तद्राष्ट्रं यत्र वणिक्पुत्रमात्रलक्ष्मीलीलायितलवश्चक्रवर्तिसंपदोऽप्यतिशेते । अपरं च—

निजकर्णतालतरलाः शङ्के जानाति संपदः सकलाः ।
तेन गजमण्डलीयं सदैव दानं प्रवर्त्तयति ॥ २२ ॥

प्रतीहारः—श्रियां तरलतां देव एव निर्विवादं विदाञ्चकार ।

वणिजः—इतोऽपि कुबेरस्वामितुरङ्गावलीर्विलोकितेन कृतार्थीकरोतु देवः ।

राजा—(निरीक्ष्य साश्चर्यं) नगरेषु लब्धरेखं तन्नगरं यस्मिन्नीश्वराणामीदृशो विभवैकदेशः । अपि च—

परिवर्तनैरविरलैस्तरलाः पुच्छाञ्चलास्तुरङ्गाणाम् ।
यान्ति निदर्शनभूयं धनयौवनजीवितव्येषु ॥ २३ ॥

प्रतीहारः—अहो ! परमकाष्ठामधिरूढो वैराग्यरसो देवस्य ।

राजा—(परिक्रामन्)

ये यावन्तो भावा भवाय मुक्त्यै त एव तावन्तः ।
लवणाय यानि तान्येव मौक्तिकायाभ्रसलिलानि ॥ २४ ॥

वणिजः—देव ! वामतः कुबेरस्वामिनो निर्विशेषसंभावितयाचकचक्रवाला दानशाला ।

राजा—श्लाघ्योऽसौ महात्मा यस्यैवमुन्नता वदान्यता । तथा च—

धर्मस्य मूलं पदवी महिम्नः
पदं विवेकस्य फलं विभूतेः ।
प्राणाः प्रसिद्धेः प्रतिभूश्च सिद्धे-
र्दानं गुणानामिदमेकमोकः ॥ २५ ॥

वणिजः—पुरः परिस्फुटस्फटिकघटिता गृहसोपानपङ्क्तिस्तदिमामारोहतु देवः ।

राजा—सुखासनादवतीर्य प्रतीहारदत्तबाहुरारोहति ।

वणिजः—देव ! तदेतद्गृहैकदेशवर्त्ति सिद्धायतनसन्निभं निभालयतु कुबेरस्वामिकारितं चैत्यालयम् ।

राजा—(सबहुमानं) किमपि निरुपमं रामणीयकं गृहचैत्यस्य । तथाहि—

निर्मलमणिमयकुट्टिमभूतलसंक्रान्तकान्तनिजरूपम् ।
स्वेनैव यदि परमिदं लभते स्वस्योपमानपदम् ॥ २६ ॥

तद्भद्राः ! तावदिदमेवोपास्महे श्रेयःप्रतिबन्धी हि भगवतां व्यतिक्रम इति ।

वणिजः—इत इतो देवः ।

राजा—(उपसृत्य) विनीतवेषप्रवेश्यानि देवतायतनानि । (इति च्छत्रमुकुटचामरादीनि परिहरति ।)

प्रतीहारः—(स्वगतं) अहो ! विवेकवर्त्मनि क्षुण्णता क्षोणीश्वरस्य ।

राजा—(गृहचैत्यमध्यास्य)

पर्यायस्तुहिनाचलस्य यमकं पीयूषकुण्डस्य च
क्षीराब्धेरभिधान्तरं प्रतिकृतिः शीतांशुलोकस्य च ।
वीप्सा चन्दनकाननोदरभुवोऽभ्यासश्च धारागृह-
स्यार्हच्चैत्यमिदं प्रपञ्चयति नः शैत्यं वपुश्चेतसोः ॥ २७ ॥

अपि च—

देवोऽर्हन् धन्यानां धाम्नो मनस इव मध्यमधिवसति ।
निरुपमनैपुणपुण्यैकसूत्रधाराग्रणीघटितः ॥ २८ ॥

वणिजः—इह हि गर्भगृहान्तर्मरकतशिलानिर्मितमूर्त्तेः श्रीनेमिजिनपतेः पादारविन्दं वन्दतां देवः ।

राजा—(सविनयं प्रणम्य स्तौति ।)

उद्गीतामप्सरोभिस्त्रिदशसदसि यत्कीर्तिमाकर्ण्य भीत्या
संभूताकम्पसंपद्विवशकरतलात्प्रच्युतं पञ्चबाणात् ।
पौष्पं चापं व्यलापीन्मधुकरविरुतिच्छद्मना हा ! मनोभूः
केयं तेऽभूदशेति प्रथयतु स शिवं श्रीशिवानन्दनो वः ॥ २९ ॥

वणिजः—प्राकरणिकी प्रक्लृप्ता देवेन देवतास्तुतिः ।

राजा—(विमृश्य)

यथा मरणकातरं करुणमारटत्स्वामिना-
ऽमुना पशुकुलं कृपाकुलितचेतसा मोचितम् ।
असावपि तथा पतन् विपदि रक्षितः स्यादिति
ध्रुवं मम मतिर्मृतं धनपतिं न तं मन्यते ॥ ३० ॥

वणिजः—(सहर्षं) स्वामिन् ! अमोघवचनो भूयाः ।

राजा—(विष्वग्विलोक्य) अहो ! गृहचैत्यचित्रभित्तीनां चेतःकर्षीचारिमा ।

वणिजः—देव ! नेमिजिनचरित्रचित्रनिवेशपेशलास्वेतासु भवतः प्रवर्त्ततामव्याहतो मनोनयनोत्सवः ।

राजा—(निपुणं निरीक्ष्य सोल्लासं) हन्त! कतमस्य भगवतो वीतरागस्य न मधुरगम्भीरोदारपावनमवदातं, तदपि नेमिजिनस्य नूतनी कापि चरित्रसौभाग्यभङ्गिः । तथाह्येष देवः,

अत्र क्षत्रदशायुतीं विजितवानत्रातनोद्दैत्यजि-
च्चापारोपणमत्र शङ्खनिनदैश्चक्रे च सांराविणम् ।
अत्रान्दोलितवान् हरिं पशुवधव्यासेधमत्र व्यधा-
त्सास्त्रामत्र मुमोच भोजतनयामत्रोर्ज्जयन्तं ययौ ॥ ३१ ॥

वणिजः—(सशिरःकम्पं) आश्चर्यमाश्चर्यम्,

क्रौर्यैकक्रतुदीक्षिताः क्षितिभुजः कामी ? क्व धर्मोऽर्हतां ?
त्रैलोक्याभयसत्रमेष तमसां मैत्र्यं हि किं भास्वता ? ।
देव ! श्रीजिनशासने तव पुनः श्रद्धारसः कोऽप्यसौ
हेतुर्यः किल धातुवेधविधिना कल्याणसिद्धेरभूत् ॥ ३२ ॥

राजा—हंहो ! मा मैवम् । यतः—

सर्वस्वं नृपतीनां जिनधर्मः पूर्वपुरुषपरिपाट्या ।
तद्रक्षणेषु दक्षाः कोशाध्यक्षाः परं वणिजः ॥ ३३ ॥

वणिजः—(स्वगतं) अहो ! देवस्य हृदयङ्गमार्थगर्भिणी भणितिभङ्गिः । (प्रकाशं) देव ! न क्षमते कालातिपातः, तदासनमलङ्क्रियतां गृहप्राङ्गणे प्रस्तुतप्रयोजनाय ।

राजा—(तथा कृत्वा सर्वतो विलोक्य च सबाष्पं)

उद्यानं फलसंग्रहेण लवणेनान्नं वपुर्जीविते-
नास्यं नासिकयेन्दुना वियदलङ्कारेण काव्यं पुनः ।
राष्ट्रं भूपतिना सरः कमलिनीषण्डेन हीनं यथा
शोच्यामेति दशां हहा ! गृहमपि त्यक्तं तथा स्वामिना ॥३४॥

वणिजः—देव ! नियुज्यतां पञ्चकुलम्, येन तत्समक्षं गृहनियोगिनः कुबेरस्वामिसर्वस्वमुपनयन्ति ।

राजा—(क्षणं स्थित्वा) भद्राः ! किं पञ्चकुलेन ?। यूयमेवात्र प्रमाणम् ।

वणिजः—यदाज्ञापयति देवः । (इति निष्क्रम्य प्रविश्य च) देव ! स एष कुबेरविभवसंभारः ।

राजा—(स्वगतं)

दृष्ट्वा विभूतिमेनां संयमिनामपि चलन्ति चेतांसि ।
किं पुनरभितो विषयैकलालसानां क्षितीशानाम् ? ॥ ३५ ॥

वणिजः—(अङ्गुल्या निर्दिश्य)

देव ! निजरम्यतातिशयनिर्मिताशेषजनचमत्कारः ।
संहृतपापः सोऽयं गृहचैत्योपकरणकलापः ॥ ३६ ॥

इतश्च—

कनकगिरिसनाभिः शातकुम्भोत्करोऽयं
रजतशिखरिबन्धुश्चैष दुर्वर्णराशिः ।
गगनमणिसपत्नो जात्यरत्नोच्चयोऽसौ
द्विरदतुरगवृन्दं तच्च ते दृष्टपूर्वम् ॥ ३७ ॥

राजा—(सोत्कर्षं) दूरेऽन्यत्, देवतागृहोपकरणगणस्यैव निरतिशयः कोऽपि रम्यतोदयः। अथात्र किमिव स्फटिकमणिमञ्जूषायाममुष्यां संभाव्येत।

वणिजः—देव ! नियोगिनो विज्ञपयन्ति कुबेरस्वामिनो धर्मशास्त्रपुस्तिकास्थानमिदमिति ।

राजा—पश्यामः पुस्तिकाः ।

(वणिज उद्घाट्य दर्शयन्ति ।)

राजा—अये ! किमप्यत्र पत्रकमुपरि । (गृहीत्वा वाचयति ।)

गुरुपादकमलमूले गृहमेधिजनोचितानिमान्नियमान् ।
प्रतिपद्यते कुबेरो वैराग्यतरङ्गितस्वान्तः ॥ ३८ ॥

तद्यथा—

जन्तून् हन्मि न वच्मि नानृतमहं स्तेयं न कुर्वे पर-
स्त्रीर्नो यामि तथा त्यजामि मदिरां मांसं मधु म्रक्षणम् ।
नक्तं नाद्मि परिग्रहे मम पुनः स्वर्णस्य षट् कोटय-
स्तारस्याष्ट तुलाशतानि च महार्हाणां मणीनां दश ॥ ३९ ॥
कुम्भखारीसहस्रे द्वे प्रत्येकं स्नेहधान्ययोः ।
पञ्चायुतानि वाहानां सहस्रमपि हस्तिनाम् ॥ ४० ॥
अयुतानि गवामष्टौ पञ्चपञ्चशतानि तु ।
हलाट्टसद्मनां यानपात्राणामनसामपि ॥ ४१ ॥
पूर्वजोपार्जिता लक्ष्मीरियत्यस्तु गृहे मम ।
इतो निजभुजोपात्तां करिष्ये पात्रसात्पुनः ॥ ४२ ॥

वणिजः—देव ! पर्याप्तं कुबेरस्वामिनियोगिनां गृहसर्वस्वसङ्ख्यापत्रकार्पणेन ।

राजा—अथ किम् ? ।

वणिजः—तर्हि नियोगिनः स्वस्वगृहगमनाय स्वामिनोऽनुमतिमन्विष्यन्ति ।

राजा—आसतां तावत् ।

(नेपथ्ये)

(१) पुत्त कुबेर ! गुणायर ! गओ सि तं कत्थ ? देहि पडिवयणं ।
हा वच्छ ! पिच्छ लच्छी तए विणा जाइ रायहरं ॥ ४३ ॥

(पुनस्तत्रैव)

(२) हा अज्जउत्त ! जुत्तं तुह गन्तुं जणमिमं विमुत्तूणं ।
सुरलोयसिरिविलासेसु लालसो अहव जाओ सि ॥ ४४ ॥

---

(१) पुत्र कुबेर ! गुणाकर ! गतोऽसि त्वं कुत्र ? देहि प्रतिवचनम् ।
हा वत्स ! पश्य लक्ष्मीस्त्वया विना याति राजगृहं ॥
(२) हा आर्यपुत्र ! युक्तं तव गन्तुं जनमिमं विमुच्य ।
सुरलोकश्रीविलासेषु लालसोऽथवा जातोऽसि ॥

---

१ B & C ॰स्यास्तु.

राजा—(श्रुत्वा सखेदमात्मगतं) नूनमयं कुररीरवानुकारी करुणः कयोरपि वनितयोः परिदेवितध्वनिः । (प्रकाशं) भद्राः ! कयोः पुनर्नितम्बिन्योरयमार्त्त-स्वरः श्रूयमाणः कृन्तति हृन्मर्माणि ? ।

वणिजः—देव ! प्रथमा गुणश्रीर्नाम कुबेरस्वामिनः सवित्री, परा तु कमलश्रीर्नाम प्रेयसी ।

राजा—इहानयत द्वे अपि ।

वणिजः—(सभयमात्मगतं) नियोगिनामविसर्जनादनयोश्चाह्वानान्नूनं महान् किमप्यन्वेष्टुमद्याप्याक्षेपः क्षमापतेः । (प्रकाशं) यदाज्ञापयति देवः । (इति निष्क्रामन्ति ।)

राजा—(विमृश्य) भोः ! तिष्ठत तावत् ।

वणिजः—(प्रतिनिवृत्त्य) किमादिशति देवः ? ।

राजा—येयं कुबेरजननी तामानयत । या चेयं तत्पत्नी सा तिष्ठतु । अद्रष्टव्याः खलु परपुरन्ध्रयः ।

वणिजः—(निष्क्रम्य प्रविश्य च) देव ! असौ कुबेरस्वामिमाता ।

राजा—(ससंभ्रमं) अम्ब ! इदमासनमास्यताम् ।

(गुणश्रीस्तथाकरोति ।)

राजा—अम्ब ! किमेवमविवेकिनीव शोकेन विक्लवासि ? । यतः—

आकीटाद्यावदिन्द्रं मरणमसुमतां निश्चितं बान्धवानां
सम्बन्धश्चैकवृक्षोषितबहुविहगव्यूहसाङ्गत्यतुल्यः ।
प्रत्यावृत्तिर्मृतस्योपलतलनिहितप्लुष्टबीजप्ररोह-
प्राया प्राप्येत शोकात्तदयमकुशलैः क्लेशमात्मा मुधैव ॥ ४५ ॥

गुणश्रीः—(१) जाद ! जाणामि सव्वं परं पुत्तगस्स मरणदुक्ख-संभवेण सोगेण विसुमरिद म्हि ।

राजा—

अविनश्वरं शरीरं येषां भुवने यशोमयं स्फुरति ।
ते जीवन्ति मृता अपि पुण्यात्मानो न शोच्याश्च ॥ ४६ ॥

---

(१) जात ! जानामि सर्वं परं पुत्रकस्य मरणदुःखसंभवेन शोकेन विस्मृतास्मि ।

तद्विमुच्य क्लीबतां कथय केनोपघातेनालेख्यशेषतामगादकूपारे कुबेरः ? इति ।

गुणश्रीः—(१) पुत्त ! जदि अदिनिब्बंधो ता मे सुदस्स बालमित्तं वामदेवो नाम पुच्छीयदु । सो खु तदो आगदो ।

राजा—प्रतीहार ! वामदेवं द्रष्टुमिच्छामि ।

प्रतीहारः—यदाज्ञापयति देवः । (इति निष्क्रम्य वामदेवेन सह प्रविशति ।)

वामदेवः—(साशङ्कं) (२) सहस त्ति रन्ना सद्दावियस्स वेवदि मे हिदयं । न जाणे किं भविस्सदि ? । अवि य—

मा नाम रायगज्झो होहामि अहं कुबेरमित्तं ति ।
नयरं समग्गमग्गी ईक्कघरसमुग्गओ दहइ ॥ ४७ ॥

भोदु दाव ।

प्रतीहारः—देव ! अयं वामदेवः ।

राजा—वामदेव ! इत आस्यताम् ।

(वामदेवः प्रणम्योपविशति ।)

राजा—भोः ! कुबेरस्य मित्रमसि ? ।

वामदेवः—(स्वगतं) (३) कधं तं य्येव पत्थुदं देवेण ? । (प्रकाशं) देव ! अध इं ? ।

राजा—कच्चित्तस्य जलधियात्रायां सहगतोऽभूस्त्वम् ?

---

(१) पुत्र ! यद्यतिनिर्बन्धस्तदा मम सुतस्य बालमित्रं वामदेवो नाम पृच्छ्यताम् । स खलु तत आगतः ।

(२) सहसेति राज्ञा शब्दायितस्य वेपते मम हृदयम् । न जाने किं भविष्यति ? । अपि च—

मा नाम राजग्राह्यो भविष्याम्यहं कुबेरमित्रमिति ।
नगरं समग्रमग्निरेकगृहसमुद्गतो दहति ॥

भवतु तावत् ।

(३) कथं तदेव प्रस्तुतं देवेन ? । देव ! अथ किम् ? ।

---

१ B & C एक.

वामदेवः—(सातङ्कं स्वगतं) (१) नूणं जलधिजत्ताविढत्तं मह पासे गवेसिस्सदि वित्तं देवो । (प्रकाशं) देव ! एवं नेदं ।

राजा—तत्कथय कथं नामासौ नामशेषतां जगाम जलराशौ कुबेरः ? इति ।

वामदेवः—(मनाक् स्वस्थीभूय) (२) सुणादु देवो ।

राजा—अवहितोऽस्मि ।

वामदेवः—(३) इदो दाव चउसु महत्तरनेगमेसु नगरं नासीकडुय जलहिजत्ताभिसंधाणेण भरुयच्छवेलाऊलं गदो कुबेरसिट्ठी ।

राजा—इयत्यपि विभवसंभारे किमर्थमध्यवसितस्तेन भयङ्करे जलधिवर्त्मनि यात्रारम्भः ? ।

वामदेवः—(४) नियभुयज्जियं मए सुपत्तेसु निजोजिदव्वं दव्वं ति कदपदिन्नेण ववसिदमिदं तेण ।

राजा—उपपन्नमेतत् ।

वामदेवः—(५) तदो वि पंचपंचसयमणूससणाहेहिं पंचपवहणसएहिं पत्तो परकूलं ।

राजा—अहो ! महेच्छता तस्य ।

वामदेवः—(६) अध जादचउकोडिकणयलाहो नियत्तिदो तदो ।

राजा—ततस्ततः ।

---

(१) नूनं जलधियात्रार्जितं मम पार्श्वे गवेषयिष्यति वित्तं देवः । देव ! एवमेतत् ।

(२) शृणोतु देवः ।

(३) इतस्तावच्चतुर्षु महत्तरनैगमेषु नगरं न्यासीकृत्य जलधियात्राभिसन्धानेन भृगुकच्छवेलाकूलं गतः कुबेरश्रेष्ठी ।

(४) निजभुजार्जितं मया सुपात्रेषु नियोजयितव्यं द्रव्यमिति कृतप्रतिज्ञेन व्यवसितमिदं तेन ।

(५) ततोऽपि पञ्चपञ्चशतमनुष्यसनाथैः पञ्चप्रवहणशतैः प्राप्तः परकूलम् ।

(६) अथ जातचतुष्कोटिकनकलाभो निवृत्तस्ततः ।

---

१ B & C °रनिगं २ B & C °लाउलं

वामदेवः—(१) अन्नदा भुवनपल्हत्थणपवणो सहेस त्ति समुट्ठिदो दुट्ठपवणो ।

राजा—सेयं जलधिवर्त्मनो हतकस्य दुरन्तता ।

वामदेवः—(२) तव्वसादो पयट्टाणि उप्पहेण पवहणाणि । पडिदाणि पुव्वपविट्ठपंचजाणवत्तसयवि[1]च्छिन्नजलन्तविवन्नसंजत्तियसरीरविस्सग्गंधुक्कडे एगम्मि विसमगिरिवलयसंकडे ।

राजा—धिक् तदिदमुपस्थितमप्रतिविधेयं व्यसनवैशसमियतो जनस्य ।

वामदेवः—(३) तदो य अनीहरन्तेसु पोदेसु बाढं विसन्नो सपरिवारो कुबेरो । इत्थंतरे आगदो तत्थेगो नावारूढो नरो । भणिदं च तेण ' दंसेमि भे निग्गमोवायं ' ति ।

राजा—अनाप्तोपज्ञमपि निर्मूल्यमाश्वासनावचनमापदि ।

वामदेवः—(४) कुबेरेण भणिदं 'भद्द! को तुमं ?'। तेण भणिदं ' नोत्ता-[2]सो नाम निज्जामगोऽहं ' । कुबेरेण भणिदं ' कुदो कधं वा इहागदो सि ? ' । तेण भणिदं[3] ' इदो नादिदूरे अत्थि पंचसिंगो नाम महादीवो । तत्थ सच्चसायरो नाम नरवदी । तेण अदिक्कंतवासरि य्येव मिगयागदेण मारिदा पडिदफुरंत-गब्भा मिगी । तम्मरणादो सयं य्येव मदो हरिणगो । तदो संजादपच्चग्गदया-रसेण निवदिणा पवत्तिदा नियरज्जे अमारी । निउत्ता दुत्थिदजंतुगवेसणत्थं

(१) अन्यदा भुवनपर्यसनप्रवणः सहसेति समुत्थितो दुष्टपवनः ।

(२) तद्वशात्प्रवृत्तान्युत्पथेन प्रवहणानि । पतितानि पूर्वप्रविष्टपञ्चयानपात्रशतविस्तीर्ण-जलान्तर्विपन्नसांयात्रिकशरीरविश्वगन्धोत्कटे एकस्मिन् विषमगिरिवलयसङ्कटे ।

(३) ततश्चानिःसरत्सु पोतेषु बाढं विषण्णः सपरिवारः कुबेरः । अत्रान्तरे आगतस्तत्रैको नावारूढो नरः । भणितं च तेन ' दर्शयामि युष्मान् निर्गमोपायम् ' इति ।

(४) कुबेरेण भणितं ' भद्र ! कस्त्वम् ? ' । तेन भणितं ' नोत्रासो नाम निर्यामकोऽहम् ' । कुबेरेण भणितं ' कुतः कथं वा इहागतोऽसि ? ' । तेन भणितं ' इतो नातिदूरेऽस्ति पञ्चश्रृङ्गो नाम महाद्वीपः । तत्र सत्यसागरो नाम नरपतिः । तेनातिक्रान्तवासरे एव मृगयागतेन मारिता पतितस्फुरद्गर्भा मृगी । तन्मरणात्स्वयमेव मृतो हरिणकः । ततः संजातप्रत्यग्रदयारसेन नृपतिना

१ B & C वित्थिन्न २ B & C नोरसो. ३ B & C भणिदं.

सव्वत्थ पुरिसा। वावारिदा जलहिमग्गे रायकीरा। तदो अज्ज एगेण रायकीरेण निवेदिदं निवस्स। जधा, 'देव ! भुजंगकुंडलगिरिणो वलयसंकडे पडिदं पवहणसहस्सं अत्थि'। अध 'जो तं पोयसहस्सं तदो कड्ढिदि तस्स कणयकोडिं देमि' त्ति घोसाविदं रन्ना। छित्तपडहओ संमाणिय पेसिदो निवदिणा पत्तु म्हि इत्थ' त्ति।

राजा—अहो! महात्मनस्तस्य नृपतेर्निष्कारणा सर्वसत्त्वसाधारणी करुणा।

वामदेवः—(१) कुबेरेण भणिदं 'भद्द ! जदि एवं ता पवंचेसु णे[1] निग्गमोवायं'। तेण भणिदं 'एदस्स गिरिणो पच्छिमकडयभित्तिगया अत्थि गूढा दुवारिया। तप्परदो चिट्ठदि महंतमुव्वसं नयरं। तस्स मज्झे वट्टदि गयणग्गलग्गसिहरं देवदाहरं। तत्थ निसाए गडुय ताडिदव्वाणि पडुपडिरवमुहलसेलकंदराणि दिव्वाउज्जाणि। तन्निनादजादसंतासससमुड्डीणगिरिसिहरसंठिदपादवनिलीणभारुंडकुलपक्खपवणपणुल्लिदाइं नीहरिहंति जाणवत्ताणि। किंतु तत्थगदनरस्स पडिनियत्ती नत्थि'। कुबेरेण भणिदं 'कधं चिय'। तेण भणिदं 'तत्थट्ठियस्स य्येव तस्स जदो पवहणनिग्गमो भोदि। अवि य, तत्थ रक्खसो सुव्वदि'।

राजा—स एष पीयूषे विषच्छटानिषेकः।

प्रवर्त्तिता निजराज्येऽमारी। नियुक्ता दुस्थितजन्तुगवेषणार्थं सर्वत्र पुरुषाः। व्यापारिता जलधिमार्गे राजकीराः। ततोऽद्यैकेन राजकीरेण निवेदितं नृपाय। यथा, 'देव ! भुजङ्गकुण्डलगिरेर्वलयसङ्कटे पतितं प्रवहणसहस्रमस्ति'। अथ 'यस्तं पोतसहस्रं ततः कर्षति तस्य कनककोटिं ददामि' इति घोषितं राज्ञा। स्पृष्टपटहकः सम्मान्य प्रेषितो नृपतिना प्राप्तोऽस्म्यत्र' इति।

(१) कुबेरेण भणितं 'भद्र ! यद्येवं ततः प्रपञ्चयास्मान् निर्गमोपायम्'। तेन भणितं 'एतस्य गिरेः पश्चिमकटकभित्तिगतास्ति गूढा द्वारिका तत्परतस्तिष्ठति महदुद्वसं नगरम्। तस्य मध्ये वर्त्तते गगनाग्रलग्नशिखरं देवतागृहम्। तत्र निशायां गत्वा ताडितव्यानि पटुप्रतिरवमुखरशैलकन्दराणि दिव्यातोद्यानि। तन्निनादजातसंत्राससमुड्डीनगिरिशिखरसंस्थितपादपनिलीनभारुण्डकुलपक्षपवनप्रक्षिप्तानि निस्सरिष्यन्ति यानपात्राणि। किन्तु तत्रगतनरस्य प्रतिनिवृत्तिर्नास्ति'। कुबेरेण भणितं 'कथं खलु ?'। तेन भणितं 'तत्रस्थितस्यैव तस्य यतः प्रवहणनिर्गमो भवति। अपि च, तत्र राक्षसः श्रूयते'।

---

१ B & C णो

वामदेवः—(१) तदो कुबेरेण वाहरिदा नियनरा ।

राजा—तत्किमत्रार्थे प्रवृत्ताऽमीषामहमहमिका ? ।

वामदेवः—(२) नहि नहि, किंतु अहोमुहत्तणं कडुय ठिदा सव्वे ।

राजा—धिगेतान्नरापसदान् । यतः—

अद्य श्वो वा ध्रुवे मृत्यौ स्वस्यैकस्य व्ययाद्यदि ।
रक्ष्यन्ते भूयसां प्राणाः पर्याप्तमियता न किम् ? ॥ ४८ ॥

वामदेवः—(३) ममं पि हदगं तस्स आकिदिगणस्स मज्झवत्तिणं परिभावेदु देवो ।

राजा—ततः किं प्रतिपन्नं कुबेरेण ? ।

वामदेवः—(४) किमन्नं ? सयं ज्येव कदं गमणं ।

राजा—(आकाशे लक्ष्यं बद्ध्वा सरोमाञ्चं) साधु भोः कुबेर ! साधु । यदेवं परार्थे प्राणांस्तृणवद्गणितवानसि । अपि च—

बद्धस्त्वयात्मा धुरि धार्मिकाणां
रेखाधिकः सत्पुरुषेष्वभूस्त्वम् ।
न्यधाः पदं मूर्धनि सात्त्विकाना-
मलेखि चन्द्रे भवता स्वनाम ॥ ४९ ॥

वामदेवः—(५) तदा मुहुत्तमित्तेण उच्छलिदो निनादो । उड्डीणाणि भारुंडकुलाणि । नीहरिदाणि जाणवत्ताणि । पत्ताणि कमेण भरुयच्छं । तत्थ कुबेरसंतियं भंडं परदेसविढत्तदव्वं च ववहारिजणस्स नासीकडुय इहागदे[1] म्ह[2] ।

---

(१) ततः कुबेरेण व्याहृता निजनराः ।
(२) नहिं नहि, किन्तु अधोमुखत्वं कृत्वा स्थिताः सर्वे ।
(३) मामपि हतकं तस्याकृतिगणस्य मध्यवर्तिनं परिभावयतु देवः ।
(४) किमन्यत् ? स्वयमेव कृतं गमनम् ।
(५) तदा मुहूर्त्तमात्रेणोच्छलितो निनादः । उड्डीनानि भारुण्डकुलानि । निस्सृतानि यानपात्राणि । प्राप्तानि क्रमेण भृगुकच्छम् । तत्र कुबेरसत्कं भाण्डं परदेशार्जितद्रव्यं च व्यवहारिजनस्य न्यासीकृत्येहागताः स्मः ।

---

१ B & C द्विया २ B & C °द म्हि.

राजा—प्रतीहार ! महाजनं द्रष्टुमिच्छामि ।

प्रतीहारः—यदाज्ञापयति देवः । (इति निष्क्रम्य महाजनेन सह प्रविशति ।)

महाजनः—(अपवार्य साशङ्कं) मृतस्वग्रहणक्षणे क्षोणिपतिरस्मद्दर्शनमिच्छतीति न जाने किं भविष्यतीति ? ।

प्रतीहारः—इतो देवस्तदुपसर्पतु महाजनः ।

(महाजन उपसृत्य प्रणमति ।)

राजा—(ससंभ्रमं) आसनमासनं महाजनाय ।

महाजनः—(परिजनोपनीतमासनमध्यास्य) प्रसीदतु देवः । किमनुष्ठीयताम् ? इति ।

राजा—(सजुगुप्सं)

दुर्भिक्षोदयमन्नसंग्रहपरः प्रत्युर्वधं बन्धकी
ध्यायत्यर्थयते भिषग्गदगणोत्पातं कलिं नारदः ।
दोषग्राहिजनश्च पश्यति परच्छिद्रं छलं शाकिनी
निष्पुत्रं म्रियमाणमाढ्यमवनीपालो हहा ! वाञ्छति ॥ ५० ॥

महाजनः—(अपवारितकेन) किमेतदुपन्यस्तं देवेन ? ।

राजा—अपि च,

निर्वीराद्द्रविणादानाद्यद्भवेत्पातकं महत् ।
आक्रान्तस्तद्भरेणेव नृपो याति रसातलम् ॥ ५१ ॥

महाजनः—(कर्णौ पिधाय) शान्तं पापम् ।

राजा—स्थाने लौकिका अपि राजानमेवं पापमयमाचक्षते । तथाहि—

दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥ ५२ ॥

महाजनः—किमेवं सकलपूर्वभूपालपरंपरापरिक्षुण्णं मृतस्वग्रहणवर्त्म जुगुप्सते देवः ? ।

राजा—किं बहुनोक्तेन ?,

---

१ B & C °ष्यतीति. २ B & C °लभूपाल°

निष्पुत्रो म्रियते यो यस्तस्य तस्य हताशया।
पुत्रतां प्रतिपद्यन्ते नृपाः कष्टं धनाशया ॥ ५३ ॥

तदद्यप्रभृति मुक्तमेव मया मृतस्वमिति।

महाजनः—(सहर्षं) क एवं देवादपरः कर्तुमीष्टे।

गुणश्रीः—(१) पुत्त ! गिण्ह गिण्ह एदं दव्वजादं। जदो अहं ससुण्हा वंहिं[1] (इत्यर्द्धोक्ते) अणसणं पवज्जिस्सं।

राजा—अम्ब ! अलममुना साहसेन। ननु कुबेरवदहमस्मि तवात्मज। अपि च, विचित्राणि विधिविलसितानि। कदाचित्कुबेरोऽपि परोपकारसुकृत-संभारपोतसमुत्तीर्णव्यसनार्णवः कथंचिदागच्छेत्।

गुणश्रीः—(२) पुत्त ! एदाइं य्येव भण पुणो वि अक्खराणि।

राजा—अम्ब ! किमिवासंभाव्यमत्र ?। तथाहि—

मानादानकदुन्दुभिर्ननु तथा कलसप्रवासो निजा-
नागत्याब्दशतान्निराशहृदयानाश्वासयद्बान्धवान्।
प्रद्युम्नश्च पुराकृतादपहृतः स्वर्गौकसा षोडशा-
द्वर्षादेत्य शुचातुराममतितरामप्रीणयन्मातरम् ॥ ५४ ॥

गुणश्रीः—(३) पुत्त ! एवं भोदु तुह दीहाउणो वयणेणं। (इतिशकुनग्रन्थिं बध्नाति।)

राजा—प्रतीहार ! पटहवादनान्मृतस्वपरिहारं पौराणां विदितं कारय।

प्रतीहारः—यदाज्ञापयति देवः। (इति निष्क्रामति।)

(नेपथ्ये)

भो भोः पौराः ! श्रूयतामेषा घोषणा,

निःशूकैः शकितं न यन्नृपतिभिस्त्यक्तुं क्वचित्प्राक्तनैः
पत्न्याः क्षार इव क्षते पतिमृतौ यस्यापहारः किल।

---

(१) पुत्र ! गृहाण गृहाणैतद् द्रव्यजातम्। यतोऽहं सस्नुषा वह्निं अनशनं प्रपत्स्ये।
(२) पुत्र ! एतान्येव भण पुनरप्यक्षराणि।
(३) पुत्र ! एवं भवतु तव दीर्घायुषो वचनेन।

---

१ B & C वण्हिं.

आपाथोधि कुमारपालनृपतिर्देवो रुदत्या धनं
विभ्राणः सदयं प्रजासु हृदयं मुञ्चत्ययं तत्स्वयम् ॥ ५५ ॥

सर्वे—(समाकर्ण्य) प्रियं प्रियं नः ।

राजा—इयता कृतार्थोऽस्मि ।

(नेपथ्ये)

किं बालार्कविभावलेर्विलसितं विस्पन्दितं विद्युता-
मेतत्किंस्विदिति भ्रमात्पुरजनेनोद्ग्रीवमालोकितः ।
निर्विच्छेदनभस्समीरणरणद्धण्टाविरावच्छला-
द्व्याकुर्वन्निजसंपदोऽवतरति व्योम्नो विमानो महान् ॥ ५६ ॥

(सर्वे ससंभ्रममूर्ध्वमवलोकयन्ति ।)

गुणश्रीः—(सहर्षं) (१) दिट्ठिया विमाणमज्झगदस्स मह पुत्तगस्स कुबेरस्स निच्छिदं सद्दो सुणीयदि ।

(ततः प्रविशत्याकाशयानेन विमानस्थः सकलत्रः कुबेरः ।)

कुबेरः—(सहर्षं) प्रिये पातालचन्द्रिके ! कथमभिमतप्रदेशमापतित एव मुहूर्त्तेन विमानराजः । ततश्च,

पूर्वं श्रीवनराजभूमिपतिना व्यालोक्य सल्लक्षणां
क्षोणीं स्थापितमेतदत्र नगरं निर्वर्ण्यतां निर्भरम् ।
श्रीकौमारविहारमौलिवलयालङ्कारपालिध्वज-
व्याजाज्जैत्रमदत्त पत्रममरावत्यै यदुच्चैस्तराम् ॥ ५७ ॥

अपि च—

एषा सुभ्रु ! सरस्वतीसरिदिदं श्रीसिद्धभर्तुः सर-
श्चैतत्तन्वि ! बकस्थलं पृथुयशःस्तंभोऽयमभ्रंलिहः ।
प्रासादो नृपतेरयं निरुपमः सुश्रोणि ! सौधापण-
श्रेणिः क्षोणिरियं श्रियां च नगरे द्रष्टव्यमस्मिन्न किम् ? ॥५८॥

पातालचन्द्रिका—(२) अज्जउत्त ! सुलद्धं मे जम्मं जमेरिसे नयरे तए सह निवासु त्ति ।

---

(१) दिष्ट्या विमानमध्यगतस्य मम पुत्रकस्य कुबेरस्य निश्चितं शब्दः श्रूयते ।

(२) आर्यपुत्र ! सुलब्धं मे जन्म यदीदृशे नगरे त्वया सह निवास इति ।

कुबेरः—प्रिये ! अवतरावस्तावत् । मा मद्वियोगकातरा किञ्चिदत्याहितं करिष्यत्यम्बा ।

पातालचन्द्रिका—(१) अज्जउत्त ! एवं भोदु ।

कुबेरः—तदेतन्मम सदनं यावदवतरामि । (पुरोऽवलोक्य) अये ! कथमत्र महान् जनसमवायः ? । कथं चात्र चौलुक्यचक्रवर्ती विलोक्यते ? । मन्ये च मद्द्रविणग्रहणाय क्षोणिपतेरयं स्वयं गृहागमनपरिस्पन्दः । भवतु तावत् । (विमानादवतरति ।)

सर्वे—(सहसोपलक्ष्य) कुबेरः कुबेर इति ।

(कुबेर उपसृत्य राजानं प्रणमति ।)

राजा—(सप्रणयं) स्वागतं भवतः ? ।

गुणश्रीः—(२) दिट्ठिया वड्ढामि पच्चुज्जीविदस्स वच्छस्स दंसणेणं ति ।

कुबेरः—अम्ब ! प्रणमति कुबेरः ।

गुणश्रीः—(३) पुत्त ! अजरामरो भोसु ।

कुबेरः—अम्ब ! एषा वधूः प्रणमति ।

(पातालचन्द्रिका गुणश्रियः पादौ स्पृशति ।)

गुणश्रीः—(४) जादे ! अविधवा भोसु ।

राजा—श्रेष्ठिन् ! इत आस्यताम् ।

(कुबेर उपविशति ।)

राजा—भोः श्रेष्ठिन् ! कथय कथं वामदेवप्रकटितात्तादृशाद्दुर्गदेशादीदृशेन विमानेन पुनरस्मन्नगरमहाजनं सनाथतां नीतवानसि ? ।

कुबेरः—देव ! निर्यामकोक्तनीत्या गत्वा तद्देवतागृहं कृतमातोद्यताडनम् । प्रविष्टेन चान्तश्चन्द्रकान्तमणिमयी भगवतश्चन्द्रप्रभस्य निरूपिता प्रतिमा ।

---

(१) आर्यपुत्र ! एवं भवतु ।
(२) दिष्ट्या वर्धे प्रत्युज्जीवितस्य वत्सस्य दर्शनेनेति ।
(३) पुत्र ! अजरामरो भव ।
(४) जाते ! अविधवा भव ।

प्रणम्य स्तुत्वा पर्युपास्य च सुचिरमेनामशङ्कितमनास्ततो निःसृत्य रम्यप्रदेशदर्शनाशया भ्राम्यन्नितस्ततः प्राप्तोऽस्मि प्रासादमेकम् ।

राजा—ततस्ततः ? ।

कुबेरः—आरूढश्च तत्राद्राक्षमेकां निकाममधुराकृतिं दिव्यकन्यकाम् ।

राजा—तदसौ शून्यगृहे सुकुमारिकावासिः ।

कुबेरः—कृताभ्युत्थानादिश्च तया सविस्मयमप्राक्षम् 'भद्रे ! कात्वमसीति'। सा त्ववादीत् 'अत्र पातालतिलकनाम्नि नगरे पातालकेतुर्नाम विद्याधराधिराजो राज्यमन्वशात् । तस्य पातालसुन्दरीप्रियागर्भजां पातालचन्द्रिकां नाम्न मां कन्यकां विद्धि । स च मे पिता प्रकृत्या पिशितलोलुपोऽभूत् । तन्निमित्तमनुदिनमनेकजन्तुवधाद्विविधानि पललानि संस्क्रियन्ते स्म । अन्यदा च सूपकारप्रमादादामिषं भक्षितवती बिडाली । भीतेन चानेनान्विष्यता दुराचारजातगर्भया कयापि स्त्रिया परित्यक्तस्तत्कालजातबालको व्यलोकि । स च संस्कृत्योपनीतो नृपतेरतिमनोज्ञतया प्रीतेन पृष्टोऽसौ राज्ञा । यथावदावेदितव्यतिकरः प्रत्यहं महामांसरसवतीं निर्वर्तयितुमादिष्टश्च । प्रतिदिनं मनुजपलकवलनाच्च राक्षसोऽजनि मज्जनकः । तेन च मां मज्जननीं च मुक्त्वा भक्षितमिदमशेषं नगरम् । स च संप्रति क्वापि स्वाहारघटनाय गतोऽस्ति'।

राजा—धिग् दुरात्मनो मांसलोलुपताम् ।

कुबेरः—अथ सशपथमवस्थाप्य मामसौ गता क्वापि । क्षणाच्च तत्राजगाम तन्माता पातालसुन्दरी । तया चोक्तोऽहं 'पुत्र ! मत्पुत्र्याः पीडय पाणिम् । तवैकस्याभयं बलाद्याचितोऽस्ति मया स्वभर्त्रेति'। 'ततः परिणीता मया पातालचन्द्रिका । जातसंबन्धः संबोधितः पातालकेतुः । अवतारितो जिनधर्माध्वानम् । ग्राहितो मांसास्वादनविरतिम् । विमानस्थः सकलत्रश्चात्र समानीय मुक्तस्तेनाहमिति'।

राजा—

निर्मूल्यं गणितं निजं परपरित्राणे तृणं प्राणितं
पाणौकृत्य नभश्चरीयमचिरात्कल्याणिनी प्रीणिता ।

१ B & C °द्याधिरा° २ B & C °नानेना° ३ B & C °दविर°

प्राप्तः कौणपतां नृपो विधिवशाद्धर्म्येऽध्वनि स्थापितः
स्वं धामानुसृतं कुबेर ! भवता किं किं कृतं नाद्भुतम् ? ॥५९॥

(कुबेरो लज्जां नाटयति ।)

(नेपथ्ये)

वैतालिकः—

उच्छेद्य यः सप्त भयानि सर्वतः
प्रयोज्य धर्मे भुवनं सनातने ।
निरङ्कुशं क्रीडति सिद्धियोषिता
मध्याह्नतापं हरताज्जिनः स वः ॥ ६० ॥

राजा—कथमयमाशीर्वचनव्यपदेशादस्मान्मध्याह्नकृत्याय त्वरयति वैतालिकः ? । तत्कुबेरश्रेष्ठिन् ! गृहाण निजलक्ष्मीम् । आश्वासय जननीम् । प्रीणय प्रणयिजनम् । प्रवर्त्तस्व धर्मकर्मणि । वयमपि यतामहे मध्याह्नपूजां कर्तुम् ।

(इति निष्क्रान्ताः सर्वे ।)

तृतीयोऽङ्कः ।

चतुर्थोऽङ्कः ।

(ततः प्रविशति देशश्रीः ।)

देशश्रीः—(सहर्ष) (१) चिरादो कणिट्ठभगिणिकं नयरसिरिं दट्ठुं उक्कंठाविसंठुलं मे हिदयं । कहिं पुण तीए भोदव्वं ? । (किञ्चित्परिक्रम्याग्रतो निरूप्य) कधं एसा कावि दीसदि सामलंगी विलया ? । ता एदं पुच्छिस्सं ।

(ततः प्रविशति वनिता ।)

वनिता—(२) एसा कावि अहिणवा एदि । ता एदीए पडिवत्तिं करेमि (इति कुसुमान्युपनीय) कुदो पुण नियचलणफंसेण अज्जाए अणुगिहीद म्हि ? ।

देशश्रीः—(सहर्ष) (३) समुद्दतीरादो ।

वनिता—(४) अध कहिं गंतव्वं ? ।

देशश्रीः—(५) हला ! कधइस्समेदं । नवरं का तुमं ? ति जाणिदुमिच्छामि ।

वनिता—(६) एदं कहिस्सं । अहं खु देवीए नयरसिरीए पियसही वणराई नाम ।

देशश्रीः—(सप्रमोदं) (७) दिट्ठिया वड्डामि । जदो सा मम कणिट्ठभगिणिका । तं ज्जेव दट्ठुमिच्छामि । ता हला वणराइ ! पदंसेसु मे तं भगिणिकं ।

---

(१) चिरात्कनिष्ठभगिनिकां नगरश्रियं द्रष्टुमुत्कण्ठाविसंस्थुलं मम हृदयम् । कस्मिन्पुनस्तस्या भवितव्यम् ? । कथं एषा कापि दृश्यते श्यामलाङ्गी वनिता ? । तदेतां प्रक्ष्यामि ।

(२) एषा काप्यभिनवैति । तत एतस्याः प्रतिपत्तिं करोमि । कुतः पुनर्निजचरणस्पर्शेनार्ययानुग्रहीतास्मि ? ।

(३) समुद्रतीरात् ।

(४) अथ कुत्र गन्तव्यम् ? ।

(५) हला ! कथयिष्याम्येतत् । नवरं का त्वम् ? इति ज्ञातुमिच्छामि ।

(६) एतत्कथयिष्यामि । अहं खलु देव्या नगरश्रियः प्रियसखी वनराजी नाम ।

(७) दिष्ट्या वर्द्धे । यतः सा मम कनिष्ठभगिनिका । तामेव द्रष्टुमिच्छामि । तद् हला वनराजि ! प्रदर्शय मे तां भगिनिकाम् ।

---

१ B & C गंदव्वं.

वनिता—(१) इदो इदो एदु पियसही। (इत्युभे परिक्रामतः।)

वनिता—(सम्यग् निरूप्य) (२) आ! कधं पुरदो ज्जेव दीसदि पियसही नयरसिरी ?।

(प्रविश्य नगरश्रीः।)

नगरश्रीः—(३) सबहुमाणमाणत्त म्हि चालुक्कचंदेण 'भद्दे नयरसिरि! जा एसा विवेयदुहिदा किवासुंदरी नाम सा मए तुह नासीकदा तेधा अणुकूलिदव्वा जधा वारं वारं मं पदि पिम्मं दढीकरेदि[३]'। मए वि तहा तहा अणुपवत्तिदा जधा संपदं राएसिं ज्जेवं ज्झायंती विरहतावकिलंता कालं वोलदि। मज्झ पियसहीए वणराईए संसग्गेण जादविणोदा वट्टदि। ता गडुय तं संभावइस्सं। (पुरतो निरीक्ष्य सहर्षं) दिट्ठिया वणराईदुदीया भगिणिया देससिरी दीसदि। (सहसोपसृत्य) सागदं जिट्ठभगिणियाए ?। (इत्युभे परिष्वजेते।)

वनिता—(४) तुम्ह दुण्ह भगिणियाणं गंगाजमुणाणं व रमणिज्जो संगमो। ता किमित्थ अहं करेमि ?। ता वरं गडुय किवासुन्दरिं पच्चुविक्खिस्सं।

(इति निष्क्रान्ता।)

देशश्रीः—(५) भगिणिके ! चिरादो दिट्ठासि।

नगरश्रीः—(६) अज्जे ! अध किं ?।

---

(१) इत इत एतु प्रियसखी।

(२) आः! कथं पुरत एव दृश्यते प्रियसखी नगरश्रीः ?।

(३) सबहुमानमाज्ञप्तास्मि चौलुक्यचन्द्रेण 'भद्रे नगरश्रि ! या एषा विवेकदुहिता कृपासुन्दरी नाम सा मया तव न्यासीकृता तथाऽनुकूलयितव्या यथा वारं वारं मां प्रति प्रेम दृढीकरोति'। मयापि तथा तथानुप्रवर्तिता यथा साम्प्रतं राजर्षिमेव ध्यायन्ती विरहतापक्लान्ता कालं गमयति। मम प्रियसख्या वनराज्याः संसर्गेण जातविनोदा वर्तते। तद् गत्वा तां संभावयिष्यामि। दिष्ट्या वनराजीद्वितीया भगिनिका देशश्रीर्दृश्यते। स्वागतं ज्येष्ठभगिन्याः ?।

(४) युवयोर्द्वयोर्भगिन्योर्गङ्गायमुनयोरिव रमणीयः संगमः। तत् किमत्राहं करोमि ?। तद् वरं गत्वा कृपासुन्दरीं प्रत्युपेक्षिष्ये।

(५) भगिनिके ! चिराद्दृष्टासि।

(६) आर्ये ! अथ किम् ?।

---

१ B & C तथा. २ B & C पेम्म. ३ B & C °करेइ. ४ C अणुपव्विदा. ५ B & C जेव. ६ B & C मज्झं च पिं

देशश्रीः—(१) किं ति अन्नारिस व्व जादा सि ?।

नगरश्रीः—(२) अज्जे ! मह सामी वि अणीदिसो संपदि वट्टदि। ता कधमहमन्नारिसा न भविस्सं ?।

देशश्रीः—(३) केरिसो सामी इण्हिं ? ति सोदुमिच्छामि।

नगरश्रीः—(४) भगिणिके! किं नालिकेरदीवादो आगदा सि ? जं इमं पि न सुणेसि। णं संपदं गुरूवदेसलद्धजिणधम्माणुरत्तेण देवेण चत्तं मंसं आहेडओ य। संवुत्तो परमसावगो। जहा राया तहा पय त्ति अहं पि साविगा जाय म्हि।

देशश्रीः—(५) वच्छे! जुत्तमणुट्ठिदं। नवरं ममावि उवदिससु सावयधम्मं।

नगरश्रीः—(संस्कृतमाश्रित्य)

जिनो देवः कृपा धर्मो गुरवो यत्र साधवः।
श्रावकत्वाय कस्तस्मै न श्लाघेताविमूढधीः ?॥ १॥

देशश्रीः—(६) अच्छरियं अच्छरियं। असुदपुव्वो एस धम्मो। ता अज्जप्पभुदि अब्भुवगदो मए वि। अहं पि साविगा जाद म्हि।

नगरश्रीः—(७) इत्तिकेण अणुगिहीद म्हि।

---

(१) किमिति अन्यादृशेव जातासि ?।

(२) आर्ये! मम स्वाम्यप्यनीदृशः संप्रति वर्तते। तत् कथमहमन्यादृशा न भवामि ?।

(३) कीदृशः स्वामीदानीम् ? इति श्रोतुमिच्छामि।

(४) भगिनिके! किं नालिकेरद्वीपादागतासि ? यदिदमपि न जानासि। ननु सांप्रत गुरूपदेशलब्धजिनधर्मानुरक्तेन देवेन त्यक्तं मांसं आखेटकश्च। संवृत्तः परमश्रावकः। यथा राजा तथा प्रजेत्यहमपि श्राविका जातास्मि।

(५) वत्से! युक्तमनुष्ठितम्। नवरं ममाप्युपदिश श्रावकधर्मम्।

(६) आश्चर्यमाश्चर्यम्। अश्रुतपूर्व एष धर्मः। ततोऽद्यप्रभृत्यभ्युपगतो मयापि। अहमपि श्राविका जातास्मि।

(७) एतावताऽनुगृहीतास्मि।

---

१ B & C सुणसि. २ B & C जाय.

देशश्रीः—(१) वच्छे ! अज्ज पुण कीस तुमं विसेसभूसिद व्व दीससि ?।

नगरश्रीः—(२) अज्जे ! अज्ज महूसवो जादो।

देशश्रीः—(३) केरिसो ?।

नगरश्रीः—(४) अज्ज राएसिणो सत्तुंजयरेवयपमुहमहातित्थजत्तं कडुय पडिनियत्तस्स पवेसमंगलं संवुत्तं ति।

(नेपथ्ये)

(५) हला वणराईए ! अदिसीदले वि तुह भवणे न लहेमि रदिं। हला सोमदे ! एस संतावो इमेहिं कुसुमकिसलयपमुहोवयारेहिं न उवसमदि।

देशश्रीः—(६) वच्छे ! किमिदं ?।

(नगरश्रीः कर्णे एवमेव।)

देशश्रीः—(७) हुं नादं। वच्छे ! दंसेहि तं किवासुंदरिं।

नगरश्रीः—(८) इदो इदो एदु अज्जा। (किञ्चित्परिक्रम्य।) इमस्सिं पएसे वट्टदि किवासुंदरी।

(ततः प्रविशति कृपासुन्दरी वनराजी सोमता च।)

कृपासुन्दरी—(संतापमभिनीय) (९) सहि वणराइए ! इहं पि नत्थि निव्वुदी ता का गदी ?।

---

(१) वत्से ! अद्य पुनः कस्मात्त्वं विशेषभूषितेव दृश्यसे ?।

(२) आर्ये ! अद्य महोत्सवो जातः।

(३) कीदृशः ?।

(४) अद्य राजर्षेः शत्रुञ्जयरैवतप्रमुखमहातीर्थयात्रां कृत्वा प्रतिनिवृत्तस्य प्रवेशमङ्गलं संवृत्तमिति।

(५) हला वनराजिके ! अतिशीतलेऽपि तव भवने न लभे रतिम्। हला सोमते ! एष संताप एभिः कुसुमकिशलयप्रमुखोपचारैर्नोपशाम्यति।

(६) वत्से ! किमिदम् ?।

(७) हुं ज्ञातम्। वत्से ! दर्शय तां कृपासुन्दरीम्।

(८) इत इत एत्वार्या। अस्मिन् प्रदेशे वर्त्तते कृपासुन्दरी।

(९) सखि वनराजिके ! इहापि नास्ति निर्वृतिस्ततः का गतिः ?।

वनराजी—(१) सहि ! समस्ससिहि समस्ससिहि अणुकूलं दिव्वं सव्वं संपाडइस्सदि ।

सोमता—(२) भट्टिणि ! मा उत्तम्म ।

नगरश्रीः—(३) भगिणिके ! सुदो संलावो एदाणं ।

देशश्रीः—(४) अध किं ? ।

वनराजी—(५) कधं अज्ज देससिरिसणाहा पत्ता पियसही नयरसिरी? ।

कृपासुन्दरी—(६) सहि सोमदे ! संठवसु ममं । (इत्यात्मानं संवृणोति ।)

नगरश्रीः—(७) भगिणिके ! एहि उवसप्पम्ह । (उपसृत्य) सहि किवासुंदरि ! बाढमायासिदा सि संतावेण ।

कृपासुन्दरी—(आकारसंवरं कृत्वा) (८) इत्थ उपविसदु पियसहीजुयलं ।

(उभे उपविशतः ।)

नगरश्रीः—(९) सहि किवासुंदरि ! एसा मह जिट्ठ[1]भगिणिका तुमए सह सहित्तणं गिण्हिदुमिच्छदि ।

कृपासुन्दरी—(१०) सहि नगरसिरि ! पडिवन्नं ज्जेव एदं मए ।

देशश्रीः—(११) सहि ! इमिणा कयत्थ म्हि ।

---

(१) सखि ! समाश्वसीहि समाश्वसीहि अनुकूलं दैवं सर्वं संपादयिष्यति ।
(२) भट्टिनि ! मा उत्ताम्य ।
(३) भगिनिके ! श्रुतः संलाप एतयोः ।
(४) अथ किम् ? ।
(५) कथमद्य देशश्रीसनाथा प्राप्ता प्रियसखी नगरश्रीः ? ।
(६) सखि सोमते ! संस्थापय माम् ।
(७) भगिनिके ! एह्युपसर्पावः । सखि कृपासुन्दरि ! बाढमायासितासि संतापेन ।
(८) अत्रोपविशतु प्रियसखियुगलम् ।
(९) सखि कृपासुन्दरि ! एषा मम ज्येष्ठभगिनिका त्वया सह सखित्वं ग्रहीतुमिच्छति ।
(१०) सखि ! नगरश्रि ! प्रतिपन्नमेवैतन्मया ।
(११) सखि ! अनेन कृतार्थास्मि ।

---

१ B & C जेट्ठ°

(नेपथ्ये)

(१) रे रे ! रएह वागुरे। पाडेह पासए। जालेह जलणे। सज्जेह पहरणे। मारेह ससए । बंधेह हरिणे । घाएह वराहे । विससेह महिसे। वावाएह विहंगमे।

सर्वाः—(सत्रासं) (२) अच्चाहिदं अच्चाहिदं किमिदं ? ति।

वनराजी—(३) सहीओ ! मा उत्तसध। कस्सवि खत्तियकुमारस्स पारद्धिपारंभसम्मद्दो एस।

कृपासुन्दरी—(४) सहीओ ! इमिणा कोलाहलेण न सक्केमि ठादुं।

(इत्युत्थाय गमनं नाटयति।)

(सर्वा अनुव्रजन्ति।)

(नेपथ्ये गीतध्वनिः।)

सर्वाः—(कर्णं दत्त्वा) (५) अदिकरुणमधुरो एस कुदो गीदज्झुणि ? त्ति।

वनराजी—(६) सहीओ ! एस पारद्धियाणं गोरिगेयसद्दो।

कृपासुन्दरी—(७) इमिणा गीदेणवि समुप्पज्जदि मे सीसवेदणा। ता अन्नदो गमिस्सं। (किंचित्परिक्रम्य पुरो विलोक्य च) कधमेस को वि जलासओ ?। ता इमस्स परिसरेण सीदलेण भोदव्वं।

(नेपथ्ये)

(८) अरे ! खिवेह जाले। पवत्तेह गले (?)। गहेह मीणे।

---

(१) रे रे ! रचयत वागुराः। पातयत पाशान्। ज्वालयत ज्वलनानि। सज्जयत प्रहरणानि। मारयत शशकान्। बन्धयत हरिणान्। घातयत वराहान्। विशसयत महिषान्। व्यापादयत विहङ्गमान्।

(२) अत्याहितमत्याहितं किमिदम् ? इति।

(३) सख्यः ! मा उत्त्रस्यत। कस्यापि क्षत्रियकुमारस्य पापर्द्धिप्रारम्भसम्मर्द एषः।

(४) सख्यः ! अनेन कोलाहलेन न शक्नोमि स्थातुम्।

(५) अतिकरुणमधुर एष कुतो गीतध्वनिः ? इति।

(६) सख्यः ! एष पापर्द्धिकाणां गौरीगेयशब्दः।

(७) अनेन गीतेनापि समुत्पद्यते मे शीर्षवेदना। ततोऽन्यतो गमिष्यामि। कथमेष कोऽपि जलाशयः ?। तदस्य परिसरेण शीतलेन भवितव्यम्।

(८) अरे ! क्षिपयत जालान्। प्रवर्त्तयत गलान् (?)। ग्राहयत मीनान्।

सर्वाः—(श्रुत्वा) (१) किमिदं ? ति ।

वनराजी—(२) सहीओ ! एदे धीवराण सलिलोपकंठठिदाण मीणग्गहणसंरंभसंलावा ।

कृपासुन्दरी—(सदुःखं) (३) दुक्खविणोदणत्थमागदाए बहुदुक्खुप्पादणं । ता वरं नियघरि ज्येवँ गमिस्सं । (इति गन्तुमारभते ।)

सर्वाः—(अञ्चले धृत्वा) (४) सहि ! चिट्ठ दाव ।

कृपासुन्दरी—(५) एसा ठिद म्हि ।

नगरश्रीः—(६) सहि ! तुह पणपूरणत्थं वसणविणिवारणं करिस्सदि देवु त्ति सुणीयदि ।

कृपासुन्दरी—(७) तदो किं भविस्सदि ? ।

नगरश्रीः—(८) तुह वणराई पियदरा भविस्सदि ।

(नेपथ्ये)

(९) अरे ! धरेध एँदं ति । इमिणा खु पडिवक्खसंबंधिणा भोदव्वं ।

सर्वाः—(१०) सहि वणराईए ! किमिदं ? ।

---

(१) किमिदम् ? इति ।
(२) सख्यः ! एते धीवराणां सलिलोपकण्ठस्थितानां मीनग्रहणसंरम्भसंलापाः ।
(३) दुःखविनोदनार्थमागताया बहुदुःखोत्पादनम् । तद्वरं निजगृहे एव गमिष्यामि ।
(४) सखि ! तिष्ठ तावत् ।
(५) एषा स्थितास्मि ।
(६) सखि ! तव पणपूरणार्थं व्यसनविनिवारणं करिष्यति देव इति श्रूयते ।
(७) ततः किं भविष्यति ? ।
(८) तव वनराजी प्रियतरा भविष्यति ।
(९) अरे ! धरत एतमिति । अनेन खलु प्रतिपक्षसंबन्धिना भवितव्यम् ।
(१०) सखि वनराजिके ! किमिदम् ? ।

---

१ B & C सहिओ. २ B & C दुख° ३ B & C °दुक्खप्पा° ४ B & C जेव. ५ B & C एदं । इ° ६ B & C राइ कि°

वनराजी—(सविमर्शं) (१) सहीओ ! एस पुन्नकेदुमंतिणा विवक्ख-पुरिसगवेसणत्थं निउत्तो निच्चमप्पमत्तो[1] परिब्भमदि धम्मकुंजरो नाम दंडपासिओ[2] । ता न जुत्तमित्थ समवेदाणं अम्ह अवत्थाणं ।

नगरश्रीः—(२) अज्जे देससिरि ! गच्छह तुम्भे सट्ठाणं ।

(देशश्रीर्निष्क्रान्ता ।)

नगरश्रीः—(३) सहि वणराइए ! गच्छम्ह ।

वनराजी—(४) एवं भोदु ।

नगरश्रीः—(५) हला सोमदे ! आदेसेहि पंथाणं ।

सोमदा—(६) इदो इदो एदु भट्टिणीजुयलं ।

(सर्वाः परिक्रामन्ति ।)

नगरश्रीः—(७) कथं पुरदो य्येवँ[3] दंडपासिओ ? ।

(ततः प्रविशति यमनियमनाम्ना पदातिद्वयेनानुगम्यमानो दाण्डपाशिकः पुरुषश्च ।)

पदाती—(८) भँष्टके ! एशे पुलिशे[4] ।

दाँण्डपाशिकः[5]—(९) अरे ! को तुमं ? । देहि ठाणं ।

पुरुषः—(१०) भँष्टके[6] ! हगे देशँतलातो[7] आगतो । ता इमम्मि नगले मे को ठाणं भोदि ? ।

(१) सख्यः ! एष पुण्यकेतुमन्त्रिणा विपक्षपुरुषगवेषणार्थं नियुक्तो नित्यमप्रमत्तः परिभ्रमति धर्मकुञ्जरो नाम दाण्डपाशिकः । तन्न युक्तमत्र समवेतानामस्माकमवस्थानम् ।

(२) आर्ये देशश्रि ! गच्छत यूयं स्वस्थानम् ।

(३) सखि वनराजिके ! गच्छावः । (४) एवं भवतु ।

(५) हला सोमते ! आदिश पन्थानम् ।

(६) इत इत एतु भट्टिनीयुगलम् ।

(७) कथं पुरत एव दाण्डपाशिकः ? ।

(८) भर्त्तः ! एष पुरुषः ।

(९) अरे ! कस्त्वम् ? । देहि स्थानम् ।

(१०) भर्तः ! अहं देशान्तरादागतः । ततोऽस्मिन्नगरे मे कः स्थानं भवति ? ।

१ B & C °मपम° २ B & C °वासिओ. ३ B & C ज्जेव. ४ B & C भट्टके एसे पुलिसे. ५ नाटकेऽस्मिन् ‘ दाण्डपाशिक ’ स्थाने ‘ दण्डपाशिक ’ इति क्वचित् A पुस्तके क्वचित् B & C पुस्तकयो-ते । ६ B & C भट्टके. ७ B & C °संतला°

दाण्डपाशिकः—(१) अरे! कुदो पुण देसंतरादो परावडिदो भवं ?।

पुरुषः—(स्वगतं) (२) किं दाणि भणिस्सं ? । (प्रकाशं) भट्टके ! हगे दूलदिग्यंतलादो आगदे।

दाण्डपाशिकः—(३) अरे ! अन्नमापुट्ठो अन्नं पलवइ । ता एदं गाढं बंधेह ।

पुरुषः—(४) भंट्टके ! भयेण विसुमलिदु म्हि देशंनामं पि ।

(पदाती दृढं बध्नीतः ।)

प्रथमः—(५) अले पुलिशा ! लायकीयशाशणेण भट्टके पलपुलिंशे गवेशंदि । ता जमलायमुहकुहलं पविशिदुकामे भवं ।

द्वितीयः—(६) अले ! केलिशे तुह नामके ? ।

पुरुषः—(७) भट्टके ! हगे शंशांरे । (इत्यर्द्धोक्ते सविषादमात्मगतं) हद्धी महंते पमाते । ता किं कलेमि ? ।

पदाती—(८) अले ! खलिदेहिं य्येव अप्पाणयं मलावेशि ।

पुरुषः—(९) भंट्टके ! हलिणकनामगे हगे ।

दाण्डपाशिकः—(१०) सवयणविरोहेणेव पडिवन्नं तए दुट्ठपुरिसत्तणं।

---

(१) अरे ! कुतः पुनर्देशान्तरात्परापतितो भवान् ? ।

(२) किमिदानीं भणिष्यामि । भर्त्तः ! अहं दूरदिगन्तरादागतः ।

(३) अरे ! अन्यदापृष्टोऽन्यत्प्रलपति । तदेतं गाढं बध्नीत ।

(४) भर्त्तः ! भयेन विस्मृतोऽस्मि देशनामापि।

(५) अरे पुरुषाः ! राजकीयशासनेन भर्त्ता परपुरुषान् गवेषयति । तद्यमराजमुखकुहरं प्रवेष्टुकामो भवान् ।

(६) अरे ! कीदृशं तव नाम ? ।

(७) भर्त्तः ! अहं संसारः । हा धिग् महान् प्रमादः । तत्किं करोमि ? ।

(८) अरे ! स्खलितैरेवात्मानं म्लायसि ।

(९) भर्त्तः ! हरिणकनामकोऽहम् ।

(१०) स्ववचनविरोधेनैव प्रतिपन्नं त्वया दुष्टपुरुषत्वम् ।

---

१ B & C °गते. २ B & C भट्ट° ३ B & C देस° ४ B & C °सास° ५ B & C °लिसे. ६ B & C °सदि. ७ B & C संसा° ८ B & C मालावेसि. ९ A भट्ट°

पुरुषः—(१) भट्टके ! खोभविलसिदमेदं । ता पसीतध[१] पसीतध ।

दाण्डपाशिकः—(२) किं तुह कक्खाए ? ।

पुरुषः—(३) भट्टके ! पच्छयणत्थगिका ।

दाण्डपाशिकः—(४) अरे ! गवेसह पच्छयणं ।

(पदाती गवेषयतः ।)

प्रथमः—(५) अले ! थगिकामज्झे किं पि कालवन्नं निलि[२]खिज्जइ ।

द्वितीयः—(६) जउगोलिया एसा ।

दाण्डपाशिकः—(७) अरे ! अप्फालेह एयं ।

(पदाती तथा कुरुतः ।)

दाण्डपाशिकः—(८) अरे ! को वि लेहो एस । ता पुरदो कडुय एदं गच्छम्ह राउलं ।

पदाती—(९) जं भट्टके आनवेति । (इति पुरुषं गृहीत्वा परिक्रामन्ति ।)

दाण्डपाशिकः—(१०) काओ पुण इमाओ इत्थिकाओ ? ।

पदाती—(११) भट्टके ! साँमिणिं[४] नगरश्शिलिं[५] पि विसुमलिदे भवं ? । अवला विवेयलायनंदणी[६] किवाशुंतली, तच्चलणतामलसमहुयली सोमता च ।

(१) भर्त्तः ! क्षोभविलसितमेतत् । तत्प्रसीदत प्रसीदत ।
(२) किं तव कक्षायाम् ? ।
(३) भर्त्तः ! प्रच्छदनस्थगिका ।
(४) अरे ! गवेषयत प्रच्छदनम् ।
(५) अरे ! स्थगिकामध्ये किमपि कालवर्णं निरीक्ष्यते ।
(६) जतुगोलिका एषा ।
(७) अरे ! आस्फालयतैताम् ।
(८) अरे ! कोऽपि लेख एषः । तत्पुरतः कृत्वा एतं गच्छामो राजकुलम् ।
(९) यद् भर्ता आज्ञापयति ।
(१०) काः पुनरिमाः स्त्रियः ? ।
(११) भर्तः ! स्वामिनीं नगरश्रियमपि विस्मृतवान् भवान् ? । अपरा विवेकराजनन्दिनी कृपासुन्दरी, तच्चरणतामरसमधुकरी सोमता च ।

१ B & C °लसिद° २ A °तध पसीतध. ३ A °लिक्खि° ४ B & C सामिणं. ५ B & C [...]सिलं. ६ B & C नन्दणा.

दाण्डपाशिकः—(ससंभ्रममुपसृत्य) (१) सामिणि ! पणमामि ।

नगरश्रीः—(२) भद्द ! सुहं ते ? ।

दाण्डपाशिकः—(३) देवस्स चालुक्कससिणो पयावेण ।

नगरश्रीः—(४) किमेयं ? ।

दाण्डपाशिकः—(५) एस अरिसंतिओ को वि देवपादमूलं नेदव्वो।

नगरश्रीः—(६) भद्द ! मह वयणेण देवं किं पि विन्नविस्ससि ? ।

दाण्डपाशिकः—(७) किमेवं नियपरियणपरमाणुम्मि जणे आदिसिज्जदि ? ।

(नगरश्रीः कर्णे एवमेव ।)

दाण्डपाशिकः—(८) जं सामिणी आणवेदि ।

नगरश्रीः—(९) ता गच्छदु भवं । अहं पि पियसहिं विवेयनिवपासे मुंत्तुं[1] गच्छामि ।

दाण्डपाशिकः—(१०) एवं भोदु ।

(नगरश्रीः सतृतीया निष्क्रान्ता ।)

पदाती—(११) भट्टके ! एदं पुलदो लायउलं ।

दाण्डपाशिकः—(प्रवेशं नाटयन्) (१२) कधं[2] एस देवो ? ।

---

(१) स्वामिनि ! प्रणमामि ।
(२) भद्र ! सुखं ते ? ।
(३) देवस्य चौलुक्यशशिनः प्रतापेन ।
(४) किमेतत् ? ।
(५) एषोऽरिसत्कः कोऽपि देवपादमूलं नेतव्यः ।
(६) भद्र ! मम वचनेन देवं किमपि विज्ञपयिष्यसि ? ।
(७) किमेवं निजपरिजनपरमाणौ जने आदिश्यते ? ।
(८) यत्स्वामिनी आज्ञापयति ।
(९) तद्गच्छतु भवान् । अहमपि प्रियसखीं विवेकनृपपार्श्वे मोक्तुं गच्छामि ।
(१०) एवं भवतु ।
(११) भर्त्तः ! एतत्पुरतो राजकुलम् ।
(१२) कथमेष देवः ? ।

---

१ B & C मोत्तुं २ B & C कथं.

जस्स सरेहिं गइंदा परूढपक्ख व्व पव्वया जाया ।
इय मुणिय नारयाओ वज्जं सक्केण सच्चवियं ॥ २ ॥

ता उवसप्पामि । (उपसृत्य प्रणम्य च) देव ! एस पुरिसो अज्ज भमंतेण मए लद्धो । एदस्स य पासे एस लेहो ।

राजा—क्वासौ क्वासौ ? ।

(दाण्डपाशिको लेखमुपनयति ।)

राजा—(उद्वेष्ट्य वाचयति ।)

स्वस्ति श्रीजनमनोवृत्तेः श्रीमोहमहाराजो गूर्जर[1]राजराजधान्यां कल्याणमित्रं कलिकन्दलमतिनिबिडमालिङ्ग्य समादिशति । यथा, क्षेमोऽस्माकम् । भवतापि निखिलप्रवृत्तिगर्भिणी निजकौशलकथातिलकिता निरन्तरमस्मन्मनःप्रमोदाय प्रहेया विज्ञप्तिः । तथा विपक्षपरिजनोपजापकर्मणि नित्यमवहितेन स्थातव्यम् । यश्च त्वत्पार्श्वे मिथ्यात्वराशिनामा तापसच्छद्मा रसप्रदश्चिरात्प्रहितोऽस्ति स यथाकालं प्रस्तुतप्रयोजने व्यापारयितव्यः । ये च चत्वारः कोपगर्वच्छद्मलौल्यनामानस्तीक्ष्णास्त्वन्निकटे प्रहिताः सन्ति तेऽपि नचिरादधिकृतकार्ये नियोजयितव्याः । अत्रार्थे भवन्तं त्वरयितुं संसारको नाम लेखहारकः प्रहितोऽस्तीति । (पुनर्विमृश्य च) दाण्डपाशिक ! एनं तावत्कारागारनिगडितं कुरु ।

दाण्डपाशिकः—(तेन सह निष्क्रम्य प्रविश्य च) (१) देव ! अणुट्ठिदं देवस्स सासणं । किंतु किं पि विन्नवणीयमत्थि ।

राजा—विश्रब्धमभिधीयताम् ।

दाण्डपाशिकः—(२) सामिणी नगरसिरी विन्नवेदि–'इमेहिं वसणेहिं निव्वासिदेहिं सुहं भविस्सदि । अवरं च ' जाव एदाइं न निव्वासिदाइं न ताव

यस्य शरैर्गजेन्द्रा प्ररूढपक्षा इव पर्वता जाताः ।
इति ज्ञात्वा नारदाद्वज्रं शक्रेण सत्यापितम् ॥

तदुपसर्पामि । देव ! एष पुरुषोऽद्य भ्रमता मया लब्धः । एतस्य च पार्श्वे एष लेखः ।

(१) देव ! अनुष्ठितं देवस्य शासनम् । किन्तु किमपि विज्ञपनीयमस्ति ।

(२) स्वामिनी नगरश्रीः विज्ञपयति–'एभिर्व्यसनैर्निर्वासितैः सुखं भविष्यति । अपरं च

---

1 B & C °रराजधा°

इत्थ अरिनराणं पवेसो रक्खिदुं सक्कुं' त्ति पियसही किवासुंदरी विचारं विचारं दुब्बला भोदि । ता तीए पणपूरणत्थं पि एदं कादुमरिहदि देवो' ।

राजा—पथ्यमाह युष्मत्स्वामिनी। यत एतेषु निर्वासितेषु लेखार्थः सुकरः।

दाण्डपाशिकः—(१) देव ! लेहत्थं न क्खु अहं जाणामि ।

राजा—शृणु, अत्रैव नगरे गूढवृत्तिः कलिकन्दलनामा शत्रुसुहृदस्ति । तत्पार्श्वे चैको रसदश्चत्वारस्तीक्ष्णाः सन्तीति लेखार्थः ।

दाण्डपाशिकः—(२) देव ! ते च्चिय पढमं किं न घिप्पंति ? ।

राजा—ते हि गूढवृत्तयो दुरुपलक्षाः प्रायेण चर्मचक्षुषाम् । व्यसनानि त्वरिगृह्याण्यपि प्रकटतया भ्राम्यन्ति । ततस्तान्येव तावन्निगृह्यन्ताम् । तन्निग्रहे स्वत एव यास्यन्ति कलिकन्दलप्रभृतयः । तद्गच्छ द्यूतमांसमद्यमारिनामानि चत्वारि व्यसनानि निपुणमन्विष्य सुगृहीतानि विधाय नगरान्निर्वासय । चौर्यपारदारिकत्वे च पूर्वमेव निर्वासिते स्तः । वेश्याव्यसनं तु वराकमुपेक्षणीयम् । न तेन किञ्चिद्गतेन स्थितेन वा ।

दाण्डपाशिकः—(३) जं देवो आणवेदि । (इति निष्क्रम्य पुरोऽवलोक्य च) एदं च दुप्पहं । इत्थ दाव सुलहसंभावणं जूदं । भोदु निरूविस्सं ।

(ततः प्रविशति द्यूतकुमारः ।)

द्यूतकुमारः—(सर्वतो निरूप्य) (४) कधं मए जीवंते कयजुयावदारु व्व दीसदि ? । जं दाणि निवनिवेसिदनवीणजिणायदणपवट्टंतसरसनाडयपिच्छणे ममं अवजाणिय जणो रचदि । भोदु दाव । अध कधं चिरयदि मे पाणवल्लहा असच्चकंदली ? ।

'यावदेतानि न निर्वासितानि न तावदत्रारिनराणां प्रवेशो रक्षितुं शक्यः' इति प्रियसखी कृपासुन्दरी विचारं विचारं दुर्बला भवति । तत्तस्याः पणपूरणार्थमप्येतत्कर्तुमर्हति देवः' ।

(१) देव ! लेखार्थं न खल्वहं जानामि ।

(२) देव ! त एव प्रथमं किं न गृह्यन्ते ? ।

(३) यद्देव आज्ञापयति । एतच्च दुष्प्रभम् । अत्र तावत्सुलभसंभावनं द्यूतम् । भवतु निरूपयिष्ये ।

(४) कथं मयि जीवति कृतयुगावतार इव दृश्यते ? । यदिदानीं नृपनिवेशितनवीनजिनायतनप्रवर्त्तमानसरसनाटकप्रेक्षणे मामवगणय्य जनो रज्यते । भवतु तावत् । अथ कथं चिरयति मे प्राणवल्लभाऽसत्यकन्दली ? ।

---

१ B & C सक्को. २ B & C एवं. ३ C एत्थ.

(प्रविश्यासत्यकन्दली ।)

असत्यकन्दली—(अग्रतो विलोक्य) (१) इदो य्येव अभिवट्टदि अज्जउत्तो ।

द्यूतकुमारः—(२) इदो अवसेप्पदु पाणवल्लहा ।

असत्यकन्दली—(उपसृत्य) (३) जयदु जयदु अज्जउत्तो ।

द्यूतकुमारः—(४) सुंदरि ! किमुव्विग्गा विय दीससि ? ।

असत्यकन्दली—(५) अज्जउत्त ! कधं थोवदिणेहिं नगरमिदमन्नारिसं संवुत्तं ? । न को वि तुमं मं वा गणेदि ।

द्यूतकुमारः—(६) पिए ! मुक्करज्जधुरो कुधराहिवो संपदि वट्टदि । तेणेवं चत्तमज्जाओ उज्झियचिरमग्गो जणो अम्हारिसेसु विरत्तो । जं च मं तुमं च न बहु मन्नदि तं तस्स ज्जेय च्छेयओ, किमम्ह ? । तहाहि, पिच्छ पिच्छ,

हरिहरपुराणपुरिसा अणेयतवचरणसोसियतणूण ।
पुरिसाण रज्जदाणे हुंति खमा वा न वा हुंति ॥ ३ ॥
जो सेवइ एगमणो मणुओ मं चेव देवअब्भहियं ।
सो अणुहवइ इह चिय अछत्तसिंहासणं रज्जं ॥ ४ ॥

---

(१) इत एवाभिवर्त्तते आर्यपुत्रः ।
(२) इतोऽवसर्पतु प्राणवल्लभा ।
(३) जयतु जयतु आर्यपुत्रः ।
(४) सुन्दरि ! किमुद्विग्ना इव दृश्यसे ? ।
(५) आर्यपुत्र ! कथं स्तोकदिनैर्नगरमिदमन्यादृशं संवृत्तम् ? । न कोऽपि त्वां मां वा गणयति ।
(६) प्रिये ! मुक्तराज्यधुरः कुधराधिपः संप्रति वर्त्तते । तेनैवं त्यक्तमर्याद उज्झितचिरमार्गो जनोऽस्मादृशेषु विरक्तः । यच्च मां त्वां च न बहु मन्यते तत्तस्यैव च्छेदः, किमस्माकम् ? । तथाहि, पश्य पश्य,

हरिहरपुराणपुरुषा अनेकतपश्चरणशोषिततनूनाम् ।
पुरुषाणां राज्यदाने भवन्ति क्षमा वा न वा भवन्ति ॥
यः सेवते एकमना मानवो मामेव देवाभ्यधिकम् ।
सोऽनुभवति इहैवाछत्रसिंहासनं राज्यम् ॥

---

१ C ज्जेव. २ C उवस° ३ C होंति.

असत्यकन्दली—(१) अज्जउत्त ! अध कधं[1] पुण पुरादणदसं पाविस्सामो ?।

द्यूतकुमारः—(२) सुयणु ! पत्तपुव्वावत्थं ज्जेव अत्ताणयं निहालेसु ।

असत्यकन्दली—(३) कधं विय ? ।

द्यूतकुमारः—(४) विवक्खविजयादो ।

असत्यकन्दली—(५) अज्जउत्त ! को उण विवक्खो ? ।

द्यूतकुमारः—(६) सुमुहि ! राइणो भविस्ससखुरओ विवेयचंदो नाम । सो खु मूलं सव्वाणत्थाणं ।

असत्यकन्दली—(७) अध कधं स जेदव्वो ? ।

द्यूतकुमारः—(८) अत्थि इत्थ सामिणो मोहनरवइणो परममित्तं कलिकंदलो । तस्स साहिज्जेण सुजेओ विवक्खवग्गो ।

दाण्डपाशिकः—(नखच्छोटिकां दत्त्वा स्वगतं) (९) संवददि लेहत्थेण एयस्स भासिदं ।

द्यूतकुमारः—(सोत्साहं) (१०) वल्लहे ! अहवा अहमेव एगो पहवामि पडिवक्खविजये ।

---

(१) आर्यपुत्र ! अथ कथं पुनः पुरातनदशां प्राप्स्यावः ? ।

(२) सुतनु ! प्राप्तपूर्वावस्थमेवात्मानं निभालय ।

(३) कथमिव ? ।

(४) विपक्षविजयात् ।

(५) आर्यपुत्र ! कः पुनर्विपक्ष ? ।

(६) सुमुखि ! राज्ञो भविष्यच्छ्वशुरको विवेकचन्द्रो नाम । स खलु मूलं सर्वानर्थानाम् ।

(७) अथ कथं स जेतव्यः ? ।

(८) अस्त्यत्र स्वामिनो मोहनरपतेः परममित्रं कलिकन्दलः । तस्य साहाय्येन सुजेयो विपक्षवर्गः ।

(९) संवदति लेखार्थेनैतस्य भाषितम् ।

(१०) वल्लभे ! अथवाऽहमेवैकः प्रभवामि प्रतिपक्षविजये ।

---

१ B & C कथं.

असत्यकन्दली—(१) कं[1]धमिव ? ।

द्यूतकुमारः—(२) जदो अत्थि म[2]हं अणेगाओ सत्तीओ । संति अणेगाइं रूवाइं ।

असत्यकन्दली—(३) अज्जउत्त ! महल्लं मह कोदुहल्लं तेसिं दंसणे ।

द्यूतकुमारः—(४) ता एहि दंसेमि । (किञ्चित्परिक्रम्य)

एयं अंधियनामं रूपं पसयच्छि ! चच्चरे पि[3]च्छ ।
जं सेविज्जइ निच्चं कयकोवीणेहिँ निवईहिं ॥ ५ ॥
अवरं मयच्छि ! पि[4]च्छसु मह रूवं इ[5]त्थ नालयं नाम ।
उवणीयकणयकोडीहिँ सेवियं वणियपुत्तेहिं ॥ ६ ॥
तइयं नियसु नियंबिणि ! इणमो चउरंगयं ति मह रूवं ।
जत्थ [6]अरिकन्नकडुया खडक्खडा [7]अमयसारिच्छा ॥ ७ ॥
दच्छे ! इमं नियच्छसु चउत्थमक्[8]खाभिहाणयं रूवं ।
कुरुतणया भूमिवई जस्स पसाएण संजाया ॥ ८ ॥
पंचमयं मह रूवं वराडनामं इमं निहालेसु ।
सेवाइ जस्स डिंभा गयं पि कालं न याणंति ॥ ९ ॥

---

(१) कथमिव ? ।
(२) यतो सन्ति ममानेकाः शक्तयः । सन्त्यनेकानि रूपाणि ।
(३) आर्यपुत्र ! महन्मम कुतूहलं तेषां दर्शने ।
(४) तदेहि दर्शयामि ।

एतदन्धिकानाम रूपं मृगाक्षि ! चत्वरे पश्य ।
यत्सेव्यते नित्यं कृतकोपीनैर्नृपतिभिः ॥
अपरं मृगाक्षि ! पश्य मम रूपमत्र नाटकं नाम ।
उपनीतकनकोटिभिः सेवितं वणिक्पुत्रैः ॥
तृतीयं पश्य नितम्बिनि ! इदानीं चतुरङ्गकमिति मे रूपम् ।
यत्रारिकर्णकटुकाः खट्खटा अमृतसदृशाः ॥
दक्षे ! इदं पश्य चतुर्थमक्षाभिधानकं रूपम् ।
कुरुतनया भूमिपतयो यस्य प्रसादेन संजाताः ॥
पञ्चमकं मम रूपं वराटनामेदं निभालय ।
सेवया यस्य डिम्भा गतमपि कालं न जानन्ति ॥

---

१ B & C कथमिव. २ B मह. ३ B & C पेच्छ. ४ B & C पेच्छ° ५ B & C एत्थ. ६ A करिक० ७ C अस° ८ C °क्खाहि

दाण्डपाशिकः—(१) अहो ! दुरप्पणो वग्गियमच्चग्गलं ।

(नेपथ्ये कलकलः ।)

(असत्यकन्दली सत्रासं द्यूतमालिङ्गति ।)

द्यूतकुमारः—(स्वगतं)

(२) कलयल ! तुह उवयारे पचुवयारं न सक्किहं काउं ।
जेण पियाइ अयंक्कियमविरलमालिंगणं दिन्नं ॥ १० ॥

(प्रकाशं) कायरे ! मा भयं करेसु ।

असत्यकन्दली—(३) अज्जउत्त ! पडिवक्खजणसंम्मद्देण पुणो वि एदिणा भोदव्वं, ता एहि अन्नदो वच्चम्ह ।

द्यूतकुमारः—(४) किमट्ठाणे ज्जेव अधीरा भोसि ? । णं मह परिवार-जूयारचक्कस्स परुप्परं असलीलभणिदिलीलाइदनिब्भरा कलहकेली ।

असत्यकन्दली—(अक्षिणी उन्मील्य विलोक्य च) (५) अज्जउत्त ! अहो ! तुह परिवारस्स आयारसुंदरत्तणं । तहाहि—

के वि कट्टियचरणकरकन्न,
कि वि कड्ढियनयणजुय,
के वि नक्कअहेरिहि विवज्जिय ।

---

(१) अहो ! दुरात्मनो वल्गितमत्यर्गलम् ।

(२) कलकल ! तवोपकारे प्रत्युपकारं न शक्ष्यामि कर्तुम् ।
येन प्रिययाऽतर्कितमविरलमालिङ्गनं दत्तम् ॥

कातरे ! मा भयं कुरु ।

(३) आर्यपुत्र ! प्रतिपक्षजनसम्मर्देन पुनरप्येतेन भवितव्यं, तदेह्यन्यतो व्रजावः ।

(४) किमस्थाने एवाधीरा भवसि ? । ननु मम परिवारद्यूतकारचक्रस्य परस्परमश्लीलभणितिलीलायितनिर्भरा कलहकेली ।

(५) आर्यपुत्र ! अहो ! तव परिवारस्याकारसुन्दरत्वम् । तथाहि—
केऽपि कर्त्तितचरणकरकर्णाः,
केऽपि कृष्टनयनयुगाः,
केऽपि नक्राधरैर्विवर्जिताः ।

---

१ C अत° २ C काद° ३ C °समद्दे° ४ A हरिहिं.

कि वि लूणसव्वावयव,
के वि जेव खवणय अलज्जिय ॥ ११ ॥

घूतकुमारः—(१) पाणप्पिए ! मा एवं भण । जदो पुरिसाण परक्कमो अग्घदि न रूवं । अवरं च एयाणं न मुणसि कुलसुद्धिं तेणेदं जंपसि ।

असत्यकन्दली—(सोत्प्रासं) (२) अज्जउत्त ! आयारसरिसेण भोदव्वं कुलेण ।

घूतकुमारः—(कर्णौ पिधाय) (३) पिए ! सुणेसु इमेसिमभिजणे ।

असत्यकन्दली—(४) एसा सावहाण म्हि ।

घूतकुमारः—(अङ्गुल्या निर्दिशन्) (५) एस मेवाडनिवदिकुमारो । एस सुरट्ठाहिवसहोदरो । एस चंदावदीपदी । एस नड्डूलनरिंदनत्तुओ । एस गुंदह-रायभायनंदणो । एस धाराहिरायभागिणिज्जो । एस सायंभरीभूवालमादुलगो । एस कुंकणाहिववेमाउगो(ओ) । एस कच्छभूमीभुयंगसालओ । एस मरुमंड-लाखंडलदुहिदानंदणो । एस पुण चालुक्कनिवजणयभादुगो ।

असत्यकन्दली—(६) हीमाणहे ! एरिसेण अज्जउत्तपरियरेण कयत्थ म्हि ।

केऽपि लूनसर्वावयवाः,
केऽप्येव क्षपणका अलज्जिताः ॥

(१) प्राणप्रिये ! मैवं भण । यतः पुरुषाणां पराक्रमोऽर्घति न रूपम् । अपरं च, एतेषां न जानासि कुलशुद्धिं तेनेदं कथयसि ।

(२) आर्यपुत्र ! आकारसदृशेन भवितव्यं कुलेन ।

(३) प्रिये ! शृण्वेषामभिजनान् ।

(४) एषा सावधानास्मि ।

(५) एष मेदपाटनृपतिकुमारः । एष सौराष्ट्राधिपसहोदरः । एष चन्द्रावतीपतिः । एष नड्डुल-नरेन्द्रनप्तृकः । एष गोद्रहराजभ्रातृनन्दनः । एष धाराधिराजभागिनेयः । एष शाकम्भरीभूपालमातु-लकः । एष कुङ्कणाधिपविमातृजः । एष कच्छभूमीभुजङ्गश्यालकः । एष मरुमण्डलाखण्डलदुहितृन-न्दनः । एष पुनश्चौलुक्यनृपजनकभ्रातृकः ।

(६) आश्चर्यं ! ईदृशेनार्यपुत्रपरिकरेण कृतार्थास्मि ।

---

१ C °णपिए, २ C एदाणं. ३ C मेवाड. ४ C नरेंद° ५ C सुरट्ट° ६ C पाल°

द्यूतकुमारः—(१) मोहकुलनहयलचंदकले ! किमेदाणमेक्कं[1] वन्नीयदि ? । तहाहि—

जइ मरइ घरे जणणी जणओ वा पणइणी व पुत्तो वा ।
तहवि इमे मह सेवं न मुयंति करंति य न सोयं ॥ १२ ॥

अवरं च, चंदमुहि ! निरुवमा इमेसिं सामिभत्ती । जदो—

मह सेवाविसयपरम्मुहम्मि देवम्मि देवराए वि ।
जायइ अहो ! इमेसिं नीसंकं रंकसंकप्पो ॥ १३ ॥

असत्यकन्दली—(२) अज्जउत्त ! जदि एवं ता कुदो विलंबीयदि ? । किं न तादपादसमादिट्ठमणुट्ठीयदि ? ।

द्यूतकुमारः—(३) पिए[2] ! मित्तवग्गं पडिवालयंतु म्हि ।

असत्यकन्दली—(४) अज्जउत्त ! तुह मित्तवग्गं नादुमिच्छामि ।

द्यूतकुमारः—(५) सुनयणे ! एगो दाव तादमोहदासीए हिंसाए तणओ जंगलँओ[3] नाम । अवरो य तादमोहदंडपासियपमाददारओ मज्जसेहरँओ[4] नाम ।

(ततः प्रविशति जाङ्गलकः ।)

जाङ्गलकः—(आत्मानं निर्वर्ण्य)

---

(१) मोहकुलनभस्तलचन्द्रकले ! किमेतेषामेकं वर्ण्यते ? । तथाहि—

यदि म्रियते गृहे जननी जनको वा प्रणयिनी वा पुत्रो वा ।
तथापीमे मम सेवां न मुञ्चन्ति कुर्वन्ति च न शोकम् ॥

अपरं च, चन्द्रमुखि ! निरुपमैदेषां स्वामिभक्तिः । यतः—

मम सेवाविषयपराङ्मुखे देवे देवराजेऽपि ।
जायतेऽहो ! एषां निश्शङ्कं रङ्कसंकल्पः ॥

(२) आर्यपुत्र ! यद्येवं तदा कुतो विलम्ब्यते ? । किं न तातपादसमादिष्टमनुष्ठीयते ? ।

(३) प्रिये ! मित्रवर्गं प्रतिपालयन्नस्मि ।

(४) आर्यपुत्र ! तव मित्रवर्गं ज्ञातुमिच्छामि ।

(५) सुनयने ! एकस्तावत्तातमोहदास्या हिंसायास्तनयो जाङ्गलको नाम । अपरश्च तातमोहदाण्डपाशिकप्रमाददारको मद्यशेखरको नाम ।

---

१ A मिक्कं व वन्नी°. २ A & C प्रिये. ३ C °गलो. ४ C हरो.

(१) अट्ठ (ट्ठि) दलरइयहारो विलित्तओ रुहिरकुंकुमरसेण ।
सोहदि सविसेसं विय जंगलओ लद्धमाहप्पो ॥ १४ ॥

(पुनः सगर्वं) अहो ! मह महग्घदा लोयम्मि । जदो—
मज्झ कए निवतणया दिवाणिसं गहियचंडकोदंडा ।
दूरुज्झियरज्जसिरीभोगा खिज्जंति रन्नेसु ॥ १५ ॥

अवि य—
हम्मंति मत्तकरिणो जं किर सुहडेहिं समरसम्महे ।
तं मह सेवासंभवपभावलवमित्तमित्थ जए ॥ १६ ॥

(आकाशे लक्ष्यं बद्ध्वा)

भो भो देवा ! मह पाडिसिद्धिमिच्छंतया न किं खीणा ? ।
जो हं नियभत्ताणं तोलिय अत्ताणयं देमि ॥ १७ ॥

(सविमर्शं) अज्ज मज्जसेहरदुदीओ अहं पियवयंसजूएण सह किं पि मंतरहस्सं कादुकामु म्हि । अध कधं चिरयदि मज्जसेहरो ? ।

(ततः प्रविशति मद्यशेखरः ।)

मद्यशेखरः—(सहासं)

---

(१) अष्ट (अस्थि) दलरचितहारो विलिप्तो रुधिरकुङ्कुमरसेन ।
शोभते सविशेषमिव जाङ्गलको लब्धमाहात्म्यः ॥

अहो ! मम महर्घ्यता लाके । यतः—
मम कृते नृपतनया दिवानिशं गृहीतचण्डकोदण्डाः ।
दूरोज्झितराज्यश्रीभोगाः खिद्यन्त्यरण्येषु ॥

अपि च—
हन्यन्ते मत्तकरिणो यत्किल सुभटैः समरसम्मर्दे ।
तन्मम सेवासंभवप्रभावलवमात्रमत्र जगति ॥
भो भो देवाः ! मम प्रतिषिद्धिमिच्छन्तो न किं क्षीणाः ? ।
योऽहं निजभक्तानां तोलयित्वात्मानं ददामि ॥

अद्य मद्यशेखरद्वितीयोऽहं प्रियवयस्यद्यूतेन सह किमपि मन्त्ररहस्यं कर्तुकामोऽस्मि । अथ कथं चिरयति मद्यशेखरः ? ।

---

१ C °पताव°

(१) जो कुणइ मज्झ सेवं मणुओ सो नाम सव्वलोयम्मि ।
कुणइ सुराहिवलीलं हीणं अप्पाउ गणइ भूवालं ॥ १८ ॥

(पुरोऽवलोक्य) कधं मं य्येवं पडिवालेदि पियवयस्सो जंगलओ ? । (उपसृत्य) पियवयंस जंगलय ! एस आगदुं म्हि ।

जाङ्गलकः—(सहर्षं) (२) कधं कज्जवक्खेवेण पासपत्तो वि न मुणिदो पियवयंसो ? । ता एहि वच्चम्ह । (इति परिक्रामतः ।)

द्यूतकुमारः—(विलोक्य) (३) पिए ! पिच्छ पिच्छ संपत्तं य्येव मे पियवयंसजुयलं । (इत्यभ्युत्तिष्ठति ।)

इतरौ—(४) पियमित्त ! अलं संभमेण ।

द्यूतकुमारः—(तावुपवेश्योपविश्य च) (५) भो पियवयंस जङ्गलय ! कीस रुद्दाविरहिदो सि इहं आगदो ? ।

जाङ्गलकः—(६) मित्त ! गुज्जरनरिंदअग्गमहिसीए देवीए रज्जसिरीए सा खु दासी रुद्दा । ता दाणि न जाणे कुदो वि ममं अभिसरंती सा देवीए पडिसिद्धा ? ।

द्यूतकुमारः—(७) हद्धी ! पियकलत्तविउत्तो दाणि जादो सि ।

जाङ्गलकः—(८) अध किं ? ।

---

(१) यः करोति मम सेवां मनुजः स नाम सर्वलोके ।
करोति सुराधिपलीलां हीनमात्मनो गणयति भूपालम् ॥

कथं मामेव प्रतिपालयति प्रियवस्यो जाङ्गलकः ? । प्रियवस्य जाङ्गलक ! एष आगतोऽस्मि ।

(२) कथं कार्याविक्षेपेण पार्श्वप्राप्तोऽपि न ज्ञातः प्रियवयस्यः ? । तदेहि व्रजावः ।

(३) प्रिये ! पश्य पश्य संप्राप्तमेव मे प्रियवयस्ययुगलम् ।

(४) प्रियमित्र ! अलं संभ्रमेण ।

(५) भोः प्रियवयस्य जाङ्गलक ! कस्माद्रौद्रताविरहितोऽसीहागतः ? ।

(६) मित्र ! गूर्जरनरेन्द्राग्रमहीष्या देव्या राज्यश्रियः सा खलु दासी रौद्रता । तदिदानीं न जाने कुतोऽपि मामभिसरन्ती सा देव्या प्रतिषिद्धा ? ।

(७) हा धिक् ! प्रियकलत्रवियुक्त इदानीं जातोऽसि ।

(८) अथ किम् ? ।

---

१ C मच्चुलो॰ २ C ॰पालं. ३ C ज्जेव. B & C ॰गदो म्हि. ५ B & C कधं.

द्यूतकुमारः—(१) भो मज्जसेहर ! तुमं पि अज्ज उम्मत्तदाए विप्पउत्तो दीससि ।

मद्यशेखरः—(२) वयंस ! अज्ज अहं मादाए कल्लवालहट्टिगाए रहसि भणिदो । जधा, पुत्त ! पुरा वि तुमं पदि अदिविरुद्धो आसि राएसी । इदाणिं पुण तुमं उम्मूलिदुकामु त्ति सुणीयदि । ता अप्पमत्तेण भमिदव्वं, कलत्तं च इह य्येव चिट्ठदु त्ति ।

असत्यकन्दली—(३) अज्जउत्त ! इमं सुणिय वेवदि मे हिदयं । मा नाम मंहं पि एवं होही ।

द्यूतकुमारः—(४) खत्तिए ! कादरा सि । न क्खु अहं पि मज्जसेहरु व्व कलत्तगोवणेण अप्पाणयं रक्खिस्सं । न वि य ममावि कलत्तं परायत्तं । ता अलं विसाएण ।

(नेपथ्ये)

भो भोः पौराः ! महाराजश्रीकुमारपालदेवो युष्मानाज्ञापयति । यज्जिनरथयात्रामहोत्सवो भविष्यति । ततः—

पौराः ! कुर्युर्विपणिपदवीमस्तपांशुं पयोभि-
र्मुक्ताहारै रुचिरवसनैर्हट्टशोभां विदध्युः ।
स्थाने स्थाने कनककलशान् स्थापयेयुर्भवन्तः
पण्यस्त्रीभिः सुरगृहसखान् मञ्चकान् भूषयेयुः ॥ १९ ॥

सर्वे—(सभयं कर्णं दत्त्वा) (५) हा ! हद म्ह हद म्ह । अदो वरं विरुद्धमम्हाण इत्थ अवत्थाणं । ता अन्नदो वच्चम्ह । (इत्युत्थाय परिक्रामन्ति ।)

---

(१) भो मद्यशेखर ! त्वमप्यद्योन्मत्ततया विप्रयुक्तो दृश्यसे ।

(२) वयस्य ! अद्याहं मात्रा कल्पपालहट्टिकायां रहसि भणितः । यथा, पुत्र ! पुरापि त्वां प्रत्यतिविरुद्ध आसीद् राजर्षिः । इदानीं पुनस्त्वामुन्मूलयितुकाम इति श्रूयते । तदप्रमत्तेन भ्रमितव्यं, कलत्रं चेहैव तिष्ठत्विति ।

(३) आर्यपुत्र ! इदं श्रुत्वा वेपति मे हृदयम् । मा नाम ममाप्येवं भविष्यति ।

(४) क्षत्रिये ! कातरासि । न खल्वहमपि मद्यशेखर इव कलत्रगोपनेनात्मानं रक्षिष्यामि । नापि च ममापि कलत्रं परायत्तम् । तदलं विषादेन ।

(५) हा ! हताः स्मः हताः स्मः । अतः परं विरुद्धमस्माकमत्रावस्थानम् । तदन्यतो व्रजामः ।

---

१ B & C जेव. २ B & C मं पि. ३ B & C खु. ४ B & C पांसुं.

दाण्डपाशिकः—(१) अहं पि सह गच्छिस्सं । जदो न एदेसिं मारी समवेदि । तस्संगमे संगहिस्सं । (इति गूढं सह सञ्चरति ।)

असत्यकन्दली—(२) अज्जउत्त ! एदं गयणग्गलग्गसिहरं जं दूरादो दीसदि देउलं इत्थं विसाले रमीयदि ।

द्यूतकुमारः—(३) पाणवल्लहे ! अइउज्जुया सि । मा पुणो वि एवं मंतिज्जसु । जदो एदं रायेणा काराविदं तिहुयणविहारु त्ति देउलं । अम्हारिसाण इहं खु नामग्गहणं पि विरुद्धं दूरे पवेसाइ । ता मोणेण अवक्कमम्ह ।

जाङ्गलकमद्यशेखरौ—(४) साहु मंतिदं वयस्सेण ।

असत्यकन्दली—(५) चिट्ठदु एदं । अन्नाइं वि बहूणि रमणिज्जाणि देउलानि दीसंति ।

द्यूतकुमारः—(६) पिए ! एदांइ वि निवदिदेउलाणि ।

असत्यकन्दली—(७) अज्जउत्त ! कीस एदस्स राएसिणो विहारकारावणवसणमदिवुड्ढिं गदं ? ।

द्यूतकुमारः—(८) पिए ! न याणामि ।

मद्यशेखरः—(९) एस जंगलओ जाणदि ।

---

(१) अहमपि सह गमिष्यामि । यतो नैतेषां मारी समवैति । तत्संगमे संग्रहीष्यामि ।

(२) आर्यपुत्र ! एतद्गगनाग्रलग्नशिखरं यद्दूराद् दृश्यते देवकुलमत्र विशाले रम्यते ।

(३) प्राणवल्लभे ! अतिऋजुकाऽसि । मा पुनरप्येवं मन्त्रयस्व । यत एतद्राज्ञा कारितं त्रिभुवनविहार इति देवकुलम् । अस्मादृशानामिह खलु नामग्रहणमपि विरुद्धं दूरे प्रवेशादि । तन्मौनेनावक्रमामः ।

(४) साधु मन्त्रितं वयस्येन ।

(५) तिष्ठत्वेतत् । अन्यान्यपि बहूनि रमणीयानि देवकुलानि दृश्यन्ते ।

(६) प्रिये ! एतान्यपि नृपतिदेवकुलानि ।

(७) आर्यपुत्र ! कस्मादेतस्य राजर्षेर्विहारकारणव्यसनमतिवृद्धिं गतम् ? ।

(८) प्रिये ! न जानामि ।

(९) एष जाङ्गलको जानाति ।

---

१ B & C एत्थ. २ B & C राइणा. ३ B & C °हारो. ४ B & C °न्नाइं वि. ५ B & C °दाइं वि.

द्यूतकुमारः—(१) वयंस जंगलय ! कहेसु ।

(जाङ्गलकः सदुःखमधोमुखो भवति ।)

असत्यकन्दली—(२) हंहो ! जंगलय ! किमन्नं किं पि दुहनिवेयणठाणमत्थि ? ।

जाङ्गलकः—(निःश्वस्य) (३) असच्चकंदलि ! दिव्वं पुच्छ । (इति बाष्पं मुञ्चति ।)

द्यूतकुमारः—(४) भो मज्जसेहर ! तुमं कहेसु ।

मद्यशेखरः—(५) एस किल पुरा रायस्स अइवल्लहो आसि ।

असत्यकन्दली—(६) जयपयडमेदं ।

मद्यशेखरः—(७) अदो ज्येवं एदस्सिं रुद्ददा संघडिदा ।

असत्यकन्दली—(८) उववन्नमेदं ।

मद्यशेखरः—(९) संपैडि पुण पासंडविप्पयारणाहिं बाढं विरत्तो राया इमम्मि ।

द्यूतकुमारः—(१०) विघडणशीलाणि रायपिम्माणि ।

---

(१) वयस्य जाङ्गलक ! कथय ।
(२) हंहो ! जाङ्गलक ! किमन्यत्किमपि दुःखनिवेदनस्थानमस्ति ? ।
(३) असत्यकन्दलि ! दैवं पृच्छ ।
(४) भो मद्यशेखर ! त्वं कथय ।
(५) एष किल पुरा राज्ञोऽतिवल्लभ आसीत् ।
(६) जगत्प्रकटमेतत् ।
(७) अत एवैतस्मिन् रौद्रता सङ्घटिता ।
(८) उपपन्नमेतत् ।
(९) संप्रति पुनः पाखण्डविप्रतारणाभिर्बाढं विरक्तो राजैतस्मिन् ।
(१०) विघटनशीलानि राजप्रेमाणि ।

---

१ B & C कयेड. २ B & C °ज्जेव. ३ A एदस्सि. ४ B & C संपदि. ५ B & C शीलाई.

मद्यशेखरः—(१) इत्तिकेण न पज्जत्तं पिच्छ जं जादं । राएसिणो किल वयणभवणखंभभूदा अचंतनिम्मलायारा रज्जरसासायमूलहेदुणो अदीवपिया बत्तीसं दियवरा अत्थि । तेसिं जंगलओ अदिप्पिओ ।

द्यूतकुमारः—(२) तदो तदो ? ।

मद्यशेखरः—(३) इमेहिं दिएहिं जंगलयचंडालसंसग्गी कदा कारिदा य इदि कडुय ते नियपुरादो निव्वासेदुमारद्धा रन्ना ।

असत्यकन्दली—(४) एवं नाम वि संभवदि, दाणि वेरीभवन्ति सोहिदाणि ।

मद्यशेखरः—(५) तदो पगिदीहिं वारिदो राया । देव ! न एवं जुज्जदि । जदो तुह पसादचिंतगु त्ति एदेहिं जंगलओ पुरक्कदो । अदो एदे तुज्झं समानदोस त्ति न क्खु निव्वासणमरिहन्ति । किंतु गुरुसमीवे पायच्छित्तपडिवत्ती कीरदु त्ति । तदो राया गदो गुरुपासे । तेहिं वि कहिदं पायच्छित्तं । जित्तिया दिया इत्तिए जिणविहारे कारावसु त्ति । अदो एदे विहारा रन्ना काराविद त्ति ।

असत्यकन्दली—(६) अध कहिं दाणि गडुय रमिदव्वं ? ।

---

(१) एतावता न पर्याप्तं पश्य यज्जातम् । राजर्षेः किल वदन (वचन) भवनस्तम्भभूता अत्यन्तनिर्मलाचारा (कारा) राज्यरसास्वादमूलहेतवोऽतीवप्रिया द्वात्रिंशद्विजवराः (दन्ताः) सन्ति । तेषां जाङ्गलकोऽतिप्रियः ।

(२) ततस्ततः ? ।

(३) एभिर्द्विजैर्जाङ्गलकचाण्डालसंसर्गी कृता कारिता चेति कृत्वा ते निजपुरान्निर्वासयितुमारब्धा राज्ञा ।

(४) एवं नामापि संभवति, इदानीं वैरीभवन्ति सुहृदः ।

(५) ततः प्रकृतिभिर्वारितो राजा । देव ! नैवं युज्यते । यतस्तव प्रसादचिन्तक इत्येतैर्जाङ्गलकः पुरस्कृतः । अत एते युष्माकं समानदोषा इति न खलु निर्वासनमर्हन्ति । किन्तु गुरुसमीपे प्रायश्चित्तप्रतिपत्तिः क्रियतामिति । ततो राजा गतो गुरुपार्श्वे । तैरपि कथितं प्रायश्चित्तम् । यावन्तो द्विजा एतावतो जिनविहारान् कारयेति । अत एते विहारा राज्ञा कारिता इति ।

(६) अथ कुत्रेदानीं गत्वा रन्तव्यम् ? ।

---

१ B & C °पेच्छ. २ B & C °क्खंभभू° ३ B & C संवदि. ४ B & C तुम्भ. ५ B & C खु. ६ B & C कीरदो. ७ B & C एत्तिए. ८ B & C कारावेह.

द्यूतकुमारः—(१) मित्ता ! कहेह कहिं दाणि गडुय रमिदव्वं ?।

उभौ—(विमृश्य) (२) जत्थ अम्बा मारी समादिसंदि।

द्यूतकुमारः—(३) कहिं पुण अंबाए भोदव्वं ?।

जाङ्गलकः—(४) अेत्थ पएसे अत्थि अंबाए पियसही सूणा नाम। ता तीए पासे संभवदि।

(ततः प्रविशति मारिः शूना च।)

शूना—(५) सहि ! तुह पसातेन हगे अशलिशं ईशलत्तं धलेमि। पिच्छ आलन्नगे जीवनियले। नियच्छ [६]शेलिहछगलकोडीओ। नियसु वहंती-ओ लुहिलसलियाओ। उअ शूकलअट्ठिगिलिनो।

मारिः—(६) पियसहि ! निलंतलायमेलिशं भोदु।

शूना—(७) तुमाए सहीए चिलं जीवंतीए।

मारिः—(दक्षिणाक्षिस्पन्दनमभिनीय सोद्वेगं) (८) सखि ! कुतोऽपि फुलंति वामेदलं नयनकं।

शूना—(९) पतिहतममंगलं।

मारिः—(सावष्टम्भं) (५) आ कधं ममं मालिं पि दुनिमित्तकेलका भउक्कंपका पलिलंभंति ?। (साटोपं परिक्रामति।)

---

(१) मित्रे ! कथयतं कुत्रेदानीं गत्वा रन्तव्यम् ?।

(२) यत्राम्बा मारिः समादिशति।

(३) कुत्र पुनरम्बया भवितव्यम् ?।

(४) अत्र प्रदेशेऽस्त्यम्बायाः प्रियसखी शूना नाम। तत्तस्याः पार्श्वे संभवति।

(५) सखि ! तव प्रसादेनाहमशदृशमीश्वरत्वं धरामि। पश्यारण्यकान् जीवनिकरान्। पश्य सैरिभच्छागकोटीः। पश्य वहन्तीरुधिरसरितः। पश्य शूकरास्थिगिरीन्।

(६) प्रियसखि ! निरन्तरायमीदृशं भवतु।

(७) त्वया सख्या चिरं जीवन्त्या।

(८) सखि ! कुतोऽपि स्फुरति वामेतरं नयनकम्।

(९) प्रतिहतममङ्गलम्।

(१०) आः कथं मां मारिमपि दुर्निमित्तसम्बन्धिनो भयोत्कम्पकाः परिरम्भन्ते ?।

---

१ B & C °शदि. २ B & C एत्थ. ३ B & C सूना. ४ B & C सूना. ५ C पेच्छ. ६ C सेलि° ७ C °लिसं ८ A धीए ९ A °हति.

जाङ्गलकः—(सानन्दं) (१) कधं पुरदो य्येवं अंवा वट्टदि ? ।

सर्वे—(उपसृत्य) (२) अंब ! पणमामि (मो) ।

मारिः—(अनालोकितकेन स्वगतं) (३) एतेन नयनफुलनेन वेपति मे हितपकं ।

इतरे—(४) अंब ! पणमामो ।

शूना—(५) सखि ! एते इतो पनमंति ।

मारिः—(विलोक्य) (६) पुत्तका ! चिलं जीवंध । अध कुशलं तुम्ह सलीलस्स ? ।

सर्वे—(७) अम्बाए पसादेण ।

मारिः—(८) पुत्तका ! कधमुव्विग्गा विय तीसथ ? ।

सर्वे—(९) अम्ब ! अध किं ? ।

मारिः—(१०) उव्वेगकालनं नादुमिच्छामि ।

द्यूतकुमारः—(११) अम्ब ! सव्वेसिमत्थि उव्वेगो । विसेसओ जंगलकस्स ।

---

(१) कथं पुरत एवाम्बा वर्तते ? ।
(२) अम्ब ! प्रणमामः ।
(३) एतेन नयनस्फुरणेन वेपति मे हृदयकम् ।
(४) अम्ब ! प्रणमामः ।
(५) सखि ! एत इतः प्रणमन्ति ।
(६) पुत्रकाः ! चिरं जीवत । अथ कुशलं युष्माकं शरीरस्य ? ।
(७) अम्बायाः प्रसादेन ।
(८) पुत्रकाः ! कथमुद्विग्ना इव दृश्यध्वे ? ।
(९) अम्ब ! अथ किम् ? ।
(१०) उद्वेगकारणं ज्ञातुमिच्छामि ।
(११) अम्ब ! सर्वेषामस्त्युद्वेगः । विशेषतो जाङ्गलकस्य ।

---

१ C कधं. २ C जेव. ३ C सला. ४ A °वह. ५ C °सध.

मारिः—(सरोषं) (१) आ को एस कतंतक्कंतो मह पुत्तकस्स उव्वेगहेतू ?। पियसखि शूने[1]! उपनेहि किपानिकं जेन[2] से सिलच्छेतं कलेमि।

द्यूतकुमारः—(२) अंब ! अलं संरंभेण। सुणीयदु दाव।

मारिः—(३) कधेसु।

द्यूतकुमारः—(४) कलत्तविजोजणमिक्कं[3] दुक्खकारणं। अवरं च सामिणो अप्पसादो।

मारिः—(५) अध पुत्तक ! तुह मज्जसेखलस्स च किं दुक्खकारणं ?।

द्यूतकुमारः—(६) अम्हाण वि एगं पाणभूदमित्तदुक्खं दुक्खकारणं। अवरं च, अगुणन्नुजणबहुलदाए संपदि नियगुणगणअप्पगासणवसणं। जदो—

ठाणविसेसे अग्घइ पुरिसाणं गुणगणो न अन्नत्थ।
कणयाहरणे रेहइ रयणं न हु मट्टियाहरणे॥ २०॥

मारिः—(७) पुँत्तका ! जंगलकस्स कलत्तवियोचनं केन कतं ?।

जाङ्गलकः—(८) अंब ! दिव्वेण कदं।

---

(१) आः क एष कृतान्ताक्रान्तो मम पुत्रकस्योद्वेगहेतुः ?। प्रयसखि शूने ! उपनय कृपाणिकां येन तस्य शिरश्छेदं करोमि।

(२) अम्ब ! अलं संरम्भेण। श्रूयतां तावत्।

(३) कथय।

(४) कलत्रवियोजनमेकं दुःखकारणम्। अपरं च स्वामिनोऽप्रसादः।

(५) अथ पुत्रक ! तव मद्यशेखरस्य च किं दुःखकारणम् ?।

(६) अस्माकमप्येकं प्राणभूतमित्रदुःखं दुःखकारणम्। अपरं च, अगुणज्ञजनबहुलतया संप्रति निजगुणगणाप्रकाशनव्यसनम्। यतः—

स्थानविशेषे राजते पुरुषाणां गुणगणो नान्यत्र।
कनकाभरणे राजते रत्नं नैव मृत्तिकाभरणे॥

(७) पुत्रक ! जाङ्गलकस्य कलत्रवियोजनं केन कृतम् ?।

(८) अम्ब ! दैवेन कृतम्।

---

१ C सूने. २ A येन. ३ C °मेकं. ४ B & C °त्तगा.

द्यूतकुमारः—(१) कुदो वि देवीए रज्जसिरीए ।

मारिः—(२) अध सामिनो अपसातो कधं ? ।

द्यूतकुमारः—(३) रन्नो पासंडविप्पदारणे[1] त्ति मज्जसेहरो अक्खदि ।

मारिः—(आकाशे) (४) अले ले ! पासंडिका ! कुद्धो तुज्झं[2] कतंतो । यं माली वेरिनी कता । ता एते न भवध, किं पि सलनमनुसलथ । यतो—

निजतालानं हतओ तुलेहिँ तद्धून नून वेधव्वं ।
कीरति पतं सरभसं तप्पंधलविसधरसिरेसु ॥ २१ ॥

असत्यकन्दली—(विमृश्य) (५) अंब ! अलं अलीयसंरंभेण । पसीदध पसीदध, कादव्वं चिंतम्ह ।

मारिः—(६) वच्छे ! देवे मोहलाजे जीवंते नत्थि तस्सेवकान चिंता ।

असत्यकन्दली—(७) एवं नेदं । तहावि ताव चिंतीयदु किं पि ।

(मारिश्चिन्तां नाटयति)

असत्यकन्दली—(८) अध के एदे सूनाघरेगदेसनिसन्ने निव्वन्नेमि ? ।

द्यूतकुमारः—(९) अंबा सूणा जाणादि ।

शूना—(१०) एदे मालीए सेवगा ।

---

(१) कुतोऽपि देव्या राज्यश्रिया ।

(२) अथ स्वामिनोऽप्रसादः कथम् ।

(३) राज्ञः पाखण्डविप्रतारणेति मद्यशेखर आख्याति ।

(४) अरे रे ! पाखण्डिकाः ! क्रुद्धो युष्माकं कृतान्तः । यन्मारिर्वैरिणी कृता । तदेते न भवथ, किमपि शरणमनुसरत । यतः—

निजदाराणां हतको दूरैर्द्रष्टा नूनं वैधव्यम् ।
करोति पदं सरभसं दर्पान्धलविषधरशिरस्सु ॥

(५) अम्ब ! अलमलीकसंरम्भेण । प्रसीदत प्रसीदत, कर्त्तव्यं चिन्तयामः ।

(६) वत्से ! देवे मोहराजे जीवति नास्ति तत्सेवकानां चिन्ता ।

(७) एवमेतत् । तथापि तावच्चिन्त्यतां किमपि ।

(८) अथ कान् एतान् शूनागृहैकदेशनिषण्णान् निर्वर्णयामि ? ।

(९) अम्बा शूना जानाति ।

(१०) एते मारेः सेवकाः ।

---

१ B & C °रणं ति. २ B & C तुब्भं.

असत्यकन्दली—(१) किं नामगा इमे ?।

शूना[1]—(अङ्गुल्या निर्दिशन्) (२) एस दाव कउलसिद्धंतो। एस कावालिगसिद्धंतो। एस घडचडगसिद्धंतो। एस नाहियसिद्धंतो। एस रहमाणसिद्धंतो।

मारिः—(साकूतं) (३) एते खु परुप्परं नाणअहंकारेन कलिं करिंता[3] न विरमंति ता एते पुच्छिस्सं। सखि सूने ! आकारेसु एते।

शूना—(४) यं सखी आनवेति। (इति निष्क्रम्य तैः सह प्रविश्य च) एते ते।

(ततः प्रविशन्ति कौलादयः।)

कौलः—(साहङ्कारं)

(५) खज्जइ मंसं अणुदिणु पिज्जइ मज्जं च मुक्कसंकप्पं।
अणिवारियमणपसरो एसो धम्मो मए दिट्ठो ॥ २२ ॥

कापालिकः—(सगर्वं)

(६) उत्तमपुरिसकवाले भुंजइ जो पुरिसजंगलं निच्चं।
सो पावइ सिवठाणं इय नरकावालिणा कहियं ॥ २३ ॥

रहमाणः—(साटोपं)

---

(१) किं नामका इमे ?।

(२) एष तावत्कौलसिद्धान्तः। एष कापालिकसिद्धान्तः। एष घटचटकसिद्धान्तः। एष नास्तिकसिद्धान्तः। एष रहमाणसिद्धान्तः।

(३) एते खलु परस्परं ज्ञानाहङ्कारेण कलिं कुर्वन्तो न विरमन्ति। तदेतान् प्रक्ष्यामि। सखि शूने ! आकारय एतान्।

(४) यत्सख्याज्ञापयति। एते ते।

(५) खाद्यते मांसमनुदिनं पीयते मद्यं च मुक्तसंकल्पम्।
अनिवारितमनःप्रसर एष धर्मो मया दिष्टः ॥

(६) उत्तमपुरुषकपाले भुनक्ति यः पुरुषजाङ्गलं नित्यम्।
स प्राप्नोति शिवस्थानमिति नरकापालिना कथितम् ॥

---

१ B & C सूना. २ B & C नाम॰ ३ B & C करंता. ४ A दिश दिश.

(१) जह पिज्जइ गोच्छीरं पलासणे तह य नत्थि सो दोसो ।
इत्थ य लिंगियवहणे धम्मो दिट्टुं त्ति धणिएण ॥ २४ ॥

घटचटकः—(सक्रोधं)

(२) तणुगुत्तिहरा जीयं पिहगं जो कुणइ धम्मिओ कह वि ।
सो पावइ परमगइं इय घडचडगेण दंसिओ धम्मो ॥ २५ ॥

नास्तिकः—(साभिमानं)

(३) जीवो नत्थि न कस्स वि हिंसिज्जइ जं पि तं पि न हु पावं ।
पुन्नं न हु इय धम्मो सुरगुरुणा पयडिओ भुवणे ॥ २६ ॥

मारिः—(४) अरे आचारिया ! कधेह निमित्तं । एतिसे राजविरुद्धे अम्ह इत्थ अवत्थानं भविस्सदि देसंतरगमनं वा ।

कौलः—(विमृश्य) (५) जजमाणिके ! चलं लग्गं देसंतरं सूएइ ।

कापालिकः—(६) महाभइरवभत्तिए ! विरुद्धा होरा, न सुंदरं निरिक्खेमि ।

नास्तिकः—(७) सुंदरि ! पासंडविप्पयारिओ राया मुक्खो असमंजसाइं करेइ त्ति पच्चक्खं ज्जेव ।

---

(१) यथा पीयते गोक्षीरं पलाशने तथा च नास्ति स दोषः ।
अत्र च लिङ्गिकहनने धर्मो दिष्ट इति धनिकेन ॥

(२) तनुगुप्तिगृहाज्जीवं पृथग् यः करोति धार्मिकः कथमपि ।
स प्राप्नोति परमगतिमिति घटचटकेन दर्शितो धर्मः ॥

(३) जीवो नास्ति न केनापि हिंस्यते यदपि तदपि नैव पापम् ।
पुण्यं नैव इति धर्मः सुरगुरुणा प्रकटितो भुवने ॥

(४) अरे आचार्याः ! कथयत निमित्तम् । ईदृशे राज्यविरुद्धेऽस्माकमत्रावस्थानं भविष्यति देशान्तरगमनं वा ।

(५) यजमानिके ! चरं लग्नं देशान्तरं सूचयति ।

(६) महाभैरवभक्तिके ! विरुद्धा होरा न सुन्दरं निरीक्षे ।

(७) सुन्दरि ! पाखण्डविप्रतारितो राजा मुर्खोऽसमञ्जसानि करोतीति प्रत्यक्षमेव ।

---

१ C पिच्छ॰ २ C इत्थि॰ ३ C दिट्ठो. ४ C परम॰ ५ C हु दिस्सदि. ६ C भत्तीए. ७ C मु

रहमाणः—(१) धणियसासणानुवेत्तिए ! बारसवरिसियं पवासवसणदुहं वो दीसदि ।

घटचटकः—(२) धम्मिणि ! रासभारोविए सव्वे विडंबिय नगराओ अज्ज निव्वासिस्सइ राया ।

(मारिर्मूर्च्छामुपगच्छति ।)

दाण्डपाशिकः—अहो ! ज्ञानमस्य ।

द्यूतादयः—(३) अंब ! समस्ससिहि समस्ससिहि ।

मारिः—(समाश्वस्य) (४) पुत्तका ! महन्तं दानि वसनं समुपट्ठितं । का गती ? । ता अज्जं पि याव न को पि एति ता वरं तेवमोहराजपततामरसमनुसरिस्सते ।

द्यूतादयः—(५) उवं भोदु ।

मारिः—(६) पियसखि सूने ! तए पि अप्पमत्ताए ठातव्वं । विरुद्धं राजकुलं ।

शूना—(सास्रं) (७) सखि ! तए सह मए पि आगंतव्वं । न क्खु तुह विरहे पाने धरिउं सक्केमि ।

मारिः—(सगद्गदं) (८) आचालिया ! अत्थमियाइं तुज्झेहिं सद्धिं गुंट्ठीविलाससुक्खाइं ।

---

(१) धनिकशासनानुवर्तिके ! द्वादशवार्षिकं प्रवासव्यसनदुःखं वो दृश्यते ।
(२) धर्मिणि ! रासभारोपितान् सर्वान् विडम्ब्य नगरादद्य निर्वासयिष्यति राजा ।
(३) अम्ब ! समाश्वसिहि समाश्वसिहि ।
(४) पुत्रकाः ! महदिदानीं व्यसनं समुपस्थितम् । का गतिः ? । तदद्यापि यावन्न कोऽप्येति तावद्वरं देवमोहराजपदतामरसमनुसरिष्यते ।
(५) एवं भवतु ।
(६) प्रियसखि शूने ! त्वयाप्यप्रमत्तया स्थातव्यम् । विरुद्धं राजकुलम् ।
(७) सखि ! त्वया सह मयाप्यागन्तव्यम् । न खलु तव विरहे प्राणान् धारयितुं शक्नोमि ।
(८) आचार्याः ! अस्तमितानि युष्माभिः सार्द्धं गोष्ठीविलाससौख्यानि ।

---

१ A °वत्तिए. २ C दीसए. ३ B & C खु. ४ B & C °ताइं. ५ B & C तुम्भेहिं. ६ B & C गोट्ठी° ७ B & C सोक्खाइं.

कौलादयः—(१) भट्टिके ! सो सुसेवओ भणिओ जो विहुरे वि सामिं न मुंचइ । अओ अम्हे सह आगमिस्सामो ।

मारिः—(२) एवं भोदु ।

(सर्वे परिक्रामन्ति ।)

दाण्डपाशिकः—(सहसोपसृत्य) (३) अरे रे पुरिसा ! धरेह दुरायारे ।

(पुरुषास्तथाकुर्वन्ति ।)

दाण्डपाशिकः—(४) नेहु[1] सिंहदुवारं ।

पुरुषाः—(किञ्चित्परिक्रम्य) (५) एदं सिंहदुवारं ।

दाण्डपाशिकः—(६) इत्थ एयं पेडयं पिचुमंदपत्तमालाविहूसियमोलिकंठकंदलं मसीविलित्तवदणकं खडियाधवलीकयसरीरकं रासहारोवियं काऊण वज्जंतविरसडिंडिमसद्दपिसुणियदोसं[2] तियचउक्केसु नयरमज्झम्मि भामिय निव्वासेदव्वं ति सासणं देवस्स । ता तं संपाडिज्जेह[3] ।

(पुरुषास्तथाकुर्वन्ति ।)

सर्वे—(सोत्कम्पं) (७) सामि ! को अम्ह अवराहो ? जं एवमदिनिग्घिणं समायरह ।

दाण्डपाशिकः—(८) अरे ! रायनियमो एस ।

---

(१) भट्टिके ! स सुसेवको भणितो यो विधुरेऽपि स्वामिनं न मुञ्चति । अतो वयं सहागमिष्यामः ।

(२) एवं भवतु ।

(३) अरे रे पुरुषाः ! धरत दुराचारान् ।

(४) नयतु सिंहद्वारम् ।

(५) एतत्सिंहद्वारम् ।

(६) अत्रैतत्पेटकं पिचुमन्दपत्रमालाविभूषितमौलिकण्ठकन्दलं मशीविलिप्तवदनकं खटिकाधवलीकृतशरीरकं रासभारोपितं कृत्वा वाद्यमानविरसडिण्डिमशब्दपिशुनितदोषं त्रिकचतुष्केषु नगरमध्ये भ्रमयित्वा निर्वासयितव्यमिति शासनं देवस्य । तस्मात्तत्संपादयत ।

(७) स्वामिन् ! कोऽस्माकमपराधः ? यदेवमतिनिर्घृणं समाचरत ।

(८) अरे ! राजनियम एषः ।

---

१ B & C नेह. २ B & C °णिददो° ३ B & C °ज्जदु.

इतरे—(सदैन्यं) (१) सामि ! एगवेलं अम्ह विन्नत्तियं सुणिदुमरिहदि देवो । ता पसादं करिय[1] विन्नवेसु ।

दाण्डपाशिकः—(२) अरे ! कत्थ संपइ गयं तं सोडीरत्तणं ? ।

इतरे—(सभयं) (३) सामि ! केरिसं ? ।

दाण्डपाशिकः—(४) जं निरग्गलं मिलिएहिं तुज्झेहिं[2] वियंभियं ।

इतरे—(स्वगतं) (५) हद्धी ! सुदं भविस्सदि एदिणा । अदो एवं मंतइ । 'दिवा निरीक्ष्य वक्तव्यम्' इति विसुमरिद म्ह नीदिं । (प्रकाशं) सामि ! सव्वं मरिसध मरिसध अम्ह अवराहपदं ।

दाण्डपाशिकः—(६) अरे ! न मरिसदि देवो ।

इतरे—(७) तहावि एगं विन्नत्तियं सुणावेदु सामी ।

दाण्डपाशिकः—(सदयं) (८) एवं भोदु । (इति निष्क्रामति ।) एस देवो । उवसप्पामि णं ।

(ततः प्रविशति राजा ।)

दाण्डपाशिकः—(उपसृत्य) (९) जयदु जयदु देवो ।

राजा—भद्र ! कच्चिदासादितं दुष्टपेटकम् ? ।

---

(१) स्वामिन् ! एकवारमस्माकं विज्ञप्तिकां श्रोतुमर्हति देवः । तत्प्रसादं कृत्वा विज्ञपय ।
(२) अरे ! कुत्र संप्रति गतं तच्छौण्डीरत्वम् ? ।
(३) स्वामिन् ! कीदृशम् ? ।
(४) यन्निरर्गलं मिलितैर्युष्माभिर्विजृम्भितम् ।
(५) हा धिक् ! श्रुतं भविष्यत्येतेन । अत एवं मन्त्रयति । विस्मृताः स्मो नीतिम् । स्वामिन् ! सर्वं मर्षयत मर्षयतास्माकमपराधपदम् ।
(६) अरे ! न मर्षयति देवः ।
(७) तथाऽप्येकां विज्ञप्तिकां श्रावयतु स्वामी ।
(८) एवं भवतु । एष देवः । उपसर्पाम्येतम् ।
(९) जयतु जयतु देवः ।

---

१ B & C करिअ. २ B & C तुम्भेहिं.

दाण्डपाशिकः—(१) अध इं ? । देव ! दुट्टपेडयं विन्नवेदि । एगं विन्नत्तियं सुणेदु देवो ।

राजा—(सजुगुप्सं) कस्तेषां पाप्मनां दर्शनमभिनन्दतु ? । अथवा 'कृतमहापराधोऽपि विज्ञप्तिं राज्ञि लभते पुमान्'। तद्भद्र ! जवनिकान्तरितं करोतु विज्ञप्तिम् ।

दाण्डपाशिकः—(२) जं देवो आणवेदि । (इति निष्क्रम्य दुष्टपेटकं गृहीत्वा प्रविश्य च) एसा जवणिया, इमाए अंतरिदा अरे ! करेह जहाभिरुइयं ।

द्यूतकुमारः—(३) देव ! चालुक्ककुलतिलय ! धम्मनिलय ! कं दोसमुप्पाइय अहं निव्वासिज्जामि ? ।

राजा—आः पाप ! कमेकं दोषमुद्भावयामि त्वयि दोषनिलये ? ।

द्यूतकुमारः—

(४) देव ! मह नत्थि दोसो अणू वि अह हुज्ज कह वि जइ नाम ।
ता किं पंडुसुएहिं अहमेगमणेहिं पडियरिओ ? ॥ २७ ॥
जो किल आसि नरिंदो अरिवणदावानलो नलो नाम ।
तेण वि मह पयसेवा कया सया किंच इयरेहिं ? ॥ २८ ॥
मज्झ पसाएणं चिय सुद्दयदेवेण वीरपवरेण ।
निज्जियरिउचक्केणं एगच्छत्तं कयं रज्जं ॥ २९ ॥

राजा—धिग्मूर्ख ! दोषानपि गुणीकृत्य ब्रवीषि ? ।

---

(१) अथ किम् ? । देव ! दुष्टपेटकं विज्ञपयति । एकां विज्ञप्तिकां शृणोतु देवः ।
(२) यद्देव आज्ञापयति । एषा जवनिका, अनयाऽन्तरिता अरे ! कुरुत यथाभिरुचितम् ।
(३) देव ! चौलुक्यकुलतिलक ! धर्मनिलय ! कं दोषमुत्पाद्याहं निर्वास्ये ? ।
(४) देव ! मम नास्ति दोषोऽणुरप्यथ भवेत्कथमपि यदि नाम ? ।
तत्किं पाण्डुसुतैरहमेकमनोभिः प्रतिचरितः ? ।
यः किलासीन्नरेन्द्रोऽरिवनदावानलो नलो नाम ।
तेनापि मम पदसेवा कृता सदा किञ्चतैः ? ॥
मम प्रसादेनैव शूद्रकदेवेन वीरप्रवरेण ।
निर्जितरिपुचक्रेणैकच्छत्रं कृतं राज्यम् ॥

---

१ B & C इमाइ. २ B & C होज्ज. ३ B & C किं व.

पापात्मकचौर्यरते ! त्वदुपासनगलितचित्तपावित्र्यम् ।
दृष्ट्वा पाण्डोः सूनून् राज्यश्रीरत्यजत्पुण्या ॥ ३० ॥

अपि च—

दुर्गतितीर्थतपस्विन् ! तव सेवां कुर्वता नलनृपेण ।
त्यक्ता हा ! गुणवत्यपि पत्नी हा ! हारितं राज्यम् ॥ ३१ ॥
पुण्येनैवोपस्थितमिह राज्यं शूद्रकस्य ननु विद्मः ।
त्वं पुनरात्मनि महिमानमेनमारोप्य दृप्तोऽसि ॥ ३२ ॥

अपि च—

तावत्सत्यं भविनां यावत्ते नास्ति सङ्गतं नूनम् ।
गङ्गाजलमपि यस्मान्न पावनं श्वपचपात्रस्थम् ॥ ३३ ॥

द्यूतकुमारः—(स्वगतं) (१) किं भणिस्सं ? ।

जाङ्गलकः—(२) देव ! गुज्जरनरेसर ! परक्कमक्कंतसायंभरीभूवाल ! किवालुचित्त ! किं मज्झ संभाविदं दूसणं जेण एवं विडंबिज्जामि ? ।

राजा—(सजुगुप्सं) भो दाण्डपाशिक ! नास्य वदनोद्गारगन्धमधिसोढुं प्रौढोऽस्मि । तदेनं तावद्दवीयांसं कुरु ।

(दाण्डपाशिकस्तथाकरोति ।)

जाङ्गलकः—(३) देव ! अवधारिदा मह भणिदी ? ।

राजा—आः सर्वाधम ! त्वमप्यात्मानमदूषणं समर्थयसे ? ।

जाङ्गलकः—(४) को इत्थ संदेहो ? । जदो—

जदि नाम सदोसोऽहं [1]तो पुव्वनिवेहिँ सेविओ कह णु ? ।
अह अपवित्तो ता कह पिदराणं बहुमदो जादो ? ॥ ३४ ॥

---

(१) किं भणिष्ये ? ।

(२) देव ! गूर्जरनरेश्वर ! पराक्रमाक्रान्तशाकम्भरीभूपाल ! कृपालुचित्त ! किं मम संभावितं दूषणं येनैवं विडम्ब्ये ? ।

(३) देव ! अवधारिता मम भणितिः ? ।

(४) कोऽत्र संदेहः ? । यतः—

यदि नाम सदोषोऽहं तत्पूर्वनृपैः सेवितः कथं नु ? ।
अथापवित्रस्तत्कथं पितॄणां बहुमतो जातः ? ॥

---

१ B & C ता.

(१) जे नाम भूमिदेवा निवदीण वि अग्घिदा नियगुणेहिं ।
ते वि मह देव ! सेवं कैरंति अव्वाहयप्पसरं ॥ ३५ ॥
अहह ! मैंए चिय हुणिए हयगयनरमेहपमुहजन्नेसु ।
पाँविंति सुरा तित्तिं न हु केण वि अवरकिच्चेण ॥ ३६ ॥

अवि य—

बालत्ताउ वि तुह देव ! निच्चमचंतवल्लहो अहयं ।
मह साहिज्जेण तया कयाइँ देसंतराइँ तए ॥ ३७ ॥

राजा—अरे दुरात्मन् ! किमलीकविकत्थनाभिः शिरोवेदनामुत्पादयसि ? ।

अपि च—

किं पूर्वपुरुषसेवितमिति दारिद्र्यादि वल्लभं भवति ? ।
किं तातकूप इति वा क्षारं नीरं भवति पेयम् ? ॥ ३८ ॥
सदृशास्त्वां सेवन्ते देवाः किल किल्विषाः पितृप्रमुखाः ।
हरिहरहिरण्यगर्भास्तव रे ! नाम्नापि दह्यन्ते ॥ ३९ ॥
ये तव सेवासज्जा द्विजा न ते राक्षसाः किन्तु ।
गजमेधादिषु तृप्तिः सुपर्वणां केन ते कथिता ? ॥ ४० ॥

किञ्च—

मिथ्योपदेशदानाज्जगदेतद्वञ्चयन्ति पाषण्डाः ।
जीववधादप्यापि क्वापि स्वर्गौकसां लोकः ? ॥ ४१ ॥

अपि च—

अनाद्यविद्यातिमिराक्रान्तविद्याविलोचनाः ।
पश्यन्ति हेतुं श्वभ्रस्य स्वर्गहेतुतया जडाः ॥ ४२ ॥
मम वल्लभस्त्वमासीरज्ञानादेव न तु गुणविशेषात् ।
स्वाङ्गुष्ठोऽप्यहिदष्टस्त्याज्यः किं पुनरपरवस्तु ? ॥ ४३ ॥

---

(१) ये नाम भूमिदेवा नृपतीनामप्यर्घिता निजगुणैः ।
तेऽपि मम देव ! सेवां कुर्वन्त्यव्याहतप्रसरम् ॥
अहह ! मयैव हुते हयगजनरमेधप्रमुखयज्ञेषु ।
प्राप्नुवन्ति सुरास्तृप्तिं न खलु केनाप्यपरकृत्येन ॥

अपि च—

बालत्वादपि तव देव ! नित्यमत्यन्तवल्लभोऽहकम् ।
मम साहाय्येन तदा कृतानि देशान्तराणि त्वया ॥

---

१ B & C करेंति. २ A मअर्चि ३ B & C पावेंति. ४ A तेन.

जाङ्गलकः—(स्वगतं) (१) मोणमेव पत्तकालं ति ।

मद्यशेखरः—(२) देव ! सिरिवणराजसमुवज्जिदरज्जलच्छीभुयंग ! पसीद । कीदिसो ममावराहो ? जेणाहमेवं परिभविज्जामि ।

राजा—(स्वगतं) वनराजस्याहं बहुमतोऽभूवमित्युत्क्षिप्तममुना । भवतु । (प्रकाशं) दाण्डपाशिक ! एनमपि दूरे धृत्वा विज्ञप्तिं कारय ।

(दाण्डपाशिकस्तथाकरोति ।)

राजा—(सजुगुप्सं) आः सर्वपदार्थापसद ! निजापराधमपि न बुध्यसे ।

मद्यशेखरः—(३) देव ! जइ हुज्ज[1] तदो बुज्झे[2] । अवि य—

कण्हेन[3] समं जायवजणेण नणु सेविओ म्हि अविर्यण्हं[4] ।
रेवयगिरिसिहरेसुं का गणणा इयरलोयाण ? ॥ ४४ ॥
पणइणिमुहाउ अमयं व मं पडिच्छंति कामिणो लोया ।
मह सेवासत्ताणं न रोगसोगप्पमुहमेइ ॥ ४५ ॥
मह भत्तिपराणं चिय तिपुराई देवयाँ[5] उ तूसंति ।
मह सेवाए देवो मओ वि मयणो पुणो जियइ ॥ ४६ ॥
इह धवलहरेसु चिरं चावुक्कडरायलालिओ वसिओ ।
एवं च ठिए[6] सामिय ! जं जाणसि तं करिज्जासु ॥ ४७ ॥

---

(१) मौनमेव प्राप्तकालमिति ।

(२) देव ! श्रीवनराजसमुपार्जितराज्यलक्ष्मीभुजङ्ग ! प्रसीद । कीदृशो ममापराधः ? येनाहमेवं परिभूये ।

(३) देव ! यदि भवेत्ततो बुध्ये । अपि च—

कृष्णेन समं यादवजनेन ननु सेवितोऽस्म्यवितृष्णम् ।
रैवतगिरिशिखरेषु का गणना इतरलोकानाम् ? ॥
प्रणयिनीमुखादमृतमिव मां प्रतीच्छन्ति कामिनो लोकाः ।
मम सेवासक्तानां न रोगशोकप्रमुखमेति ॥
मम भक्तिपराणामेव त्रिपुरादयो देवता स्तु तुष्यन्ति ।
मम सेवया देवो मृतोऽपि मदनः पुनर्जीवति ॥
इह धवलगृहेषु चिरं चापोत्कटराजलालित उषितः ।
एवं च स्थिते स्वामिन् ! यज्जानासि तत्क्रियताम् ॥

---

१ B & C होज्ज. २ B & C बुज्झे ३ A कन्हे ४ A °यन्हं. ५ B & C देवता. ६ A ठविए.

राजा—अरे अलीकवाचाल ! विरम विरम । भवादृशां हि परदोषोद्गारैरेव गर्वगरिमासमुज्जृम्भते । ननु त्वत्सेवयैव निखिलमपि क्षयं गतं यादवकुलं वनराजकुलं च । अथवा कस्त्वया सह उक्तिप्रत्युक्तिप्रपञ्चः ? । यतो भवान् जाङ्गलकश्च जीवमयावित्यपि त्याज्यावेव धर्मात्मनाम् । उक्तं च—

मद्ये मांसे मधुनि च नवनीते तक्रतो बहिर्नीते ।
उद्यन्ति विपद्यन्ते तद्वर्णा जन्तवस्तत्र ॥ ४८ ॥

मद्यशेखरः—(स्वगतं) (१) पज्जत्तमित्तो भणिदीहिं, जं भोदि तं भोदु ।

मारिः—(२) देव ! राजशेखर ! एत्थ संसारे अनेके राजानो चक्कवट्टिनो अतिक्कंता, न पुन केनापि हं निलाकता । अपरं च, किं मए विलूपं कयं ? जं एतिसं रोसं करेति भट्टका । अपि च—

जीवो जीवाहारो एस सभावो खु सकलसंसाले ।
एवं मुनितून कुतो विचारना भोति पुलिसान ? ॥ ४९ ॥
दसलधनलीसलेनं मह सेवानिचलेन निच्चं पि ।
अहह ! सलेनं निहतो सवनलिसिसुतो मुहुत्तेन ॥ ५० ॥

राजा—(सक्रोधं) आः पापे ! किमद्यापि प्रगल्भसे ? । दाण्डपाशिक ! एतच्चतुष्टयं सपरिवारं यथोक्तस्थित्या निर्वासयेति ।

दाण्डपाशिकः—(३) जं देवो आणवेदि ।

मारिः—(अपवार्य) (४) पुत्तका ! जीवएदं विसुमलित म्हि । ननु अम्हे राजकुले दव्वं पूरेमो ।

---

(१) पर्याप्तमात्रो भणितिभिः, यद्भवति तद्भवतु ।

(२) देव ! राजशेखर ! अत्र संसारेऽनेके राजानश्चक्रवर्त्तिनोऽतिक्रान्ताः, न पुनः केनाप्यहं निराकृता । अपरं च किं मया विरूपं कृतं यदीदृशं रोषं करोति भर्त्ता । अपि च—

जीवो जीवाहार एष स्वभावः खलु सकलसंसारे ।
एवं ज्ञात्वा कुतो विचारणा भवति पुरुषाणाम् ? ॥
दशरथनरेश्वरेण मम सेवानिश्चलेन नित्यमपि ।
अहह ! शरेण निहतः श्रवणर्षिसुतो मुहूर्त्तेन ॥

(३) यद्देव आज्ञापयति ।

(४) पुत्रकाः ! जीवतैतद्विस्मृताऽस्मि । ननु वयं राजकुले द्रव्यं पूरयामः ।

---

१ C °त्तमेत्तो. २ C °नावि ३ A °राक° ४ C विलवं. ५ A यं. ६ C मुनिऊन. ७ C मुलिसान.

सर्वे—(सहर्षं) (१) साहु अम्ब ! साहु । विन्नवीयदु ।

मारिः—(२) देव ! अम्हे जूयं जंगलको मज्जसेखैलो लाजकुले पभूतं दव्वं पुंलिंति । ता को आदेँसो ? ।

राजा—पातकोपात्तेन वित्तेनापि न मे प्रयोजनम् ।

(दाण्डपाशिकः सर्वाणि पुरस्कृत्य निर्गतः ।)

राजा—(स्वगतं)

निर्याते दुष्टचक्रे भवतु जगदिदं सौख्यपीयूषमग्नं
कामस्तस्याः कृपायाः फलतु विषमताभाजि पूर्णे पणेऽस्मिन् ।
किञ्च श्रीमान् विवेकः कलयतु नितमां संपदं प्राक्तनीं स्वां
राज्यश्रीरस्तु हृष्टा व्रजतु विफलतां मोहराजप्रयासः ॥ ५१ ॥

(नेपथ्ये)

निर्वासयति नरेन्द्रो नगराद्व्यसनानि सपरिवाराणि ।
दोषमयान्यपि भूपैः पुरस्कृतान्येव यान्यन्यैः ॥ ५२ ॥

राजा—(सहर्षं) एतावता कृतार्थोऽस्मि ।

(नेपथ्ये)

वैतालिकः—

नयनशफरवीथीबन्धनायेव सायं
समयवधककॢप्तं त्रोटयन् ध्वान्तज्वालम् ।
भुवनसरसि रम्यं रक्षकत्वं दधानो
वहति वियति राजा पश्य लक्ष्मीमपूर्वाम् ॥ ५३ ॥

राजा—कथं प्राप्तः प्रदोषसमयः ? । तदुत्तिष्ठामः ।

(इति निष्क्रान्ताः सर्वे ।)

चतुर्थोऽङ्कः ।

---

(१) साधु अम्ब ! साधु । विज्ञप्यताम् ।
(२) देव ! वयं द्यूतं जाङ्गलको मद्यशेखरो राजकुले प्रभूतं द्रव्यं पूरयामः । तत्क आदेशः ? ।

---

१ C °ह्लो. २ C पुलेंति. ३ C देशो.

पञ्चमोऽङ्कः ।

(ततः प्रविशति विवेकचन्द्रः ।)

विवेकचन्द्रः—(सानन्दं परिक्रम्य) अहो ! निश्चिन्तोऽस्मि चोलुक्यकुलनभस्तलालङ्कारमणिना सकलभूपालमौलिमण्डलावतंसायमानचरणतामरसेन त्रिभुवनश्रीकुचकलशमुक्तालतायमानयशःप्रसरेण महाराजाधिराजेन श्रीकुमारपालदेवेन सह मम सुतायाः कृपासुन्दर्याः पाणिग्रहणमहोत्सवेन । अपरं च, वत्साया राज्यश्रियः फलितं प्रार्थनाद्रुमेण । (इत्यानन्दं नाटयित्वा) अहो ! निःशेषव्यसननिर्वासनेन ममेच्छापीयूषतरङ्गिणी तरङ्गिता । अपरं च, रुदतीधनत्यागामृताभिषेकेणाङ्कुरिता मे क्षेत्रावनिः । यतः—

जज्ञे यो भुवि चक्रवर्त्तिनृपतिव्यूहः समूहो महः-
सारस्याखिलराज्यनीतिकुशलो ग्रामो गुणानां परम् ।
स व्यामोहनरेन्द्रशासनमणीमुत्तंसतामानयं-
श्चक्रे नैतदिति त्रिलोकविजयी सोऽयं कृपावल्लभः ॥ १ ॥

(पुनर्विमृश्य)

अन्तरेण जिनाधीशं कश्छेत्तुं मोहमीश्वरः ? ।
असौ तु तत्पदाम्भोजे भृङ्गतीति ध्रुवं जयी ॥ २ ॥

(पुनः सोल्लासं) अहो ! मामकीनमपि कार्यं निष्पन्नप्रायं संभाव्यते । यतोऽस्य महाराजस्य मोहराजं पराजेतुं कार्यशेषः । तथा च—

निन्ये राज्यश्रियं तुष्टिं परिणिन्ये कृपां प्रियाम् ।
चक्रे च यत्पुरं पुण्यं तन्मोहं जितवानसौ ॥ ३ ॥

(पुनः सौत्सुक्यं) तं राजकुञ्जरमवलोकयितुमुत्कण्ठते मे मनः । यतः—

सरोरुहं किं न सहस्ररश्मिं ?
सुधाकरं किं न चकोरलोकः ? ।
जिनक्रमान् किं नहि भव्यजन्तुः
समीहते शर्मविभूतिहेतोः ? ॥ ४ ॥

(आकाशे)

किं ब्रूषे ? । यत्सर्वोत्तम ! अपरान्नरेन्द्रान् परित्यज्य कथं मानवेश्वरममुं द्रष्टुमीहसे ? । नन्वेवं, यतः—

विनार्कस्यांशुसंपर्कं ध्वान्तध्वंसनचेतसः ।
न प्राप्नोति कलावृद्धिं शिवोपासनया शशी ॥ ५ ॥

(पुनराकाशे साहङ्कारं)

दुर्जयो मोहमहाराजः ।
मा मैवम् । यतः—

तावद्विद्युत्करालं निनदति नितरां शम्भुकण्ठातपश्री-
चौरं पाथोदवृन्दं जलभरविभवाखर्वगर्वं समन्तात् ।
यावद्वात्या न वाति क्षितिधरशिखरश्रेणिसंहारकारी
तावन्मोहः प्रचण्डः कलयति न करे यावदेष स्वधर्मम् ॥ ६ ॥

अपि च, तदहो ! चौलुक्यचन्द्रं सुपर्णध्वजं वीक्षितुमुत्सहते मे मनः ।

(आकाशे)

यद्यहो ! सुपर्णकेतुं द्रष्टुमुत्सहसे तर्हि नः सिद्धमेव समीहितम् । यतोऽसौ मूलाश्रयो मोहमहाराजस्य । तथा च—

नित्यशर्मास्पदं हित्वा मोहराजवशंवदः ।
विष्णुर्विडम्बयामास स्वं पाठीनादिमूर्त्तिभिः ॥ ७ ॥

अमुं तु मोहप्रतिपन्थिनं वीक्षितुमिच्छामि । तत्कस्मिन्प्रदेशे तस्थिवांसं वासवसमानमवेक्ष्य स्वदृशामानन्दयामि ? ।

(नेपथ्ये)

वैतालिकः—

श्रीसर्वज्ञपदारविन्दरजसा भ्राजिष्णुभालस्थलो
लीलासुक्तमृतस्ववर्द्धितयशःसंभारधौतावनिः ।
ध्वस्तद्यूतपलादिपापवशतः संपन्नतुच्छक्षमा-
भारोत्तारणशर्मनन्दितफणी जीयान्नृपो गौर्जरः ॥ ८ ॥

द्वितीयः—

उच्चण्डासिविखण्डितारिमुकुटोद्भ्रान्तैर्मणीनां गणै-
र्येनाकारि सपत्नदुःखमिव खे तारावलीनां रणे ।

---

१ B & C °काली. २ B & C मोहरा°

व्यामोहक्षितिपाललोलनयनावैधव्यदानोद्यतः
श्रीचौलुक्यकुमारपालनृपतिर्जीयाज्जगत्यां जयी ॥ ९ ॥

(इति विजययात्राजयजयशब्दगर्भं विजयढक्कानिर्घोषमाकर्ण्य ससंभ्रमं)

व्योमाश्लेषविशेषितो रविहरित्त्रासं प्रकुर्वन्निव
क्षोणीभृच्छिखरेषु वज्रललितं व्यापारयन् हेलया ।
पातालोदरवासिनां बधिरयन् कर्णानयं श्रूयते
श्रीचौलुक्यकुमारपालनृपतेर्निःस्वानकोलाहलः ॥ १० ॥

तदयं भूपालचूडामणिर्विजययात्रामासूत्रयन्नित एवाभिवर्त्तते ।

(ततः प्रविशति स्कन्धावारस्थो महाराजो विभवतश्च परिवारः ।)

राजा—(सोत्साहं भुजलतामवेक्ष्य)

भूभृद्धारविनम्रभूमिकलनासंपन्नगर्वोङ्कुरं
व्यालेन्द्रं यदि याति हन्त ! शरणं व्यामोहभूमीश्वरः ।
तत्त्वं बाहुलते ! विधृत्य वसुधां तेनैव सार्द्धं हठा-
दुत्पाट्याब्धिगभीरघोरपयसि व्यापारयेस्त्वं द्विषम् ॥ ११ ॥

अपि च (ऊर्ध्वमवलोक्य) किं वच्मि महेन्द्रं प्रति ? । तथापि—

स्वर्नेता यदि धास्यते स्वसविधे मोहं जगत्कण्टकं
तत्किं तस्य सहस्रसंख्यनयनैर्वीक्ष्येत यन्न द्विषम् ? ।
मन्ये पश्यति नैव मोहतिमिरव्यालुप्तचक्षुस्ततः
संसारार्णवकोटरे पतति भोः ! भूयोऽपि भूयोऽपि सः ॥ १२ ॥

(पुनः सर्वतो विलोक्य सकौतुकं)

मयि करतलात्तधर्मे कः शरणं हन्त ! मोहराजस्य ? ।
ज्वलति जिनध्यानाग्नौ किमु कामः कार्मुकं स्पृशति ? ॥ १३ ॥

विवेकचन्द्रः—(पुरो विलोक्य सानन्दं) दिष्ट्या वर्धसे हृदय ! । यतः समुदितो धाम्नांनिधिश्छिनत्ति खरतरैः करकुठारैर्ध्वान्ततरुगहनम् । तदवलोकनप्रणालनिर्गमेन पिब दृष्टे ! दर्शनामृतं राजर्षेः श्रीकुमारपालदेवस्य । (इत्युपसृत्य) कल्याणिन् ! कल्याणं निःश्रेयसकारणस्य धर्मशरीरस्य ? ।

राजा—(विलोक्य) किमयमार्यो विवेकचन्द्रः ? । (इति सप्रश्रयं) इदमासनमास्यताम् । (पुनः सहर्षं)

---

१ C धाम्नो.

पुण्योदयपरीपाको मामकीनो विजृम्भते ।
यदस्मिन् समये जज्ञे विवेकस्य समागमः ॥ १४ ॥

विवेकचन्द्रः—सर्वत्र परिभ्रान्तोऽस्मि । परं नालोकितवान् लोकोत्तरगुणं निर्जितानेकरणं पुण्यसत्तमं पुरुषोत्तमं भवादृशम् । तत्त्वदर्शनसुधासागरे स्वच्छन्दं[1] क्रीडया प्राप्नोतु सुधासारसुखं मे दृष्टिः । किञ्च—

उच्चैःकारितवीतरागभवनव्याजेन रोमाञ्चितां
निःशेषव्यसनान्धकारपटलच्छेदेन पुण्येक्षणाम् ।
न्यायोत्सङ्गसुखोपलालिततनुं वीक्ष्य क्षमायोषितं
युष्मद्गीतपवित्रकीर्त्तिविशदां मे स्यात्प्रमोदोदयः ॥ १५ ॥

राजा—(सहर्षं) भवत्संपर्केण सर्वं साधु[2] संवृत्तम् । तथा च—

पारावारपयो निपीय शतशः प्रच्छाद्य सूर्यातपं
नम्रीभूय निरीक्ष्य नाम वसुधां तत्प्रजां विद्युता ।
निर्व्याजं जलसंपदा विहितवानानन्ददानोद्यतां
पाथोदः खलु[3] साधु साधुचरितं किं किं न कर्तुं क्षमम् (मः)? ॥१६॥

विवेकचन्द्रः—(स्वगतं) अहो ! गुणज्ञोऽयं पवित्रोऽयं[4] गुणानामधिष्ठानमयं च ।

तावन्मानसकल्पनासविभवो भूयिष्ठगर्वो मया
दृष्टो दृष्टिसहस्रपङ्कजततिभ्राजिष्णुदेहद्युतिः ।
इन्द्रः पीतविरुद्धगन्धमदिराव्यालोलरक्ताक्षिभिः
सेव्यः स्वर्गविलासिनीभिरनिशं तस्मात्कुतः पावनः? ॥ १७ ॥

भवतु तावत् । (प्रकाशं) सर्वज्ञधर्मजागरूक ! परदोषमूक ! कच्चित्परिज्ञातं मोहराजस्वरूपम् । कस्मिन् विषये स पापीयान् यतते? ।

राजा—आर्य ! तस्योपक्रमं परिज्ञातुं समादिष्टो ज्ञानदर्पणश्चिरयति ।

(नेपथ्ये)

भोः प्रतीहार ! निवेदय झगिति ज्ञानदर्पणं देवाय ।

राजा—(श्रुत्वा सौत्सुक्यं) प्रतीहार ! प्रवेशय ज्ञानदर्पणं सत्वरम् ।

---

१ C °न्दक्रीड° २ C °धु वृत्तं. ३ C किल. ४ A पवित्रोऽयं पवित्रोऽयं.

प्रतीहारः—देवादेशः प्रमाणम् । (इति निष्क्रम्य ज्ञानदर्पणेन सह प्रविश्य च) देव ! अयं ज्ञानदर्पणः ।

ज्ञानदर्पणः—जयतु जयतु देवः ।

राजा—(सप्रसादं) आसनं ज्ञानदर्पणाय ।

(ज्ञानदर्पण आसने उपविशति ।)

राजा—(सौत्सुक्यं) ज्ञानदर्पण ! विज्ञपय यथावृत्तं तस्याविद्यावल्लभस्य ।

ज्ञानदर्पणः—एष विज्ञपयामि । देव ! इतः स्थानान्मोहराजस्कन्धावारे गतस्य मे निरन्तरं परिभ्रमतां यामिकचक्रवालानां भयेन दुर्लभः प्रवेशः ।

राजा—एवं भवत्येव विजिगीषुभूपतीनां शिबिरे । ततस्ततः ? ।

ज्ञानदर्पणः—तत् (ततः) देव ! मागधवेषं विधाय धवलितकरोऽहं प्रविष्टः स्कन्धावारे । गतो राजावाससिंहद्वारम् । दृष्टोऽहं प्रतीहारेण । उक्तश्चेति 'कस्मादागतोऽसि' । मया[1] चोक्तं 'यतं[2] श्रीमन्महाराजेन चौलुक्यकुलावतंसेन कुमारपालदेवेन तव स्वामिप्रोत्साहनाय समादिष्टोऽस्मि मागधराजः' ।

राजा—ततस्ततः ? ।

ज्ञानदर्पणः—ततः प्रतीहारेण स्वस्वामिनः समीपे नीत्वा निवेदितः । यत् श्रीकुमारपालदेवेन राज्ञा समादिष्टोऽयं मागधराजः ।

राजा—ततः किं संवृत्तम् ? ।

ज्ञानदर्पणः—तस्मिन् क्षणे तस्य मागधराजेन मां निरीक्ष्य कृतोपश्लोकना स्वस्वामिनः ।

राजा—कीदृशी ? ।

ज्ञानदर्पणः—

श्रीव्यामोहमहीशचुम्बितपदद्वन्द्वावतंसीकृता-
हल्याजारशिरस्त्वदीयललितं सर्वैर्नमस्यं यतः ।
त्यक्त्वा ध्यानरसं निरस्य च तपस्त्वद्बन्धुकामायुध-
श्रेणीपञ्जरजर्जरः पुररिपुर्गौरीमुखं वीक्षते ॥ १८ ॥

---

१ C मयोक्तं. २ C यतः.

राजा—(सकोपं) ज्ञानदर्पण ! त्वया पुनः किमुक्तम् ? ।

ज्ञानदर्पणः—अवधारयतु देवः । तथा च—

भूयो भूधर ! दैवेतः कथमपि प्राप्यात्मपक्षावलीं
गर्जाडम्बरचुम्बिताम्बरतलं मा सज्जयेत्कालताम् ।
यस्मात्पश्य पुरः पुरन्दरविभुर्वज्रातिभीकल्पिता-
कालाकाशतडित्त्वताण्डवैततौ त्वां होतुमुत्तिष्ठते ॥ १९ ॥

राजा—(सहर्षं) साधु ज्ञानदर्पण ! साधु । निस्तेजितो दुष्टात्माऽन्यो-
प्रपञ्चेन । ततः किमुक्तं तेन पुरुषापसदेन ? ।

ज्ञानदर्पणः—साक्षेपं मामुक्तवान् स यत्किं वक्रोक्त्या मामधिक्षि-
से ? । प्रातर्जानासि स्वस्वामिनः पराक्रमम् । एकयाऽप्यविद्यया मथ्यमान-
व स्वामी कस्य शरणं यास्यति ? ।

राजा—(साटोपं) ततः किमुक्तं भवता ? ।

ज्ञानदर्पणः—आक्षिप्तो वक्रोक्त्या । तथा च—

यस्या हन्त ! समुन्नतौ पिबति नो नीरं जनो बालिशो
भीत्येव प्रतिशाखिनं खगकुलं बाह्यात्समागच्छति ।
तां सन्ध्यां प्रतिपद्य दुर्मुखतमो मा वल्ग रे स्वेच्छया
यस्मादेष विजृम्भते नभसि ते क्रुद्धः कृतान्तः शशी ॥ २० ॥

राजा—(सहर्षं) साधु ज्ञानदर्पण ! साधु । वक्रोक्त्या छिन्नस्तस्य मनो-
द्रुमः । ततस्ततः ? ।

ज्ञानदर्पणः—पुनराक्षिप्तो मया स मायावी । तथा च—

सैन्यवाजिखुराघातैः ठकारं मा कृथाः क्षितौ ।
कण्ठे कुरु कुठारं रे ! यदि वाञ्छसि जीवितम् ॥ २१ ॥

राजा—अहह ! प्राणान् पणेविधाय भवतोक्तम् ।

ज्ञानदर्पणः—(सविनयं)

स्वामिकार्यमिदं देव ! प्राणितं भक्तिशालिनाम् ।
विना तेन न जीवन्ति भुवने नरसत्तमाः ॥ २२ ॥

---

१ °दैवता. २ C °वततस्त्वां. ३ A °ष्ठति. ४ A निस्तेजो. ९ C तथा.

राजा—एवमेतत् । इदं हि स्वामिभक्तानां कुलव्रतम् । पुनस्तेन किमुक्तं पापेन ? ।

ज्ञानदर्पणः—तत्रैवं वक्रोक्त्या स्वच्छन्द[1]मुज्जृम्भितम् । यतः[2]—

य: प्रीणाति सुधाभुजः प्रतिदिनं पीयूषभोज्यैर्भृशं
यज्ज्योत्स्नामदमाप्य माद्यतितरां प्रीतं चकोरीकुलम् ।
सोऽयं संप्रति शीतदीधितिरतिक्षीणाङ्ककान्तिः श्रियं
शश्वत्स्वस्य समीहते खररुचेर्धिग्धिक्चरित्रं विधेः ॥ २३ ॥

नाहं पुनस्तस्य सदृशः । यतः—

सीतासङ्गवियोगविह्वलमना बभ्राम रामो वनं
राज्यश्रीरमणेच्छया यमपुरं प्रापुः पुरा कौरवाः ।
जीवातुः किल नाकिनां हिमरुचिर्यल्लक्ष्म धत्तेऽधुना-
प्येतद्विद्धि विरुद्धबुद्धिजलधेर्लीलायितं मे स्फुटम् ॥ २४ ॥

राजा—(सजिज्ञासं) ज्ञानदर्पण ! त्वया किमभिहितम् ? ।

ज्ञानदर्पणः—एष विज्ञपयामि । यत्—

अन्ये ते पुरुषा ये स्युस्तवाज्ञावशवर्त्तिनः ।
महात्मनां मौलिरत्नमन्योऽयं मनुजेश्वरः ॥ २५ ॥

तथा च—

यस्त्वां प्राक् सपरिग्रहं निहतवान् ध्यानाग्निशस्त्रत्विषा
तत्पादाम्बुजषट्पदो विजयते चौलुक्यचन्द्रो नृपः ।
येनेदं तव वल्लभं निजपुरादेशाच्च निर्वासितं
द्यूताद्यं विटपेटकं शितिमुखं तत्किं मुधा गर्जसि ? ॥ २६ ॥

राजा—(सानन्दं) साधु यथोक्तं भवता । अपरं च, चरचक्षुषो राजानः ।

तथा च—

ये पश्यन्ति परंतपैर्गुरुसुहृन्मन्त्रीशमन्त्रैर्दृढं
भित्त्वारातिधराधिपस्य हृदयं शस्यं रहस्यं ननु ।
तैर्नेत्रैर्हृदयस्थितैर्विकसितैर्दृष्ट्वा परेषां बलं
सार्द्धं ते विजयश्रिया समुदिताः क्रीडन्ति भूमीभुजः ॥ २७ ॥

(पुनः सजिज्ञासं) ज्ञानदर्पण ! विज्ञपय तस्य बलस्वरूपं पापस्य ।

---

१ C स्वच्छन्दं विजृं° २ C यत्.

ज्ञानदर्पणः—एष विज्ञपयामि । देव ! तस्य भुवनचलनाय समुद्यतमिवात्मजयुगलं रागकेसरिद्वेषगजेन्द्रनामधेयमस्ति । तथा च—

मन्ये प्रेतपतिं विजित्य समरे हृत्वा तदीयं पदं
क्रोधात्ताम्ररुचिं दधन्नयनयोरुड्डामराडम्बरम् ।
संहारे जगतां कृतव्रतमिदं दुष्प्रेक्ष्यभालस्थलं
भ्रूकुट्यास्य दुरात्मनः सुतयुगं दृष्ट्वा न कः शङ्कते ? ॥ २८ ॥

राजा—(सावज्ञं) किं तेन वराकेण दुग्धमुखेन ? । ततस्ततः ? ।

ज्ञानदर्पणः—वामपक्षे तु—

उत्फुल्लाम्बुजमित्रनेत्रघटया स्त्रीणां रणे दुस्सहः
संग्रामाध्वरदीक्षितो मुकुटभृन्मीनध्वजो गर्जति ।
कीर्तिं यस्य पुरारिदेवविजयव्यापारगर्भां मुहु-
र्हस्ते पुष्पशरासनं मधुकरध्वानच्छलाद्गायति ॥ २९ ॥

राजा—(सोपहासं) अनङ्गेनापि किं साध्यते पुरुषव्रतम् ? । अपरश्च कश्चित्सुभटायते ? ।

ज्ञानदर्पणः—अथ किम् ? । देव ! चौलुक्यकुलमहार्णवपारिजात ! किमुच्यते मोहराजसुभटानाम् ? ।

राजा—(साश्चर्यं) ज्ञानदर्पण ! विज्ञपय निश्शङ्कम् ।

ज्ञानदर्पणः—देव ! मोहराजमुखाग्रे वल्गति क्रोधानलनामा सुभटः । तथा च—

धूमस्तोमविनिर्मिताम्बुदनवश्रेणीविलुप्तांशुमान्
ज्वालालीढनभस्तलः कवलिताशेषाटवीभूरुहः ।
साध्यो दावमहानलो जलधरासारेण सोऽहं पुनः
प्लुष्यन् धर्मसुरद्रुमं स्वमहसा कस्यात्र साध्यो ननु ? ॥ ३० ॥

राजा—(साहङ्कारं) अहो ! एवंविधमखर्वं गर्वं कुर्वाणमेनं पुरुषाधमं निर्वाणतां नेतुमस्मदुत्तेजिता क्षमा नाम महिलामतल्लिका वल्गति पुरस्तादियम् ।

ज्ञानदर्पणः—एवमेतत् । कः सन्देहः ? । तथा च—

दानोत्तुङ्गतरङ्गजाततटिनीरङ्गद्द्विरेफावली-
गीतस्थामपराक्रमां गजघटां कामाङ्कुशैः पातयन् ।

गर्जोजर्जरभूधराग्रशिखरस्तावन्मृगारिर्जयी
यावन्नाम विजृम्भते न शरभः पाथोदसज्जक्रमः ॥ ३१ ॥

राजा—(सरोमाञ्चं) अपरश्चास्ति कश्चिद्वीरश्रीविलासलालसः ? ।

ज्ञानदर्पणः—(सविनयं) देव ! वीरचूडामणे ! विपक्षक्षमाभृत्पक्षोत्खनन-नदम्भोलिपाणे ! गर्वपर्वतनामा सुभटमानमर्दनमुद्भावयति निजजैत्रचरित्रैः ।

तथा च—

दैतेयान्वयजीवितं सुरनरव्यालेन्द्रचूडामणि-
ज्योत्स्नाधौतपदाम्बुजासनतलः पौलस्त्यनामाऽभवत् ।
यो मां रामशराहतोऽपि न जहौ सोऽद्यापि विश्वत्रये
मानीति स्मृतिकोविदैरहरहः सानन्दमुद्गीयते ॥ ३२ ॥

अपि च—

मुमोच मां बाहुबलिर्न याव-
द्राज्यं च युद्धं च चकार तावत् ।
तेन प्रमुक्ते मयि सोऽपि मुक्तो
वाच्यं न किञ्चिन्ननु तस्य पङ्गोः ? ॥ ३३ ॥

राजा—अहो ! दुरात्मनाऽनेन साधूक्तम् । यन्मुक्तः किञ्चिन्न विधत्त इति । भद्र ! अन्योऽपि कश्चित्तत्र वीरत्वं प्रकटयति ।

ज्ञानदर्पणः—देव ! दम्भगुप्तनामा वीरंमन्यः स्वचरितं समुल्लासयति ।

तथा च—

रामं वञ्चितवान् यदेष कलयन्मार्गीं तनुं राक्षसो
यत्कापालिकमुद्रया च हृतवान् सीतामहो ! रावणः ।
कृत्वा वामनतां बलिं फणिपुरे बद्ध्वा हरिर्यन्न्यधा-
त्तस्मिन् कारणमस्मि गूढमनसो जानीत रे मां जनाः ! ॥ ३४ ॥

राजा—नियतं स प्रभवति प्रायेण कश्मलमनसां पुंसां नास्मादृशाम् । (पुनः सवितर्कं) ज्ञानदर्पण ! अपरश्च कश्चित्सुभटसंपदा विडम्बयत्यात्मानं न वा ? ।

ज्ञानदर्पणः—देव ! विडम्बयत्येवात्मानम् ।

राजा—क इव ?

---

१ C वहता मार्गीं तह्वं रक्खसा.

ज्ञानदर्पणः—लोभसागरनामा सुभटावन्तसः शंसति निजगुणान्।

तथा च—

दाक्षिण्यं शुचिता विवेकपदवी गम्भीरता सत्यता
वात्सल्यं च कृपालुता सरलता शीलं क्षमा संयमः।
साधुत्वं सुमतिः श्रुतं सुभगता स्युस्तावदेते गुणा
नृणां यावदहं करोमि न परं नेत्रोत्सवाडम्बरम्॥ ३९॥

राजा—धिग् निजपुरुषकारेण। अपरोऽपि शूरः कश्चिद्विभूषयति तदीयं स्कन्धावारम्?।

ज्ञानदर्पणः—देव! भवन्निर्वासितानि द्यूतादिव्यसनान्युरुपराभवसम्भवामर्षभराध्मातानि विद्यन्त एव।

राजा—(सोपहासं) निर्वासनप्रक्रमेऽपि दृष्टसाराण्यमूनि। इतरमपि श्रोतुमिच्छामि।

ज्ञानदर्पणः—सकलविपक्षदक्षमखमथनशङ्करसहोदरमस्त्येव पाषण्डमण्डलम्।

राजा—न तेन भयमुत्पाद्यते साहसिकानाम्। अथान्यमपि भटं ज्ञातुमिच्छामि।

ज्ञानदर्पणः—अस्त्येव वैरिवीरवरूथिनीदलनदुर्ललितविक्रमः कलिकन्दलो नाम शत्रुवधूवैधव्यदीक्षागुरुर्मिथ्यात्वराशिनामा राजगुरुश्च।

राजा—(सोत्प्रासं) पुरापि परीक्षितमेवेदं द्वन्द्वम्। पुनश्च प्रकाशय कमपि दोषमन्तम्।

ज्ञानदर्पणः—देव! विद्धि विरोधिवधूकचग्रहप्रपञ्चितमहिम्नः स्पर्शरसरूपगन्धशब्दनाम्नः पञ्चविषययोधान्।

राजा—(सावहेलं) सुकरस्तेषामपि विजयः। अथापरं कञ्चन प्रस्तुहि।

ज्ञानदर्पणः—प्रमादं नाम दाण्डपाशिकं जानातु जगज्जिगीषाविषयजागरूकं देवः।

राजा—न तेनापि किञ्चित्। अपरं कमप्याख्याहि।

---

१ C क्षणा २ C °नि गुरु° ३ A °विजय°

ज्ञानदर्पणः—प्रतिपक्षपृतनाघनावलीविलयपवनापातं पापकेतुसंज्ञम-मात्यं विदांकरोतु स्वामी ।

राजा—बुद्धिजीविनो ह्यमात्या न तैर्विक्रमललितम् । किञ्चिदपरं निवेदय ।

ज्ञानदर्पणः—असंयमाभिधानमरिवर्गवल्गितविपिनप्रलयपावकमवबुध्यतां प्रतीहारं राजर्षिः ।

राजा—प्रविशज्जनद्वारावरोधवैदग्ध्यमेव प्रतीहाराणाम् । न पुनर्वैरिवीरव्रजविजयेष्वोजायितम् । तदन्यमुद्दिश ।

ज्ञानदर्पणः—प्रत्यर्थिहृदयकुहरशल्यं शोकनामानमवगच्छ पुरोधसम् ।

राजा—दर्भप्रणयिपाणिपल्लवैः पुरोधोभिर्दुराराधा विजयलक्ष्मीः । तदपरमुपन्यस्य ।

ज्ञानदर्पणः—अपरेऽपि हि रिपुकामिनीकुचकलशपत्राङ्कुरलिपिदस्यवः पृथिव्यामेकवीराः सन्त्यशान्ताः शृङ्गारादिरसनामानः सेनापतयः ।

राजा—न तेष्वास्थाबुद्धिं बध्नाति विजयश्रीः । अथ कीदृशस्तस्यास्मानुद्दिश्योत्थानप्रक्रमः ? ।

ज्ञानदर्पणः—श्रूयताम् । अन्येद्युरधिसभं निषण्णया कीर्त्तिमञ्जर्या प्रतापेन चोत्तेजितो मोहमहाराजः ।

राजा—कथमिव ? ।

ज्ञानदर्पणः—

धन्यस्त्यागभटः कुमारतिलकः शाकम्भरीमाश्रितो
योऽसौ तस्य कुमारपालनृपतेश्चौलुक्यचूडामणेः ।
युद्धायाभिमुखोऽभवज्जयविधिस्त्वास्यं विधेः प्रेक्षते
प्रोद्गर्जन् विफलं शरद्धन इव त्वं केवलं वल्गसि ॥ ३६ ॥

इदं चाकर्ण्य दूरारूढकोपाटोपेन दापिता मोहमहाराजेन सन्नाहभेरी । प्रक्रान्तं च प्रयाणकं भवदुपरि । अत्रान्तरे पापकेतुर्नामामात्येनागत्य प्रत्यपादि

---

१ A °विषये° २ A °ऽपि रिपु° ३ A °स्ताग° ४ B & C °नामात्येना°

'स्वामिन्! असमीक्षितकारिता हि महद्दूषणं राज्ञाम्। स नाम जयत्येव यः स्वपरयोर्बलमधिमनसं ज्ञात्वा प्रवर्तते कृत्येषु'। तैतश्चोक्तं मोहराजेन 'अमात्य! मोहनृपतेरपीतरकातरनरपतिवत् प्रतिपक्षबिभीषिकाः पराक्रमस्यान्तरायतां यान्ति?'। पापकेतुना त्ववाचि 'देव! बलीयानसौ विपक्षक्ष्मापतिः। एनमुद्दिश्य सहसा यानं नायतिसुन्दरमुत्पश्यामि'। ततश्च मोहराजेन रागकेसरिद्वेषगजेन्द्रमदनदेवप्रभृतीन्मीलयितुमादिष्टः प्रतीहारः। स्वयं चालङ्कृतो मन्त्रमण्डपः। एवं च स्थिते समागतोऽहं देवं निकषेति।

राजा—(स्वगतं) अपि नाम मोहराजमेक एवाहं निग्रहीतुं शक्नुयाम्।

विवेकचन्द्रः—राजन्! किमिदानीमध्यवस्यति कल्याणराशिः?।

राजा—(सोत्साहं) आर्य! किमन्यत्?,

पिण्डीभूय दिवौकसां दिवि मुदा सांराविणं कुर्वतां
गर्वप्राञ्चितचेतसां च मदनादीनां मुहुः पश्यताम्।
गत्वैकोऽपि हठादरातिशिबिरं निर्भिद्य निर्भीः क्षयं
नेष्ये मोहमहीशमाहवभुवि स्वर्भूर्भुवः कण्टकम्॥ ३७॥

विवेकचन्द्रः—

किमम्भसामभेद्यं? किमदाह्यं जातवेदसाम्?।
अगम्यं मनसां किं वा? किमसाध्यं भवादृशाम्?॥ ३८॥

तथापि जगद्विजयशौण्डदोर्दण्डमण्डलो मोहराजः। नैनं प्रति सांप्रतमीदृशं महासाहसं कर्तुं सांप्रतम्।

राजा—आर्य! मा भैषीः। यतः—

श्रीनाभिक्षितिपात्मजप्रभृतिभिस्तीर्थाधिपैर्निर्जित-
स्तैस्तैः श्रीभरतेश्वरप्रभृतिभिर्ध्वस्तो महापूरुषैः।
रामाद्यैरपि पर्युपास्य सुचिरं कामं क्षयं प्रापित-
स्तद्वो! विद्धि मया तु मोहनृपतिः सोऽयं हतो हन्यते॥ ३९॥

विवेकचन्द्रः—(स्वगतं) अहो! राजर्षेरस्य महानवष्टम्भो येन त्रैलोक्यमपि तृणवत्तुलयति। तदमुना कृतकृत्योऽस्मि। (प्रकाशं) महाराज! यद्येवं तर्हि पुण्यकेतुना सह सुविमृष्टं क्रियतामिदमिति।

---

१ B & C 'अतश्चो'

(प्रविश्य)

प्रतीहारः—देव ! पुण्यकेतुः स्वामिनो दर्शनमभिलषति ।

राजा—अविलम्बं प्रवेशय ।

प्रतीहारः—यदाज्ञापयति देवः । (इति निष्क्रम्य पुण्यकेतुना सह प्रविशति ।)

पुण्यकेतुः—(स्वगतं) एष देवस्तदुपसर्पामि । (उपसृत्य) जयतु जयतु देवः ।

राजा—(ससंभ्रमं) इदमासनमास्यताम् ।

(पुण्यकेतुस्तथाकरोति ।)

राजा—अमात्य ! कच्चिदप्रतर्कितमागमनम् ।

अमात्यः—देव ! प्रसादनाम्नो राजपुरुषस्य हस्ते प्रहितमिदं गुरुणा श्रीहेमचन्द्रेण भवतो युद्धश्रद्धालुमनसो योगशास्त्रं नाम वज्रकवचम् । अमुना हि संवृतसर्वाङ्गो न भिद्यते रिपुप्रहरणपरम्पराभिः ।

पुरुषः—इमाश्च वीतरागस्तुतिसंज्ञा विंशतिर्दिव्यगुलिकाः । आभिर्मुखकमलमलङ्कृत्य स्थिताभिः पुरुषः परेषामदृशो भवति । (इति वज्रकवचं दिव्यगुलिकाश्चोपनयति ।)

राजा—दिष्ट्या परमनुगृहीतोऽस्मि गुरुणा । (इति वज्रकवचं परिधाय दिव्यगुलिकाश्चोपयुज्य) आर्य विवेकचन्द्र ! अमात्य पुण्येकेतो ! भद्र ज्ञानदर्पण ! साधयामो वयं विपक्षनिधनाय । प्रतीहार ! वक्तव्यः सेनाजनो यथा न केनाप्यहमेनमध्वानमवगाहमानोऽनुसर्त्तव्यः । यतो बहुच्छलानि रिपुबलानि । यथा तथा प्रविशतामिह महानपायः ।

प्रतीहारः—यदादिशति देवः । (इति निष्क्रान्तः ।)

विवेकचन्द्रः—महाराज ! अनुमन्यस्व मामनुगमनाय ।

पुण्यकेतुः—स्वामिन् ! अनुजानीहि मां सहागन्तुम् ।

ज्ञानदर्पणः—मामपि देव ! सहैव नय, यतोऽस्माकमस्ति त्रयाणामपि स्वाभाविकमन्तर्धानपाटवम् ।

---

१ B & C अभि ष्ठल

राजा—भवत्वेवम् । को दोषः ? । (इति सर्वे परिक्रामन्ति ।)

ज्ञानदर्पणः—देव ! इदं विपक्षभूपतेः शिबिरम् ।

राजा—आः ! कथमकालक्षेपमेव संप्राप्ताः प्रत्यर्थिस्कन्धावारम् ? ।

ज्ञानदर्पणः—अथ किम् ? ।

राजा—ज्ञानदर्पण ! कः कस्यात्रावासः ? इति श्रोतुमिच्छामि ।

ज्ञानदर्पणः—(अङ्गुल्या निर्दिशन्) देव ! अमी पाषण्डमण्डलानामुटजाः। इमे च द्यूतादीनामावासाः । अमी विषययोधानां निवासाः । अमी शृङ्गारादिरससेनापतीनां गृहाः । अयं कलिकन्दलस्य निलयः । असौ मिथ्यात्वराशेराश्रयः । इदं क्रोधानलस्य भवनम् । इदं गर्वपर्वतस्य मन्दिरम् । इदं दम्भगुप्तस्य धाम । इदं लोभसागरस्य गृहम् । इदं प्रमादस्यावसथम् । इदं शोकस्य निशान्तम् । इदमसंयमस्य धिष्ण्यम् । इदममात्यपापकेतोर्निकेतनम् । इदं रागकेसरिणः सदनम् । इदं द्वेषगजेन्द्रस्य वेश्मेति ।

राजा—ज्ञानदर्पण ! य एते द्वन्द्वेन स्थिताः प्रतिस्थानमालोक्यन्ते तैः कस्यावासैर्भवितव्यम् ? ।

ज्ञानदर्पणः—(ईषद्विहस्य) देव !,

चञ्चद्वृन्तमिषेन्द्रनीलकलशैरुल्लासयन्तः श्रियं
प्रेङ्खन्मौक्तिकहारकेतुललितैर्विभ्राजमाना मुहुः ।
दृश्यन्ते मुनिमानसेष्वपि परामुत्पादयन्तः स्पृहा-
मेते कामगुरूदराः प्रतिपदं वक्षोजसंज्ञाजुषः ॥ ४० ॥

राजा—(साकूतं) ज्ञानदर्पण ! अपि नाम यादृशममीषामापातमात्रेण रमणीयत्वं बहिरस्ति तादृशमन्तरमपि संभाव्यते ? ।

ज्ञानदर्पणः—देव !,

अमीषां यादृशं बाह्यं रम्यत्वमिह वर्त्तते ।
यदि स्यादन्तराप्येवं तत्स्यात्काममयं जगत् ॥ ४१ ॥

अपि च—

विलोक्यमाना एवैते हृद्याः क्षितिधरा इव ।
कठिनाः स्पृश्यमानास्तु परमोद्वेगहेतवः ॥ ४२ ॥

राजा—ज्ञानदर्पण ! अन्तस्तत्त्वममीषामवगन्तुमिच्छामि ।

ज्ञानदर्पणः—किं तेन ?, श्रुतादश्रुतं ह्यदः श्रेयः । तथाप्यवधार्यताम् ।

अन्तर्बहलकीलालजम्बालरसपिच्छलाः ।
विस्रमांसमयाः स्नायुव्यूताः सर्वाधमा इमे ॥ ४३ ॥

राजा—(सजुगुप्सं) तर्हि धिगमून् ।

ज्ञानदर्पणः—देव ! पुरस्तादालोकमात्रेणापि कातरनरकृतभयज्वरं मोहमहाराजस्य सौधमिह प्रविशतु देवः ।

(सर्वे परिक्रामन्ति ।)

राजा—ज्ञानदर्पण ! दर्शय तमेव तावत् त्रिलोकवीरं मोहराजम् ।

ज्ञानदर्पणः—इत इतो देवः ।

विवेकचन्द्रः—

राजंस्त्वमिव विशङ्कः कः किल कुर्वीत रिपुगृहागमनम् ? ।
अतिदुष्करं परपुरप्रवेशमिव योगिनामीशः ॥ ४४ ॥

पुण्यकेतुः—क्व पुनरस्मिन् सौधे भवितव्यं तेन ? ।

ज्ञानदर्पणः—अस्मिन् मन्त्रमण्डपे ।

(सर्वे प्रवेशं नाटयन्ति ।)

ज्ञानदर्पणः—देव ! स एष सकलवीरवर्गगर्वपर्वतवज्रपातप्रतिममहिमदुर्धर्षणो मोहराजः ।

राजा—

दिष्ट्या स एष त्रैलोक्यमल्लो मोहमहीपतिः ।
यो नः पूरयिता युद्धकेलिकौतूहलं चिरात् ॥ ४५ ॥

विवेकचन्द्रः—(सोत्कम्पं[1]) स एष पापीयान् मोहराजः ।

पुण्यकेतुः—

अशंसयाप्यसौ स्वामिजयं प्रति मतिर्मम ।
एनमालोक्य दुर्धर्षमहो ! दोलायतेऽधुना ॥ ४६ ॥

---

१ B & C सोत्कण्ठं.

ज्ञानदर्पणः—देव ! अमात्यपापकेतुद्वितीयो मोहराजो मन्त्रमण्डपासीनस्तिष्ठति । तन्निभृता एव तावन्मुहूर्त्तमास्महे ।

सर्वे—एवमस्तु । (इति तथाकुर्वन्ति ।)

(ततः प्रविशति मोहराजः पापकेतुश्च ।)

मोहराजः—(आत्मानं विलोक्य)

पुंस्कीटः किल कोऽपि तिष्ठति स च श्रीमोहभूमीपतेः
प्राप्तो वैरिपदं रणाय हतको निःशङ्कमुत्तिष्ठते ।
दोर्दण्डास्त्रिजगद्विलुण्टनकलाशौण्डास्तदेतच्चिरा-
द्दुर्बुद्धेरसमञ्जसं व्यवसितं दैवस्य रे ! पश्यत ॥ ४७ ॥

ज्ञानदर्पणः—देव ! श्रुतममुष्य विकत्थितम् ? ।

राजा—स्वेच्छा हि स्वगृहेषु व्याहाराणाम् ।

पापकेतुः—देव ! मनुष्यकीट इति मावमंस्थास्तं त्रिजगदेकवीरं चौलुक्यनृपतिम् । पश्य पश्य—

अवातरद्धरापीठे जनस्य सुकृतोदयात् ।
भावितीर्थकरः कोऽपि रूपेणास्य महीपतेः ॥ ४८ ॥

मोहराजः—मन्त्रिन् ! किमेवमस्य नृपशोः प्रशंसातिरेकेण मम कर्णज्वरं जागरयसि ? । अपि च—

वज्राग्निनेव क्षपिता यत्प्रतापेन भूभृतः ।
मोहः सोऽहमहो ! कष्टं शृणोत्यरिपराक्रमान् ॥ ४९ ॥

पापकेतुः—देव ! तस्यैव स्वप्रतापस्य संप्रति विद्धि परिक्षयम् ।

मोहराजः—(साक्षेपं) कथमिव ? ।

पापकेतुः—विडम्बितः पुत्र्या सह जामाता द्यूतः । पराभूता देवस्य दासी तत्सूनुर्मित्रं च । कारागारे निहितो लेखहारकः संसारकः । प्रणश्यागतः कलिकन्दलो मिथ्यात्वराशिश्च । निष्फलप्रयासाः प्रत्यावृत्ताः कषायतीक्ष्णाः । तत्पतत्प्रतापमात्मानमारोहन्महिमानं चारातिमवधारयतु देवः ।

मोहराजः—(अपकर्णितकेन) आः ! किमद्यापि चिरयन्ति रागकेसरिप्रभृतयः ? ।

(प्रविश्य)

प्रतीहारी—(१) जयदु जयदु देवो । देव ! को वि चरपुरिसो दंसणमभिलसदि ।

मोहराजः—मन्त्रिन् ! कतमेनामुना भवितव्यम् ? ।

पापकेतुः—धूतस्तावत्संसारकः । कदागमेनामुना भवितव्यम् ।

मोहराजः—(सहर्षं) अरे ! चिरादयमागतः । अविरतिकले ! प्रवेशय ।

प्रतीहारी—(२) जं देवो आणवेदि । (निष्क्रम्य कदागमेन सह प्रविश्य) भद्द ! एसो देवो ता उवसप्प ।

कदागमः—(स्वगतं)

(३) विच्छाओ झीणसरो वियलियलायन्नओ मिलाणमुहो ।
किं दीसइ एस पहू ? अहव पयावक्खओ जाओ ॥ ५० ॥

प्रतीहारी—(उपसृत्य) (४) देव ! एसो पुरिसो ।

मोहराजः—अविरतिकले ! रागप्रभृतीनाह्वातुं प्रहितः कथं चिरयति प्रतीहारोऽसंयमः ?, तद्गत्वा शीघ्रं प्रेषय ।

(प्रतीहारी निष्क्रान्ता ।)

(कदागमः प्रणम्योपविशति ।)

मोहराजः—भद्र कदागम ! चिरात्प्रतिनिवृत्तोऽसि तत्कथय मूलादरिस्वरूपम् ।

कदागमः—(५) देव ! एदं विन्नवीयदि । वेरिनयरे संपदि धम्मकुंजरो नाम नवदंडपासिगो वट्टदि । तप्पडिवत्तीए दुल्लहा[1] पुरिसाणं पवेसा ।

---

(१) जयतु जयतु देवः । देव ! कोऽपि चरपुरुषो दर्शनमभिलषति ।
(२) यद्देव आज्ञापयति । भद्र ! एष देवस्तदुपसर्प ।
(३) विच्छायः क्षीणस्वरो विगलितलावण्यको म्लानमुखः ।
किं दृश्यत एष प्रभुः ? अथवा प्रतापक्षयो जातः ॥
(४) देव ! एष पुरुषः ।
(५) देव ! एतद्विज्ञप्यते । वैरिनगरे संप्रति धर्मकुञ्जरो नाम नवदाण्डपाशिको वर्त्तते ।

---

१ B & C दुल्लभा.

तओ हं बंभसावगवेसं कडुय गदो निवदिगुरुणो धम्मारामे। गुरुसेवत्थमागदेण दिट्ठो रन्ना। समाणधम्मिगु त्ति नीदो धवलहरे । ठिदो य बहुधा। परिट्ठिदो पुरोहिदपदे। तत्थ ठिदस्स अदिक्कंतो इत्तिको कालो । मुणिदमिदिवित्तमसेसं पि। संपदि संसारगवदियरे पणट्ठेसु कलिकंदलप्पभुदिसु विडंबिदेसु जूदपमुहेसु अहं पि नियभएण अवक्कंतो।

राजा—

दुरात्मनाऽमुना धर्मच्छद्म धृत्वाऽस्मि वञ्चितः।
विशारदोऽपि वेश्याभिरिव श्रेणिकनन्दनः॥ ५१॥

विवेकादयः—एवमेतत्।

मोहराजः—(सहर्षं) साधु भोः कदागम! साधु। अपि च—

व्याजेन सुप्रयुक्तेन निर्मलज्ञानलोचनः।
वञ्च्यते चतुरास्योऽपि मर्त्यमात्रस्य का कथा?॥ ५२॥

कदागमः—(१) देव! विवेयचंदेण चालुक्कनिवदी अणुसरिदो।

मोहराजः—तथापि किम्?। न खलु बहुभिरप्याखुभिः समुदितैर्मार्जारकण्ठे बध्यते घण्टा। अपि च—

नृपः सोऽप्यस्य संपर्काद्राज्यभ्रंशमवाप्स्यति।
कपोताध्यासिता येन शाखा शुष्यति शाखिनः॥ ५३॥

पुण्यकेतुः—आर्य विवेकचन्द्र! शृण्वन्नसि दुरात्मनो निरर्गलं वल्गितम्।

विवेकचन्द्रः—अथ किम्?।

कदागमः—(२) विवेयदुहिदा परिणीदा गुज्जरनरिंदेण। मयधणमोयणजूदाइवसणनिव्वासणे पूरिदो पणो तीए।

तत्प्रतिपत्त्या दुर्लभा पुरुषाणां प्रवेशाः। ततोऽहं ब्रह्मश्रावकवेषं कृत्वा गतो नृपतिगुरोर्धर्मारामे। गुरुसेवार्थमागतेन दृष्टो राज्ञा। समानधार्मिक इति नीतो धवलगृहे। स्थितश्च बहुधा। परिस्थितः पुरोहितपदे। तत्र स्थितस्यातिक्रान्त एतावान् कालः। ज्ञातमितिवृत्तमशेषमपि। संप्रति संसारकव्यतिकरे प्रनष्टेषु कलिकन्दलप्रभृतिषु विडम्बितेषु द्यूतप्रमुखेष्वहमपि निजभयेनापक्रान्तः।

(१) देव! विवेकचन्द्रेण चौलुक्यनृपतिरनुसृतः।

(२) विवेकदुहिता परिणीता गूर्जरनरेन्द्रेण। मृतधनमोचनद्यूतादिव्यसननिर्वासने पूरितः पणस्तस्याः।

पापकेतुः—भद्र कदागम ! प्रष्टव्योऽसि । किं स्वानुरागात्परिणिन्ये विवेकदुहितरं नृपः ? उत महानसौ नरेन्द्रः स्वाजन्यं ग्राहयितव्य इति विवेकः कन्यामदात् ? ।

कदागमः—(१) नियाणुराएण पणपूरणपुव्वयं परिणीदा निवेण विवेयसुदा । गुरुआएसनामंनिमित्तियवयणपच्चयादो य ।

पापकेतुः—किमादिष्टं नैमित्तिकेन ? ।

कदागमः—

विवेकराजतनयां परिणीय कृपां नृपः ।
भूर्भुवःस्वस्त्रयीशत्रुं

(इत्यर्धोक्ते भयं नाटयति ।)

मोहराजः—भद्र कदागम ! अच्छलं भवतो विज्ञपय यथावृत्तम् ।

पापकेतुः—भद्र ! मा भैषीः । कठोरहितवादिनो हि प्रणिधयो भवन्ति ।

कदागमः—

मोहराजं विजेष्यते ॥ ५४ ॥ इति ।

पापकेतुः—(स्वगतं) सर्वथा प्रतापक्षयोऽस्मत्स्वामिनः । प्रतापवृद्धिर्गूर्जरराजस्य ।

मोहराजः—एवंविधाभिर्विभीषिकाभिर्न खल्वितरवच्छक्यं भयमुत्पादयितुं मोहराजस्य । अथवा—

विधिर्मयैव दुर्बुद्धिः स्वप्रजायां विडम्बितः ।
तन्मन्ये मय्यनात्मज्ञः सोऽयमेवं व्यवस्यति ॥ ५५ ॥

भवतु, तमपि प्रतिकरिष्ये ।

(नेपथ्ये उत्सारणा क्रियते ।)

मोहराजः—संप्राप्ता एवैते रागकेसरिप्रभृतयः ।

(ततः प्रविशन्ति रागप्रभृतयः ।)

---

(१) निजानुरागेण पणपूरणपूर्वकं परिणीता नृपेण विवेकसुता । गुर्वादेशनामनैमित्तिकवचनप्रत्ययतश्च ।

B & C °नेमित्तिय°

मदनदेव ! अमा सोच्चैर्हासं)

न शत्रुपक्षमक्षप

ां बिभर्त्ति गिरिशो विष्णुर्वहत्यन्वहं

क्षुद्रक्ष था ऽक्षसूत्रवलयं धत्ते च पद्मासनः ।

धम हतिं च सहते हृष्टः सहस्रेक्षण-

स्वर्ग ु मन्त्रमण्डपमलंचक्रे न जानीमहे ? ॥ ५६ ॥

सा देवः श्रीमोहस्वामी । तदुपसर्पत यूयम् ।

विवेकचन्द्र प्रणम्योपविश्य च साटोपं)

पुण्यकेतु— सेवामहमहमिकया कुर्वते शक्रपूर्वा

ज्ञानदर्पण शामिवाञ्छां दधति धृतभयोद्रेकमेकेन्द्रियाद्याः ।

टाक्षाः कठिनमुनिमनोगर्वसर्वस्वचौराः

राजा— नकस्मात्स्मरणपथमिहानीतवानद्य देवः ? ॥ ५७ ॥

स्वयम् विषादं) भद्राः ! स्मरणकारणं वः प्रकाश्यमानमतित्र-

अप्रह ? ।

(मुखाद्गुटिक

लाचार ! मोह ! कदागममुखादेव श्रोष्यन्ति कुमारादयः ।

ब्यसि । अपि मस्तु ।

एषोऽ कदागम ! ततस्ततः ? ।

हा) तदो गुज्जरनरेसरो सिद्धादेसनिमित्तियपच्चयपहिट्ठ-

सोऽहं छाहदुगुणिदरणरंगो देवस्स उवरि आगदु ज्जेव इय

रे

क्षेमुपत्थाय खड्गमादाय च) अरे ! क्वासौ क्वासौ दुरात्मा ? ।

राजा— ! कृतं संभ्रमेण । ननु कथैवेयम् । अद्यापि दूरे स वैरि-

रे राग े भूतवदुपचारः ' इति न्यायमाश्रित्यैवेदं प्रत्यपादि

मुक्

न क्षुद्रे

मुक्

आः ! कथ

: सिद्धादेशनैमित्तिकप्रत्ययप्रहृष्टपुण्यकेतुप्रभृतिप्रकृत्युत्साहद्विगुणि-
जानन्तु ।

१ B & C B & C आगदो.

रागकेसरिः—तात ! किमिदमस्थान एव संरभसे ? । ननु मयैवेदं विद्धि सिद्धमरिवधप्रयोजनम् । यतः—

गर्जद्गजेन्द्रभ्रमतः पयोद-
वृन्देऽपि यः सज्जयति क्रमं स्वम् ।
दृग्गोचरं तस्य गता मृगारेः
किमक्षता याति कुरङ्गजातिः ? ॥ ५८ ॥

द्वेषगजेन्द्रः—तात ! कथं मर्त्यमात्रेऽपि तत्र तपस्विनि जने महान् संभ्रमः ? । किं न विदितमत्यद्भुतमात्मसूनोर्विक्रमललितम् ? ।

तथा च—

दन्ताग्रघातैर्महतो महीध्रान्
समूलकाषं कषति क्षितौ यः ।
क्षुद्रद्रुमोन्मूलनमात्रमस्य
न पूरयेत्केलिमपि द्विपस्य ॥ ५९ ॥

मदनदेवः—(धनुर्ज्यां स्पृशन्) देव ! मयि स्थिते केयं शत्रुजयचिन्ता देवपादानाम् ? ।

किञ्चित्कुन्दप्रसवधवलं किञ्चिदुन्मेषधीरं
किञ्चिल्लोलभ्रमरमधुरं किञ्चिदाकुञ्चिताक्षम् ।
किञ्चिद्भावालसमसरलं प्रेक्षितं कामिनीनां
शस्त्रं दृष्ट्वा मम रणमुखे वैरिणो विद्रवन्ति ॥ ६० ॥

अपरे सर्वे—(सगर्वं)

स्वामिन् ! विश्वत्रयजयसखेष्वेषु भृत्येषु सत्सु
स्वैरं शस्त्रग्रहणविषये कोऽवकाशस्तवासौ ? ।
तस्मान्मुञ्च प्रहरणमयं मूर्ध्नि बद्धोऽञ्जलिस्तेऽ-
स्माकं मध्यात्कमपि नितमामादिश स्वेष्टसिद्ध्यै ॥ ६१ ॥

मोहराजः—(सविलक्षं) कुमार रागकेसरिन् ! वत्स द्वेषगजेन्द्र ! राजन्

---

१ A °ताग्रम.

मदनदेव ! अमात्य पापकेतो ! भद्राः कलिकन्दलादयः ! मोहमहाराजः खल्वहं न शत्रुपक्षमक्षपयित्वा शस्त्रं प्रतिसंहरामि । किं वा बहुनोक्तेन ? ।

क्षुद्रक्ष्मापतिकोटिकीटपटलीकुट्टाकदोर्विक्रमा-
ध्मातस्वान्तममुं चुलुक्यनृपतिं हत्वा रणप्राङ्गणे ।
स्वर्गस्त्रीगणगीतविक्रमगुणः कर्त्तास्मि निष्कलभषं
साम्राज्यं भुवनत्रयेऽत्र नितमामेकातपत्रं पुनः ॥ ६२ ॥

विवेकचन्द्रः—दुरात्मन् ! विफलमनोरथो भूयाः ।

पुण्यकेतुः—प्रतिहतममङ्गलम् ।

ज्ञानदर्पणः—सर्वथा शासनदेवताः कुर्वन्तु रक्षां राजर्षेः ।

राजा—अवसरोऽयमस्योपसर्पणे ।

स्वयमेव शस्त्रममुना रिपुणा परिकलितमेतदतिभयदम् ।
अप्रहरणं ह्यशस्त्रे कुलव्रतं खलु चुलुक्यानाम् ॥ ६३ ॥

(मुखाद्गुटिकां आकृष्य प्रकटीभूय च ।) अरे रे दुरात्मन् ! अनात्मज्ञ ! कश्मलाचार ! मोहाधम ! स एष गूर्जरनरेश्वरोऽहम् । यमात्तशस्त्रस्त्वमन्विष्यसि । अपि च—

एषोऽहं भुवनोपकारकरणव्यापारबद्धादरो
हारस्फारमरीचिसोदरयशस्कामो रिपोर्निग्रहात् ।
सोऽहं मोहममुं कृतान्तनगरं नेष्यामि वः पश्यतां
रे रे पञ्चशरादयः ! कृतदयास्त्रायध्वमात्मप्रभुम् ॥ ६४ ॥

(रागादयः पलायितुमिच्छन्ति ।)

राजा—

रे रागप्रमुखाः ! प्रकामसुभटंमन्याः समं लज्जया
मुक्त्वा स्वामिनमाजिसीमनि पलायध्वे कुतः कातराः? ।
न क्षुद्रेषु भवादृशेषु विभ्रमः संरम्भमाध्वं सुखं
मुक्त्वा शस्त्रमिहैव पश्यत चिरात्संग्रामकौतूहलम् ॥ ६५ ॥

आः ! कथं प्रनष्टा एव ? ।

---

१ B & C °गतगीत° २ A तमः ३ B & C °कामाक्र°

मोहराजः—(सक्रोधं) अरे रे मनुष्यकीट! कूटवाचाट! चिरादन्विष्यता प्राप्तोऽसि । आश्चर्यमाश्चर्यम्,

योो हन्तुमध्यवसितस्तैस्तैर्विविधैरुपक्रमैः सुचिरात् ।
सोऽस्मत्प्रतापवह्नावुपेत्य पतितः पतङ्ग इव ॥ ६६ ॥

तदेष न भवसि ।

राजा—अरे रे दुरात्मन् ! अपसर । परिवारवन्नश्यन्न निवार्यसे । नो चेत्—

अमुना निजकौक्षेयकधारासलिलेन दुर्धरप्रसरः ।
विध्याप्यते प्रतापानलस्तवायं ज्वलन्नितमाम् ॥ ६७ ॥

मोहराजः—अरे रे दुराचार ! वृथा वाचालतायष्ट्या प्रसुप्तं मोहमहाशीविषमात्मनिधनाय घट्टयसि । अपि च—

रागद्वेषमनोभवप्रभृतयस्तिष्ठन्तु वा यान्तु वा
किं तैर्नाम ? न मे क्वचित्परमुखप्रेक्षी जयाडम्बरः ।
एकोऽप्येष तवाहमाहवतले त्रैलोक्यजिष्णुर्ध्रुवं
शस्त्रैर्निस्त्रप ! नश्यतोऽपि निशितैर्नेष्ये व्रतप्राणितम् ॥ ६८ ॥

राजा—(साटोपं)

अस्त्रं शीघ्रमरे ! विमुच्य समरे त्वं याहि चेज्जीवितुं
वाञ्छस्यत्र तवैव नश्यति जने शस्त्रं न मे वल्गति ।
नो चेदेतदकाल एव भविता संग्रामसीमाङ्गणं
प्रत्यग्रैः प्रतिपक्षपक्ष्मलदृशां नेत्राम्बुभिः पङ्किलम् ॥ ६९ ॥

मोहराजः—अरे रे क्षुद्रक्षत्रिय !,

दृष्टः पूर्वमहं त्वया न कथमप्युच्चैरभाग्योदया-
त्तत्किं न प्रसभं श्रुतोऽप्यरिवधूवैधव्यदीक्षागुरुः ? ।
येनैवं पुरगोपुरैकसुहृदा वक्रेण वल्गन्नलं
धत्से सुप्तमृगारिजागरविधिं स्वं हन्तुमेव स्वयम् ॥ ७० ॥

राजा—रे रे सकलत्रिलोकसुकृतपलकवलनराक्षस मोह !,

प्रहर प्रहर प्रथमं दत्तोऽत्र मया तवावकाशोऽयम् ।
अप्रहरत्सु प्रहरणकलासु कुशला न चौलुक्याः ॥ ७१ ॥

मोहराजः—रे रे चौलुक्यकुलकलङ्क ! मदेकाश्रितस्वपूर्वपुरुषपरंपरापरिक्षुण्णं वर्त्म व्यतिक्रम्य मदाज्ञालोपविदग्धमुग्धपाषण्डसेवामाश्रितोऽसि । तदस्य ते दौरात्म्यस्य सहसैव करिष्ये निधनम् ।

राजा—रे रे मोह ! यदि सत्यमेव रणरङ्गवानसि, तदेहि विमर्दक्षमां भुवमवतरावः ।

मोहराजः—एवमस्तु ।

(उभे तथाकुरुतः ।)

पुण्यकेतुः—

स्मृत्वा देवस्य शौण्डीर्यं दृष्ट्वा मोहस्य विक्रमम् ।
दोलायमानो मनसा न जाने किं भविष्यति ? ॥ ७२ ॥

विवेकचन्द्रः—पुण्यकेतो ! मा मैवम् । यतः—

भयङ्करोऽयमन्येषामरिर्न त्वस्य भूपतेः ।
प्रभुः पातयितुं वातः स्तम्भवन्न गिरीनपि ॥ ७३ ॥

ज्ञानदर्पणः—यथाऽऽत्थ । अपि च—

जिनशासनप्रभावनविषयोपनिषन्निषण्णहृदयस्य ।
अस्य नृपस्य व्यसने सान्निध्यं को न विदधाति ? ॥ ७४ ॥

(नेपथ्ये)

तैस्तैः शस्त्रैरमोघैः स्वजनधनवधूसङ्गसाम्राज्यमुख्यैः
कुण्ठीभूतैर्नृभर्तुः पविमयकवचं बिभ्रतो योगमङ्गे ।
मुक्त्वा लज्जां रणं च द्विप इव सहसा सिंहनादेन दैन्या-
द्गीर्वाणैर्दृश्यमानः सदयमयमपक्रान्तवान्मोहराजः ॥ ७५ ॥

सर्वे—(आकर्ण्य सहर्ष) प्रियं नः प्रियं नः । (सहसोपसृत्य) जयतु जयतु देवः ।

(आकाशात्पुष्पवृष्टिः ।)

राजा—आर्य विवेकचन्द्र ! त्वदनुग्रहान्निस्तीर्णप्रतिज्ञोऽस्मि । तदलंकुरु स्वराजधानीं जनमनोवृत्तिम् ।

विवेकचन्द्रः—[1]राजन् ! किं ते भूयः प्रियं करोमि ? ।

राजा—

निर्वीराधनमुज्झितं विदलितं द्यूतादिलीलायितं
देवानामपि दुर्लभा प्रियतमा प्राप्ता कृपासुन्दरी ।
ध्वस्तो मोहरिपुः कृता जिनमयी पृथ्वी भवत्सङ्गमा-
त्तीर्णः सङ्गरसागरः किमपरं न स्याद्यदाशास्महे ? ॥ ७६ ॥

तथापीदमस्तु—

श्रीश्वेताम्बरहेमचन्द्रवचसां पात्रे मम श्रोतसी
श्रीसर्वज्ञपदारविन्दयुगले भृङ्गायितं चेतसः ।
तत्पुत्र्या कृपया समं परिचयो योगस्त्वया सर्वदा
भूयान्मे भुवने यशः शशिसखं मोहान्धकारच्छिदे ॥ ७७ ॥

(इति निष्क्रान्ताः सर्वे ।)

पञ्चमोऽङ्कः समाप्तः ।

इति श्रीमन्त्रियशःपालविरचितं मोहराजपराजयो नाम नाटकं
समाप्तम् । ग्रंथाग्रं १५०० ।[2]

---

१ A अङ्ग राजन् ! २ B नाटकम् ॥ छ ॥ कल्याणमस्तु ॥ मंगलं महाश्रीः ॥ छ ॥ C नाटकम् ॥ छ ॥ कल्याणमस्तु ॥ छ ॥ मंगलं महाश्रीः ॥ ॥ संवत् १६७९ वर्षे श्री····महादुर्गे श्रीखरतरगच्छे····नसूरिसंताने श्रीजिनचंद्रसूरि-श्रीजिनसागरसूरि-श्रीजिनछन्दरसूरि-श्रीजिनहर्षसूरि-शिष्यश्रीजिनचन्द्रसूरिशिष्येण विमललाभ-मुनिना श्रीमोहराजपराजयनाटकमलेखि ॥

मोहराजपराजयं
समाप्तम्.

APPENDIX I

अणहिल्लपुरनृप-
वर्णनम् ।

अत्थि महीमहिलाए मुहं महंतं मयंकपडिबिम्बं ।
जंबुद्दीवछलेणं नहलच्छि दट्ठुमुन्नमियं ॥
तुंगो नासावंसोव्व सोहए तियसपव्वओ जत्थ ।
सीयासीओयाओ दीहा दिट्ठीओ व सहंति ॥
तत्थारोवियगुणधणुनिभं नलाडं व भारहं अत्थि ।
जत्थ विरायइ विउलो वेयड्ढो रययपट्टो व्व ॥
जं गंगसिंधुसरियामुत्तियसरियाहि संगयं सहइ ।
तीरवणपंतिकुंतलकलावरेहंतपेरंतं ॥
तत्थत्थि तिलयतुल्लं अणहिलवाडयपुरं घणसुवन्नं ।
पेरंतमुत्तियावलिसमो सहइ जत्थ सियसालो ॥
गरुओ गुज्जरदेसो नगरागरगामगोउलाइन्नो ।
सुरलोयरिद्धिमयविजयपंडिओ मंडिओ जेण ॥
जम्मि निरंतरसुरभवणपडिमण्हवणंबुपूरसित्तव्व ।
सहला मणोरहदुमा धम्मियलोयस्स जायंति ॥
जत्थ सहंति सुवन्ना कंचणकलसा य सुरघरसिरेसु ।
गयणब्भमखिन्ननिसण्णखयरतरुणीण पीणथणा ॥
अब्भंलिहसुरमंदिरसिरविलसिरकणयकेयणभुएहिं ।
नच्चइ व जत्थ लच्छी सुट्ठाणनिवेसहरिसवसा ॥
जत्थ मणिभवणभित्तीसु पेच्छिउं अत्तणोवि पडिबिंबं ।
पडिजुवइसंकिरीओ कुप्पंति पियेसु मुद्धाओ ॥
जम्मि महापुरिसाणं धणदाणं निरुवमं निएऊण ।
अजहत्थनामओ लज्जिओ व्व दूरं गओ धणओ ॥
जस्सिं समच्छरमणा जलासया न उण धम्मियसमूहा ।
कमलोवकारया सूररस्सिणो न उण सप्पुरिसा ॥
जत्थ रमणीण रूवं रमणिज्जं पेच्छिऊण अमरीओ ।
लज्जंतीओ चिंताइ कहवि निद्दं न पावंति ॥
तत्थासि मूलराओ राया चोलुक्ककुलनहमयंको ।
जणिया जणाणुकूला मूलेण व जेण नीइलया ॥
जसपुंडरीयमंडलमंडियबंभंडमंडवो तत्तो ।
खंडियविपक्खमुंडो चंडो चामुंडरायनिवो ॥
तत्तो वल्लहराओ राया रइवल्लहो व्व रमणिज्जो ।

जेण तुरएहिँ जगझंपणुत्ति कित्ती जए पत्ता ॥
तत्तो दुल्लहराहो राया समरंगणंमि जस्स करे ।
करवालो छज्जइ जयसिरीइ मयणाहितिलओव्व ॥
तयणु जयसिंहदेवो पयंडभुयदंडमंडवे जस्स ।
कित्तिपयावमिसेणं चिरकालं कीलियं मिहुणं ॥
तम्मि गए सुरलोयं काउं व सुरेसरेण सह मित्तिं ।
कमलवणं व दिणिंदे अत्थमिए मउलियं भुवणं ॥
तत्तो पहाणपुरिसा नियमइमाहप्पविजियसुरगुरुणो ।
रज्जमणाहं दट्ठुं जंपंति परुप्परं एवं ॥

कुमारपालस्य राज्याभिषेकः

आसि सिरिभीमएवस्स नंदणो जणियजणमणाणंदो ।
कयसयलखोणिखेमो नामेणं खेमराउत्ति ॥
तस्स तणओ तिणीकयकंदप्पो देहसुंदरत्तेण ।
देवप्पसायनामो देवपसायणपहाणमणो ॥
तस्संगरुहो गरुओ पररमणिपरंमुहो महासूरो ।
तियससरिसरिसकित्ती तिहुयणपालो त्ति नामेण ॥
तस्स सुओ तेयस्सी पसन्नवयणो सुरिंदसमरूवो ।
देवगुरुपूयणपरो परोवयारुज्जओ धीरो ॥
दक्खो दक्खिन्ननिही नयवंतो सव्वसत्तसंजुत्तो ।
सूरो चाई पडिवन्नवच्छलो कुमरवालो त्ति ॥
एसो जुग्गो रज्जस्स रज्जलक्खणसणाहसव्वंगो ।
ता झत्ति ठविज्जउ निग्गुणेहिँ पज्जत्तमन्नेहिं ॥
एवं परुप्परं मंतिऊण तह गिण्हिऊण संवायं ।
सामुद्दियमोहुत्तियसाउणियनेमित्तियनराण ॥
रज्जंमि परिट्ठविओ कुमारवालो पहाणपुरिसेहिं ।
तत्तो भुवणमसेसं परिओसपरं व्व संजायं ॥
तुट्टहारदंतुरियघरंगण नच्चियचारुविलासपणंगण ।
निब्भरसद्दभरियभुवणंतर वज्जियमंगलतूरनिरंतर ॥
साहियदिसाचउक्को चउव्विहोवायधरियचउवन्नो ।
चउवग्गसेवणपरो कुमरनरिंदो कुणइ रज्जं ॥

कुमारपालस्य धर्म-स्वरूपजिज्ञासा ।

अह अन्नया वियड्ढे बहुणो बहुधम्मसत्थनागड्ढे ।
विप्पपहाणे हक्कारिऊण रन्ना भणियमेवं ॥
करितुरयरहसमिद्धं नरिंदसिरिकुसुमलीढपयवीढं ।
लंघियवसणसहस्सो संपत्तो जं अहं रज्जं ॥

तं पुव्वभवे धम्मो सुहेक्कहेऊ कओ मए को वि ।
कज्जस्स दंसणाओ जाणंति हि कारणं निउणा ॥
ता धम्मस्स सरूवं कहेहि परिभाविऊण सत्थत्थं ।
जेण तमायरिऊणं करेमि मणुयत्तणं सहलं ॥
मणुयत्तणे वि लद्धे कुणंति धम्मं न जे विमूढमणा ।
ते रोहणं पि पत्ता महग्घरयणं न गिण्हंति ॥
तो वुड्ढबंभणेहिं निवस्स वेयाइसत्थपन्नत्तो ।
पसुवहपहाणजागाइलक्खणो अक्खिओ धम्मो ॥
तं सोऊण निवेणं फुरियविवेएण चिंतियं चित्ते ।
अहह दियपुंगवेहिं न सोहणो साहिओ धम्मो ॥
पंचिंदियजीववहो निक्करुणमणेहिं कीरए जत्थ ।
जइ सो वि होज्ज धम्मो नत्थि अहम्मो तओ कोवि ॥
ता धम्मस्स सरूवं जहट्ठियं किं इमे न जाणंति ? ।
किं वा जाणंता वि हु मं विप्पा विप्पयारंति ॥
इय चिंताए निद्दं अलहंतो निसिभरंमि नरनाहो ।
नमिऊण अमच्चेणं बाहडदेवेण विन्नत्तो ॥
धम्माधम्मसरूवं नरिंद ! जइ जाणिउं तुमं महसि ।
खणमेक्कमेगचित्तो निसुणसु जं किं पि जंपेमि ॥
आसि भमरहिओ पुन्नतल्लगुरुगच्छदुमकुसुमगुच्छो ।
समयमयरंदसारो सिरिदत्तगुरू सुरहिसालो ॥
सो विहिणा विहरंतो गामागरनगरभूसियं वसुहं ।
वागडविसयवयंसे रयणपुरे पुरवरे पत्तो ॥
तत्थ निवो जसभद्दो भद्दगयंदो व्व दाणलद्धजसो ।
वेरिकरिदलणसूरो उन्नयवंसो विसालकरो ॥
तम्मि नरिंदमंदिरअदूरदेसंमि गिण्हिउं वसहिं ।
चंदो व्व तारयजुओ मुणिपरियरिओ ठिओ एसो ॥
तस्स सुहारससारणिसहोयरं धम्मदेसणं सोउं ।
संवेयवासियमणा के वि पवज्जंति पव्वज्जं ॥
अन्ने गिहत्थधम्मोचिआइं बारसवयाइं गिण्हंति ।
मोक्खतरुबीयभूयं सम्मत्तं आयरंति परे ॥
अह अन्नया निसाए सज्झायझुणिं मुणीण सोऊण ।
जसभद्दनिवो संवेगपरिगओ चिंतए चित्ते ॥
धन्ना एए मुणिणो काउं जे सव्वसंगपरिहारं ।
परलोयमग्गमेक्कं मुक्कभवासा पयंपंति ॥

वाग्भटदेवेन कुमारपालस्य हेमचन्द्रपरिचयोत्पादनम् ।

हेमचन्द्रस्य गुरुपरम्परावर्णनम् ।

ता एयाण मुणीणं पयपउमनमंसणेण अप्पाणं ।
परिगलियपावपंकं पहायसमए करिस्सामि ॥
एवं धम्ममणोरहकलियमणो पत्थिवो लहइ निद्दं।
मंगलतूररवेणं पडिबुद्धो पच्छिमे जामे ॥
कयसयलगोसकिच्चो समत्तसामंतमंतिपरियरिओ ।
करितुरयरहसमेओ पत्तो सिरिदत्तगुरुपासे ॥
भूमिनिहितुत्तमंगो भत्तिसमग्गो गुरुं पणमिऊण ।
पुरओ निवो निविट्ठो कयंजली भणिउमाढत्तो ॥
भयवं ! धन्ना तुब्भे संसारासारयं मणे धरिउं ।
जे चत्तसव्वसंगा परलोयाराहणं कुणह ॥
अह्मारिसा अहन्ना परलोयपरंमुहा महारंभा ।
अनियत्तविसयतण्हा जे इहभवमेत्तपडिबद्धा ॥
अह जंपिउं पवत्तो सिरिदत्तगुरू नहंगणं सयलं ।
तवसिरिमुत्तापंतीहिँ दंतकंतीहिँ धवलंतो ॥
मुहससिपवेससुविणोवमाइदुलहं नरत्तणं लहिउं ।
खणमेक्कं पि पमाओ बुहेण धम्मे न कायव्वो ॥
रन्ना भणियं भयवं ! का सा सुविणोवम त्ति ? मे कहसु ।
गुरुणा भणियं नरवर ! कहेमि जं पुच्छिअं तुमए ॥
(मूलदेवकथानकमत्रानुसन्धातव्यम्)
इय धम्मदेसणामयरसेण सेत्तंमि भूमिणाहस्स ।
हिययम्मि समुल्लसिओ जिणिंदधम्माणुरायदुमो ॥
भणियं निवेण भयवं ! कहियमिणं उभयभवहियं तुमए ।
अन्नो पिओ वि सव्वो जंपइ इहभवहियं चेव ॥
ता समयम्मि वि मुत्तुं तणं व रज्जं विवेयगिरिवज्जं ।
पडिवज्जिऊण धम्मं सहलं काहं मणुयजम्मं ॥
ता वंदिउं मुणिंदं नियमन्दिरमागओ महीनाहो ।
धम्मोवएसविसरं सुमरन्तो गमइ दियहाइं ॥
अह पावसो पयट्टो सम्पाडियपहियदियसंघट्टो ।
समरट्टमारनट्टो कयम्बसंदट्टअलिवट्टो ॥
जत्थ विरहग्गिडज्झन्तविरहिणीहियलद्धपसरेण ।
धूमभरेण व घणमण्डलेण मलिणीकयं गगणं ॥
नवमेहपिययमेणं समप्पियं जत्थ तडिलयालोयं ।
कणयमयाभरणं पिव पयडन्ति दिसापुरन्धीओ ॥

नवपाउसनरवइरज्जघोसणाडिंडिमो व्व सव्वत्थ ।
जगवियविसमवाणो वियंभिओ मेहगज्जिरवो ॥
निवडंति माणिणीमाणखण्डणे विलसमाणसत्तीओ ।
जस्सिं जलधाराओ अणंगसरधोरणीउ व्व ॥
तस्सिं चरि (?) खित्तेसु नरवइणा वावियाइं धन्नाइं ।
तेसिं दंसणहेउं कयावि राया विणिक्खन्तो ॥
तम्मि समए करिसगेहिँ धन्नं मज्झाओ पुव्वमुवखणिउं ।
पुंजीकएसु निप्फलतणेसु पज्जालिओ जलणो ॥
तत्थ जलणेण डज्झन्तविग्गहं गब्भनिब्भरं भुयगिं ।
दट्ठुं संविग्गेणं रन्ना परिभावियं एयं ॥
अहह इमो घरवासो परिहरणिज्जो विवेयवंताणं ।
बहुजीवविणासकरा आरंभा जत्थ कीरन्ति ॥
एवं संविग्गमणो राया नियमंदिरम्मि सम्पत्तो ।
हक्कारिऊण पुच्छइ एगंते सावयं एगं ॥
संपइ सिरिदत्तगुरू गुणवन्तो कत्थ विहरइ पएसे ।
सो कहइ डिंडुयाणयपुरंमि मणिपुङ्गवो अत्थि ॥
तो राया रयणीए कस्स वि अनिवेइऊण निक्खंतो ।
तुरयंमि समारुहिऊण डिंडुयाणयपुरे पत्तो ॥
सिरिदत्तगुरुं नमिऊण तस्स कहिऊण निययवुत्तंतं ।
जंपइ संपइ काउं अणुग्गहं देहि मह दिक्खं ॥
गुरुणा वुत्तं जुत्तं उत्तमसत्तस्स तुज्झ नरनाह ! ।
रज्जं तणं व मुत्तुं करेसि जं संजमग्गहणं ॥
नहि संजमाउ अन्नो संसारुच्छेयकारणं अत्थि ।
नवजलहरं विणा किं निव्वडइ दवानलं को वि ॥
रन्ना अणप्पमुल्लं एक्कं एक्कावलिं समप्पेउं ।
जिणधम्मनिम्मलमणा पयंपिआ सावया एवं ॥
कारवह जिणाययणं इमीए एक्कावलीइ मुल्लेण ।
तेहिं वि तह त्ति पडिवज्जिऊण तं झत्ति कारवियं ॥
तं अत्थि तत्थ अज्ज वि चउवीसजिणालयं जिणाययणं ।
पुन्नं व मुत्तिमंतं जसभद्दनिवस्स जं सहइ ॥
रन्ना पुण पडिवन्ना सिरिदत्तगुरुस्स चलणमूलम्मि ।
अंतररिउवहदक्खा दिक्खा निसियाऽसिधारव्व ॥
एगंतरोववासे जाजीवं अंबिलं च पारणए ।

काहं ति तेण विहिया वयगहणदिणे च्चिय पइन्ना ॥
सुयसागरपारगओ सूरिपयं पाविऊण जसभद्दो ।
भुवणे चिरं विहरिओ पडिबोहन्तो भवियवग्गं ॥
ससमयपरसमयविऊ समए तेणावि नियपए ठविओ ।
निज्जियपज्जुन्नभडो पज्जुन्नो नाम वरसूरी ॥
अह जस्सभद्दो सूरी तिव्वतवसरणसोसियसरीरो ।
नियपरिवारसमेयो आरूढो उज्जयंतगिरिं ॥
रेवयगिरिंदमउडं व सुकयलच्छीविलासकमलं व ।
भवजलहिजाणवत्तं व जिणहरं गणहरो पत्तो ॥
नमिऊण नेमिनाहं पमज्जिउं निवसिऊण तस्स पुरो ।
पज्जुन्नसूरिपमुहं नियपरिवारं भणइ एवं ॥
रागद्दोसविमुक्को चिरसेवियनाणदंसणचरित्तो ।
निच्छयनएण तित्थं अप्पच्चिय वुच्चए जइ वि ॥
तह वि हु ववहारनयेण जो पएसो पणट्ठपावाण ।
तित्थकराण पएहिं फरिसिओ सो परं तित्थं ॥
इह दिक्खापडिवत्ती नाणुप्पत्ती विमुत्तिसंपत्ती ।
नेमिस्स जेण जाया तेणेसो तित्थमुज्जितो ॥
अन्नत्थ वि मेल्लिस्सं निस्संदेहं दुहावहं देहं ।
तत्तो वरं पसत्थे तित्थे इत्थे वि मेलेम्मि ॥
इय भणियं पच्चक्खइ जिणपच्चक्खं चउव्विहाहारं ।
वारंतस्स वि पज्जुन्नसूरिणो सपरिवारस्स ॥
चउमासणोवविट्ठो परिचत्तसमत्तगत्तपरिकम्मो ।
सिरिनेमिनाहपडिमामुहपंकयनिहियनयणजुओ ॥
सव्वत्थ वि रागद्दोसवज्जिओ परमतत्तलीणमणो ।
मुणिपुंगवमुणियागमसवणसमुल्लसियसंवेगो ॥
पुव्वमहारिसिमग्गो दूसमसमये वि सेविओ सम्मं ।
तेरसदिणावसाणे पत्तो तियसालयं सूरी ॥
तत्तो पज्जुन्नगुरू वियरंतो सयलसंघपरिओसं ।
सुत्तत्थपयडणपरो परोवयारं चिरं कुणइ ॥
सत्तसुद्दो सुइमुहओ वाइज्जंतो समग्गलोएण ।
ठाणयपगरणरूवो जस्सज्ज वि फुरइ जसपडहो ॥
तस्स गुणसेणसूरी सीसो वरसंजमुज्जओ जाओ ।
जस्स गुणच्चिय पाणा अंतररिउवग्गनिग्गहणे ॥

सीसो खमग्गलग्गो तस्सासी देवचंदसूरित्ति ।
चंदेण व दियराएण जेण आणंदियं भुवणं ॥
कयसुकयकुमुयबोहा चउरवठरप्पमोयसंजणणी ।
संतिजिणचरित्तकहा जुण्हव्व वियंभिआ जत्तो ॥
जे ठाणएसु ठविया पज्जुन्नमुणीसरेण धम्मदुमा ।
काऊण ताण विवइं ते जेण लहाविआ वुड्ढिं ॥
जस्स चलणारविंदं चरित्तलच्छीविलासवासहरं ।
मुणिभमरेहिं अमुक्कं जिणमयमयरंदलुद्धेहिं ॥
सो विहरंतो महीमंडलम्मि खंडियपयंडभावरिऊ ।
सयलभुवणेक्कबंधू धंधुक्कयं पुरवरं पत्तो ॥
सो तत्थ पणमणत्थं समागयाणं जणाण पउराणं ।
संसारासारत्तणपयासणिं देसणं कुणइ ॥
तं सोउं संविग्गो सरीरसुंदेरविजियसुरकुमरो ।
एक्को वणियकुमारो कयंजली भणिउमाढत्तो ॥
भयवं! भवण्णवाओ जम्मजरामरणमरणलहरिहीरंतं ।
मं नित्थारसु सुचारित्तजाणवत्तपयाणेण ॥
गुरुणा वुत्तं बालय! किंनामा कस्स वा सुओ तंसि ।
तो तस्स माउलेणं पयंपिअं नेमिनामेण ॥
हेमचन्द्रस्य वृत्तान्तः
भयवं इहत्थि हत्थि व्व मोढकुलविंझसंभवो भद्दो ।
कयदेवगुरुजणच्चो चच्चो नामा पहाणवणी ॥
निम्मलकुलसंभूया भूरिगुणाभरणभूसियसरीरा ।
तस्सत्थि गेहिणी चाहिणि त्ति सा होइ मह बहिणी ॥
जीए विमलं सीलं दट्ठुं लज्जाए चंदमा निच्चं ।
चरमजलहिम्मि मज्जइ कलंकपक्खालणत्थं व ॥
ताणं तणओ एसो निरुवमरूवो पगिट्ठमइविहवो ।
भुवणुद्धरणमणोहरचिंचइओ चंगदेवो त्ति ॥
गब्भावयारसमए इमस्स जणणीए सुविणए दिट्ठो ।
नियगेहे सहयारो समुग्गओ वुड्ढिमणुपत्तो ॥
जापुप्फफलारंभो तत्तो सुत्तूण मंदिरं मज्झ ।
अन्नत्थ महारामे मणाभिरामे इमो पत्तो ॥
छायाए पल्लवेहिं कुसुमेहिं फलेहिं तत्थ पवरेहिं ।
बहुयजणाणं एसो उवयारं काउमाढत्तो ॥
गब्भगए वि इमिस्सिं इह देसे नट्ठमसिवनामं पि ।

तह अणभिन्नो जाओ लोओ दुब्भिक्खदुक्खस्स ॥
परचक्कचरडचोराइविद्दवा दूरमुवगया सव्वे ।
न फुरंति धूयपमुहा मेहच्छन्ने वि दिणनाहे ॥
इय तस्स जम्मदियहे जायाइं दिसामुहाइं विमलाइं ।
देवगुरूवंदणेण धम्मत्थीणं मणाइं व ॥
हरिसजणणो जणाणं सुयणो व्व समीरणो समुल्लसिओ ।
रयपसमणं निवडियं गुरूण वयणं व गंधजलं ॥
भवणम्मि कुसुमवुट्ठिं सुसामितुट्ठी व्व सेवए जाया ।
कवगुणोव्व सहियए फुरिओ गयणंमि तूररवो ॥
एसो परिओसकरो बालत्तणओ वि अमयघडिओव्व ।
रयणं व कराओ करं संचरिओ सयललोयस्स ॥
संपइ इमस्स चित्तं न रमइ अन्नत्थ वज्जिउं धम्मं ।
माणससरंमि मुत्तुं हंसस्स व पल्ललजलेसु ॥
गुरुणा वुत्तं जुत्तं जं कुणइ इमो चरित्तपडिवत्तिं ।
जेण सो परमत्थो जणणीदिट्ठस्स सुविणस्स ॥
गहिऊण वयं अवगाहिऊण नीसेससत्थपरमत्थं ।
तित्थंकरो व्व एसो जणस्स उवयारयो होही ॥
तत्तो इमस्स जणयं चच्चं नामेण भणह तो तुब्भे ।
जह चंगदेवमेयं वयगहणत्थं विसज्जेइ ॥
सो बहुसिणेहजुत्तो बहुंपि भणिओ विसज्जइ न पुत्तं ।
तत्तो पुत्तो वि दढं कउज्जमो संजमग्गहणे ॥
माउलयअणुमयं गिण्हिऊण ठाणंतरम्मि संचलिओ ।
गुणगुरुणा सह गुरुणा संपत्तो खंभतित्थम्मि ॥
तत्थ पवन्नो दिक्खं कुणमाणो सयलसंघपरिओसं ।
सो सोममुहो सोमो व्व सोमचन्दो त्ति कयनामो ॥
थेवेण वि कालेण काऊण तवं जिणागमुद्दिट्ठं ।
गंभीरस्स वि सुयसागरस्स पारंगओ एसो ॥
दूसमसमयअसंभवगुणोहकलिओ विभाविउं हियए ।
सिरिदेवचंदगुरुणा एसो गणहरपए ठविओ ॥
हेमसमच्छविदेहो चंदो व्व जणाण जणियआणंदो ।
तत्तो इमो पसिद्धो नामेणं हेमचंदो त्ति ॥
निच्चं सहावउच्चियसमग्गलोओवयारकयचित्तो ।
सो देवयाइ वुत्तो विहरंतो विविहदेसेसु ॥

गुज्जरविसयं मुत्तुं मा कुणसु विहारमन्नदेसेसु ।
काहिसि परोवयारं जेणित्थठिओ तुमं गरुयं ॥
तो तीए वयणेणं देसंतरविहरणाउ विणियत्तो ।
चिट्ठइ इहेव एसो पडिबोहंतो भवियवग्गं ॥
वुहयणचूडामणिणो भुवणपसिद्धस्स सिद्धरायस्स ।
संसयपएसु सव्वेसु पुच्छणिज्जो इमो जाओ ॥
एअस्स देसणं निसुणिऊण मिच्छत्तमोहियमई वि ।
जयसिंहनिवो जाओ जिणिंदधम्माणुरत्तमणो ॥
तत्तो तेणित्थ पुरे रायविहारो कराविओ रम्मो ।
चउजिणपडिमसमिद्धो सिद्धविहारो य सिद्धपुरे ॥
जयसिंहदेववयणाउ निम्मियं सिद्धहेमवागरणं ।
नीसेससद्दलक्खणनिहाणमिमिणा मुणिंदेण ॥
अमओवमेयवाणीविलासमेयं अपिच्छमाणस्स ।
आसि खणं पि न तित्ती चित्ते जयसिंहदेवस्स ॥
तो जइ तुमं पि वंछसि धम्मसरूवं जहट्ठियं नाउं ।
तो मुणिपुंगवमेयं पुच्छसु होऊण भत्तिपरो ॥
इय सम्मं धम्मसरूवसाहगो साहिओ अमच्चेणं ।
तो हेमचंदसूरिं कुमरनरिंदो नमइ निच्चं ॥
सम्मं धम्मसरूवं तस्स समीवंमि पुच्छए राया ।
मुणियसयलागमत्थो मुणिनाहो जंपए एवं ॥
हेमचन्द्रसूरेः कुमारपालं प्रति सद्बोधः
भवसिंधुतरीतुल्लं महल्लकल्लाणवल्लिसंकुल्लं ।
कयसयलसुहसमुदयं जीवदयं चिय मुणसु धम्मं ॥
आउं दीहमरोगमंगमसमं रूवं पगिट्ठं बलं,
सोहग्गं तिजगुत्तमं निरुवमो भोगो जसो निम्मलो ।
आएसेक्कपरायणो परियणो लच्छी अविच्छेइणी,
होज्जा तस्स भवंतरे कुणइ जो जीवाणुकंपं नरो ॥
नरयपुरसरलसरणी अवायसंघायवग्घवणघरणी ।
नीसेसदुक्खजणणी हिंसा जीवाण सुहहरणी ॥
जो कुणइ परस्स दुहं पावइ तं चेव अणंतगुणं ।
लब्भंति अंबयाइं नहि निंवतरुंमि ववियंमि ॥
जो जीववहं काउं करेइ खणमित्तमत्तणो तित्तिं ।
छेयणभेयणपमुहं नरयदुहं सो चिरं लहइ ॥
जं दोहग्गमुदग्गं जं जणलोयणदुहावहं रूवं ।

जं अरसमूलखयखाससासकुट्ठाइणो रोगा ॥
जं कण्णनासकरचलणकत्तणं जं च जीवियं तुच्छं ।
तं पुव्वरोवियजीवदुक्खरुक्खस्स फुरइ फलं ॥
जो जीवदयं जीवो नरसुरसिवसोक्खकारणं कुणइ ।
सो गयपावो पावेइ अमरसीहो व्व कल्लाणं ॥

(अमरसिंहादिकथानकान्यत्रानुसन्धेयानि)

इय जीवदयारूवं धम्मं सोऊण तुट्ठचित्तेण ।
रन्ना भणियं मुणिनाह ! साहिओ सोहणो धम्मो ॥

जओ—

एसो मे अभिरुइओ एसो चित्तंमि मज्झ विणिविट्ठो ।
एसो च्चिय परमत्थेण घडए जुत्तीहिं न हु सेसो ॥
मन्नंति इमं सव्वे जं उत्तमअसणवसणपमुहेसु ।
दिन्नेसु उत्तमाइं इमाइं लब्भन्ति परलोए ॥
एवं सुहदुक्खेसु कीरंतेसु परस्स इह लोए ।
ताइं चिय परलोए लब्भंति अणंतगुणियाइं ॥
जो कुणइ नरो हिंसं परस्स जो जणइ जीवियविणासं ।
विरएइ सोक्खविरहं संपाडइ संपयाभंसं ॥
सो एवं कुणमाणो परलोए पावए परेहिंतो ।
बहुसो जीवियनासं सुहविगमं संपओच्छेयं ॥
जं उप्पइ तं लब्भइ पभूयतरमित्थ नत्थि संदेहो ।
वविएसु कोद्दवेसुं लब्भंति हि कोद्दवा चेय ॥

कुमारपालस्य जीवदयाप्रवृत्तिः सर्वग्रामनगरेषु च राजादेशप्रेषणम् ।

जो उण न हणइ जीवे तो तेसिं जीवियं सुहं विभवं ।
न हणइ तत्तो तस्स वि तं न हणइ को वि परलोए ॥
ता भद्देण व नूनं कयाणुकंपा मए वि पुव्वभवे ।
जं लंघिऊण वसणाइं रज्जलच्छी इमा लद्धा ॥
ता संपइ जीवदया जावज्जीवं मए विहेयव्वा ।
मंसं न भक्खियव्वं परिहरियव्वा य पारद्धी ॥
जो देवयाण पुरओ कीरइ आरुग्गसंतिकम्मकए ।
पसुमहिसाण विणासो निवारियव्वो मए सो वि ॥
जीववहदुकएण वि जइ आरुग्गाइ जायए कह वि ।
तत्तो दवानलेणं दुमाण कुसुमोग्गमो होज्जा ॥
जो जन्नेसु पसुवहो विहिओ सग्गाइसाहणनिमित्तं ।
दियपुंगव ! सेयं चिय विवेयणो तं न काहिंति ॥
बालो वि मुणइ एवं जं जीववहेण लब्भइ न सग्गो ।
किं पन्नगमुहकुहराओ होइ पीऊसरसवुट्ठी ? ॥

तो गुरुणा वागरियं नरिंद ! तुह धम्मबंधुरा बुद्धी ।
सव्वुत्तमो विवेगो अणुत्तरं तत्तदंसित्तं ॥
जं जीवदयारम्मे धम्मे कल्लाणजणणकयकम्मे ।
सग्गापवग्गपुरमग्गदंसणे तुह मणं लीणं ॥

तओ रन्ना रायाएसपेसणेण सव्वगामनगरेसु अमारिघोसणापडहवायणपुव्वं पवत्तिया जीवदया।

राज्ञो मांस-परित्यागः

गुरुणा भणिओ राया ! महाराय ! दुप्परिच्चया पाएण मंसगिद्धी । धन्नो तुमं भायणं सकलकल्लाणाणं जेण कया मंसनिवित्ती ।

ता संमं पालेज्जसु मंसनिविंत्तिं नरिंद ! जाजीवं ।
संमं अपालयंतो कुंदो व्व दुहं लहइ जीवो ॥

रन्ना भणियं भयवं ! को सो कुंदो ? । गुरुणा भणियं सुणसु

(कुन्दकथानकमत्रानुसन्धेयम्)

जो पुण नियममखंडं पालिज्ज अवज्जवज्जणुज्जुत्तो ।
सो पुरिसो परलोए सोक्खमखण्डं लहइ नूणं ॥
जो य न करेज्ज नियमं निद्धम्मो जो कयं च भंजिज्जा ।
सो मंसभोगगिद्धो नरयाइकयत्थणं लहई ॥

ता महाराय ! जुत्तं तुमए कयं जं सत्तण्हं महावसणाणं दुवे पारद्धी मंसं च परिचत्ताणि । सेसाणि वि सव्वाणत्थनिबंधणाणि परिहरियव्वाणि । तत्थ—

राज्ञो द्यूतपरित्यागः सर्वराज्ये राजादेशेन निषेधश्च ।

जं कुलकलंकमूलं गुरुलज्जासच्चसोयपडिकूलं ।
धम्मत्थकामचुक्कं दाणदयाभोगपरिमुक्कं ॥
पियमायभायसुयभज्जमोसणं सोसणं सुहजलाणं ।
सुगइपडिवक्खभूयं तं जूयं राय ! परिहरसु ॥
जूयपसत्तो सत्तो समत्तवित्तस्स कुणइ विद्धंसं ।
हारियअसेसरज्जो इह दिट्ठंतो नलो राया ॥

(नलकथानकमत्रानुसन्धेयम्)

एयं सोऊण भणियं रन्ना । भयवं ! न मए अक्खाइजूएण कीलामेत्तं पि कायव्वं। गुरुणा वुत्तं— महाराय ! जुत्तं तुम्हारिसाणं विणिज्जियअक्खाणं अक्खजूयवज्जणं । मंतीहिं विन्नत्तो राया देव ! देवेण ताव सयं परिचत्तं एयं, अओ सव्वत्थ रज्जे निवारिज्जओ त्ति । रन्ना उत्तं—एवं करेह । 'आएसो पमाणं' ति भणंतेहिं तेहिं तहेव कयं । गुरुणा भणियं—सव्वाणत्थनिबंधणं परिहरसु पररमणिसेवणं ।

रन्ना वुत्तं—भयवं ! मूलाओ च्चिय मए परित्थीओ ।
दूरं भयंकरीओ भुयंगमीओ व्व चत्ताओ ॥
पररमणिपसत्तमणो पाएण जणो न को वि मह रज्जे ।
गुरुणा भणियं—धन्नो सि जो परित्थीनियत्तो सि ॥
कमलाण सरं रयणाण रोहणं तारयाण जहा गयणं ।

वेश्या—पररम-णीपरिहारः

परदारनिवित्तिव्वयं वन्नंति गुणाण तह ठाणं ॥
अह गुरुणा वागरियं—वेसावसणं नरिंद ! मुत्तव्वं ।
दविणस्स विणासयरं जं कमलवणस्स तुहिणं व ॥
जं नीररासिमहणं व कालकूडं जणेइ खयरोगं ।
कवलेइ कुलं सयलं जं राहुमुहं व ससिबिंबं ॥
धूमो व्व चित्तकम्मं जं गुणगणमुज्जलं पि मलिणेइ ।
जं दोसाण निवासो वंमियविवरं व भुयगाणं ॥
वेसावसणासत्तो तिवग्गमूलं विणासिउं अत्थं ।
पच्छा पच्छायावेण लहइ सोयं असोओ व्व ॥

(अशोककथानकमत्रानुसन्धेयम्)

रन्ना भणियं—भयवं ! वेसासु मणं अहं पि न करिस्सं ।
गुरुणा भणियं—भवउ उत्तमपुरिसस्स जुत्तमिणं ॥

संपयं मज्जवसणदोसे सुणसु—

नच्चइ गायइ पहसइ पणमइ परिभमइ मुयइ वत्थं पि ।
तूसइ रूसइ निक्कारणं पि मइरामउम्मत्तो ॥
जणणिं पि पिययमं पिययमं पि जणणिं जणो विभावन्तो ।
मइरामएण मत्तो गम्मागम्मं न याणेइ ॥

मद्यपानवर्जनम्

न हु अप्पपरविसेसं वियाणए मज्जपाणमूढमणो ।
बहु मन्नइ अप्पाणं पहुं पि निब्भत्थए जेण ॥
वयणे पसारिए साणया विवरब्भमेण मुत्तंति ।
पहपडियसवस्स व दुरप्पणो मज्जमत्तस्स ॥
धम्मत्थकामविग्घं विहणियमइकित्तिकंतिमज्जायं ।
मज्जं सव्वेसिं पि हु भवणं दोसाण किं बहुणा ? ॥
जं जावया ससयणा सपरियणा सविहवा सनयरा य ।
निच्चं सुरापसत्ता खयं गया तं जए पयडं ॥

(यादवकथानकमन्त्रानुसन्धेयम्)

एवं नरिंद ! जाओ मज्जाओ जायवाण सव्वखओ ।
ता रन्ना नियरज्जे मज्जपवित्ती वि पडिसिद्धा ॥
इण्हिं नरिंद ! निसुणसु कहिज्जमाणं मए समासेणं ।
वसणाण सिरोरयणं व सत्तमं चोरियावसणं ॥

चौरिकाव्यसन—परधनापहार-रुदती-वित्तहरणनिषेधः

परदव्वहरणपावदुमस्स वणहरणमारणाईणि ।
वसणाइं कुसुमनियरो नारयदुक्खाइं फलरिद्धी ॥
जग्गंतो सुत्तो वा न लहइ सुक्खं दिणे निसाए वा ।

संकाछुरियाए छिज्जमाणहियओ धुवं चोरो ॥
जं चोरियाए दुक्खं उब्बंधणसूलरोवणप्पमुहं ।
एत्थ वि लहेइ जीवो तं सव्वजणस्स पच्चक्खं ॥
दोहग्गमंगछेयं पराभवं विभवभंसमन्नं पि ।
जं पुण परत्थ पावइ पाणी तं केत्तियं कहिमो ॥
हरिऊण परस्स धणं कयाणुतावो समप्पए जइ वि ।
तह वि हु लहेइ दुक्खं जीवो वरुणो व्व परलोए ॥

(वरुणकथानकमत्रानुसन्धेयम्)

रन्ना भणियं भयवं ! पुव्वंपि मए अदिन्नमन्नधणं ।
न कयावि हु गहियव्वं नियरज्जे इय कयो नियमो ॥
जं उण कया वि कस्सवि कयापराहस्स कीरए दंडो ।
सो लोयपालणनिमित्तमव्ववत्था हवइ इहरा ॥
जं च रुयंतीण धणं महंतपीडानिबंधणत्तेण ।
बहु पावबंधहेउं अतो परं तं पि वज्जिस्सं ॥

गुरुणोक्तं—

न यन्मुक्तं पूर्वं रघुनहुषनाभाकभरत-
प्रभृत्युर्वीनाथैः कृतयुगकृतोत्पत्तिभिरपि ।
विमुञ्चन् सन्तोषात्तदपि रुदतीवित्तमधुना
कुमारक्ष्मापाल ! त्वमसि महतां मस्तकमणिः ॥

(कुमारपालप्रतिबोधात्)

APPENDIX II

कुमारपालो भूपालश्चौलुक्यकुलचन्द्रमाः ।
भविष्यति महाबाहुः प्रचंडाखंडशासनः ॥ ४६ ॥
स महात्मा धर्मदानयुद्धवीरः प्रजां निजाम् ।
ऋद्धिं नेष्यति परमां पितेव परिपालयन् ॥ ४७ ॥
ऋजुरप्यतिचतुरः शान्तोऽप्याज्ञादिवस्पतिः ।
क्षमावानप्यधृष्यश्च स चिरं क्ष्मामविष्यति ॥ ४८ ॥
स आत्मसदृशं लोकं धर्मनिष्ठं करिष्यति ।
विद्यापूर्णमुपाध्याय इवान्तेवासिनं हितः ॥ ४९ ॥
शरण्यः शरणेच्छूनां परनारीसहोदरः ।
प्राणेभ्योऽपि धनेभ्योऽपि स धर्मं बहु मंस्यते ॥ ५० ॥
पराक्रमेण धर्मेण दानेन दययाज्ञया ।
अन्यैश्च पुरुषगुणैः सोऽद्वितीयो भविष्यति ॥ ५१ ॥
स कौबेरीमातुरुष्कमैन्द्रीमात्रिदशापगाम् ।
याम्यामाविन्ध्यमावार्धि पश्चिमां साधयिष्यति ॥ ५२ ॥
अन्यदा वज्रशाखायां मुनिचन्द्रकुलोद्भवम् ।
आचार्यं हेमचंद्रं स द्रक्ष्यति क्षितिनायकः ॥ ५३ ॥
तद्दर्शनात्प्रमुदितः केकीवांबुददर्शनात् ।
तं मुनिं वंदितुं नित्यं स भद्रात्मा त्वरिष्यते ॥ ५४ ॥
तस्य सूरेर्जिनचैत्ये कुर्वतो धर्मदेशनाम् ।
राजा सश्रावकामात्यो वन्दनाय गमिष्यति ॥ ५५ ॥
तत्र देवं नमस्कृत्य स तत्त्वमविदन्नपि ।
वन्दिष्यते तमाचार्यं भावशुद्धेन चेतसा ॥ ५६ ॥
स श्रुत्वा तन्मुखात्प्रीत्या विशुद्धां धर्मदेशनाम् ।
अणुव्रतानि सम्यक्त्वपूर्वकाणि प्रपत्स्यते ॥ ५७ ॥
स प्राप्तबोधो भविता श्रावकाचारपारगः ।
आस्थानेऽपि स्थितो धर्मगोष्ठ्या स्वं रमयिष्यति ॥ ५८ ॥
अन्नशाकफलादीनां नियमांश्च विशेषतः ।
आदास्यते प्रत्यहं प्रायेण ब्रह्मचर्यकृत् ॥ ५९ ॥
साधारणस्त्रीर्न परं स सुधीर्वर्जयिष्यति ।
धर्मपत्नीरपि ब्रह्म चरितुं बोधयिष्यति ॥ ६० ॥
मुनेस्तस्योपदेशेन जीवाजीवादितत्त्ववित् ।
आचार्य इव सोऽन्येषामपि बोधिं प्रदास्यति ॥ ६१ ॥

येऽर्हद्धर्मद्विषः केऽपि पांडुराड्द्विजादयः ।
तेऽपि तस्याज्ञया गर्भश्रावका इव भाविनः ॥ ६२ ॥
अपूजितेषु चैत्येषु गुरुष्वप्रणतेषु च ।
न भोक्ष्यते स धर्मज्ञः प्रपन्नश्रावकव्रतः ॥ ६३ ॥
अपुत्रमृतपुंसां स द्रविणं न ग्रहीष्यति ।
विवेकस्य फलं ह्येतदतृप्ता ह्यविवेकिनः ॥ ६४ ॥
पांडुप्रभृतिभिरपि त्यक्ता या मृगया नहि ।
स स्वयं त्यक्ष्यति जनः सर्वोऽपि च तदाज्ञया ॥ ६५ ॥
हिंसानिषेधके तस्मिन् दूरेऽस्तु मृगयादिकम् ।
अपि मत्कुटयूकादि नान्त्यजोपि हनिष्यति ॥ ६६ ॥
तस्मिन्निषिद्धपापर्द्धावरण्ये मृगजातयः ।
सदाप्यविघ्नरोमन्था भाविन्यो गोष्ठधेनुवत् ॥ ६७ ॥
जलचरस्थलचरखेचराणां स देहिनाम् ।
रक्षिष्यति सदा मारिं शासने पाकशासनः ॥ ६८ ॥
ये चाजन्मापि मांसादास्ते मांसस्य कथामपि ।
दुःस्वप्नमिव तस्याज्ञावशान्नेष्यंति विस्मृतिम् ॥ ६९ ॥
दशार्हैर्न परित्यक्तं यत्पुरा श्रावकैरपि ।
तन्मद्यमनवद्यात्मा स सर्वत्र निरोत्स्यति ॥ ७० ॥
स तथा मद्यसन्धानं निरोत्स्यति महीतले ।
न यथा मद्यभांडानि घटयिष्यति चक्र्यपि ॥ ७१ ॥
मद्यपानां सदा मद्यव्यसनक्षीणसंपदाम् ।
तदाज्ञात्यक्तमद्यानां प्रभविष्यन्ति संपदः ॥ ७२ ॥
नलादिभिरपि क्ष्मापैर्द्यूतं त्यक्तं न यत्पुरा ।
तस्य स्ववैरिण इव नामाप्युन्मूलयिष्यति ॥ ७३ ॥
पारापतपणक्रीडाकुक्कुटायोधनान्यपि ।
न भविष्यन्ति मेदिन्यां तस्योदयिनि शासने ॥ ७४ ॥
स प्रायेण प्रतिग्राममपि निःसीमवैभवः ।
करिष्यति महीमेतां जिनायतनमंडिताम् ॥ ७५ ॥
प्रतिग्रामं प्रतिपुरमासमुद्रं महीतले ।
रथयात्रोत्सवं सोऽर्हत्प्रतिमानां करिष्यति ॥ ७६ ॥
दायं दायं द्रविणानि विरचय्यानृणं जगत् ।
अंकयिष्यति मेदिन्यां स संवत्सरमात्मनः ॥ ७७ ॥

From Hemachandra's Mahâvîracharitra canto XII

APPENDIX III

EDICTS OF NON-INJURY TO ANIMALS ISSUED BY KUMÂRAPÂLA'S FEUDATORIES.

ॐ नमः शिवाय । भूर्भुवःस्वश्चरं देवं वन्दे पीठं पिनाकिनं । स्मरसि श्रेयसे यंस्तं······पुरा ············समस्तराजावलिविराजितमहाराजाधिराजपरमभट्टारकपरमेश्वरनिजभुजविक्रमरणाङ्गण-विनिर्जित······(शाकंभरीभूपाल)पार्वतिपतिवरलब्धप्रौढप्रतापश्रीकुमारपालदेवकल्याणविजयराज्ये स्वे स्वे वर्त्तमाने श्रीशम्भुप्रसादावाप्तस्वच्छपूरत्नपुरचतुराशिकायां महाराजभूपालश्रीरायपालदेवान्महा-सनप्राप्तश्रीपूनपाक्षदेवश्रीमहाराज्ञी श्रीगिरिजादेवी संसारस्यासारतां विचिन्त्य प्राणिनामभयदानं महादानं मत्वाऽत्र नगरनिवासिसमस्तस्थानपतिब्राह्मणान् समस्ताचार्यान् समस्तमहाजनान् ताम्बोलि-कान् प्रकृतीर्किकृतीनः सम्बोध्य संविदितं शासनं संप्रयुञ्जति यथा । अद्य अमावस्यापर्वणि प्राणिनाम-भयदानशासनं प्रदत्तं स्नात्वा देवपितृमनुष्यान्···केन सन्तर्प्य वारावार······पूर्देवतां प्रसाद्य ऐहिक-पारत्रिकफलमङ्गीकृत्य प्रेत्य यशोभिवृद्धये जीवस्य अमारिदानं मासे मासे एकादश्यां चतुर्दश्यां अमावस्यां उभयोः पक्षयोः श्रेष्ठतिथौ भूसहायशासनोदकपूर्वं स्वित्वपरम्पराभिः प्रदत्तम् । अस्मदीय-भुवि भोक्ता महामात्यः सान्धिविग्रहिकप्रतीतस्वपुरोहितप्रभृतिसमस्तठकुराणां तथा सर्वान् संबो-धयति । अस्तु वः संविदितं··············कारापनाय······महाजनानां पणेन लिख्यते राज्ञा सभयं निग्रहणीयः श्रुत्वा शासनमिदमाचन्द्रार्कं यावत्पालनीयम् । उक्तं च व्यासेन—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमी तस्य तस्य तदा फलम् ॥
सर्वानित्थं भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामचन्द्रः ।
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ॥
अस्मद्वंशसमुत्पन्नो धन्यः कोऽपि भविष्यति ।
तस्याहं करसंलग्नो न लोप्यं मम शासनम् ॥


अमावस्यां पुण्यतिथिं भाण्डप्रजालनं च पौर्विकैः कुम्भकारैश्च नो कार्यम् । तासु तिथि-ष्ववज्ञाविभयः प्राणिवधं कुरुते तस्य शिक्षापनां दद्मि द्र० ४ चत्वारि । नड्डूलपुरनिवासी प्राग्वाट-वंशजः शुभंकराभिधानः सुश्रावकः साधुधार्मिकः तत्सुतौ इह हि योनौ जातौ पूतिगसालिगौ तै (कृपा)पराभ्यां प्राणिनामर्थे विज्ञप्य शासनं

स्वहस्तः श्रीपूनपाक्षदेवस्य लिखितमिदं पारि लक्ष्मीधरसुत ठ० जसपालेन प्रमाणमिति ॥

ॐ ॥ संवत् १२०९ माघवदि १४ शनौ अद्येह श्री··················हाराजाधिराज-परमेश्वरउमापतिवरलब्धप्रशादप्रौढप्रताप··························निर्जितशाकम्भरीभूपालश्रीम-त्कुमारपालदेवकल्याणविजय························यश्रीमहादेवे श्रीकरणादौ समस्तमुद्राव्या-पारान् परिपं························प्रभुप्रसादावाप्तश्रीकिराटकूपलाटहृदशिवा················राजश्रीआलणदेवः शिवरात्रिचतुर्दश्यां शुचिर्दे···········पुण्ययशोऽभिवृद्धये प्राणिनामभयप्रदानं

म··············हाजनताम्बूलिकसमतप्रकृतीन् संबोध्य अभय·························
मासे उभयोः पक्षयोः अष्टमी एकादशी चतुर्दशी·························दत्तं अतोऽनन्तर-
मेतासु तिथिषु नगरत्रयेऽपि जीव··················(जा ?) च व्यतिक्रम्य जीवानां वधं
कारयति करोति वा स व्यापा··················आचन्द्रार्कं यावत्केनापि न लोपनीयम्।
अपरं पुरोहिता (अमा)······················सर्वैरपरैश्च एषा अमारिरूढिः प्रमाणीकार्या।
(यः को)························कालेन क्षीयते फलं एतस्याभयदानस्य क्षय······
स्य प्रदत्ताऽभयदक्षिणा।·········न तु विप्रसहस्रेभ्यो············कोऽपि पापिष्ठतरो जीववधं
कुरुते तदा स पञ्चदम्मै दंड(नीयः)।············दुर्व्यो माहराजिकस्यैको द्रम्मोऽस्ति।
स्वहस्तोऽयं महारा(जश्रीआल्हणदेवस्य)·································
श्रीमहाराजपुत्रकेल्हणदेवमेतत् (मतं)······················महाराजपुत्रगजसिंहस्य(म)त
···························सान्धिविग्रहिकठ०खेलादित्येन लिखितमिदं।··············
··············श्री नदूलपुरवासी प्राक् (ग्) वाटवंशप्रभूतशुभंकराभिधानः श्रावकः। तत्पुत्रौ
क्षितितल (ले) धर्मतया विख्यातौ पूतिगशालिगौ। ताभ्यामतीव कृपापराभ्यां प्राणिनामभय-
प्रदानशासनं विज्ञप्य कारापितमिति। उत्कीर्ण सूत्र० भाइलेन।·······················

INDEX OF NAMES OF HISTORICAL IMPORTANCE OCCURRING IN THE MOHAPARÂJAYA.



CORRIGENDA

P. 1 l. 12 नोच्चै०
P. 3 l. 13 ०मवाप्य
P. 6 l. 24 तत्प्रभृति
P. 11 l. 18 श्रूयताम्
P. 14 l. 13 कष्ट०
P. 19 l. 29 रेणुकणकरणि०
P. 20 l. 6 एदं
,, l. 20 एनं for ननु
,, l. 21 एतत्
,, l. 23 ०विन्यास०
P. 23 l. 25 पुत्रकेण
P. 24 l. 24 विडम्बयति
P. 26 l. 5 भृत्वा
P. 26 l. 15 पियवयस्सस्स
P. 27 l. 8 वदनं विशदं
P. 29 l. 7 पाणिपल्लवेन
P. 32 l. 28 B & C omit
P. 41 l. 23 ०नुनीयमानापि
P. 43 l. 17 पूजयितुं
,, l. 22 खिद्यन्ते
P. 44 l. 24 प्रार्थितो
P. 47 l. 26 कोऽपि इदं
P. 49 l. 26 अस्मिन्
P. 59 l. 11 प्रतिनिवृत्य
P. 65 l. 11 पत्यु०
P. 66 l. 7 तवात्मजः
P. 67 l. 3 प्रियं नः प्रियं नः
P. 69 l. 17 धिग्
P. 71 l. 19 ०स्तया
P. 71 l. 21 ०गृहीतास्मि
P. 73 l. 20 सांप्रतं
P. 75 l. 16 समाश्वसिहि समाश्वसिहि
P. 84 l. 27 मनुजो
P. 85 l. 20 पुनर्विपक्षः
P. 86 l. 22 नालकं
P. 86 l. 23 ०कनक०
P. 89 l. 20 निरुपमैषां
P. 90 l. 7 ०संमर्द्दे
,, l. 18 लोके
P. 91 l. 1 मच्चलोयम्मि
P. 91 l. 17 मर्त्यलोके
,, l. 19 ०वयस्य
P. 92 l. 24 तिष्ठत्विति
P. 93 l. 1 अहं
P. 96 l. 21 ०मसदृश०
P. 97 l. 97 अंबा
P. 98 l. 14 प्रियसखि
P. 101 l. 26 मूर्खो
P. 102 l. 11 एवं
P. 102 l. 28 गोष्ठी
P. 104 l. 12 उवसप्पामि
P. 105 l. 25 किञ्चेतरैः
P. 107 l. I5 न ते ब्रह्मराक्षसाः
P. 111 l. 3 चौलुक्य०
P. 120 l. 1 सुभटावतंसः
P. 121 l. 20 शाकम्भरी०
P. 130 l. 20 साक्षेपमुत्थाय
P. 132 l. 1 खल्वहं
P. 132 l. 5 निष्कल्मषं
P. 132 l. 18 मोहममुं
P. 133 l. 10 प्रसुप्तं
P. 134 l. 9 उभौ
P. 134 l. 23 सहर्षं